एम्. ए. संस्कृतम्
M. A. in Sanskrit

पञ्चविंशतिपत्रम्
Paper-25

# संस्कृतसाहित्ये नीतिशास्त्रम्

## (Ethics in Sanskrit Literature)

*सम्पादना*
डा. विपिन विहारी शतपथी

*साधारण-संपादक:*
प्रफेसर सुस्मित प्रसाद पाणि:

*निर्देशक:* दूर-निरन्तर-शिक्षा-निर्देशालय:

UTKAL UNIVERSITY
DDCE
Education for All

दूर-निरन्तर-शिक्षा-निर्देशालय:
उत्कलविश्वविद्यालय:,वाणीविहार:, भुवनेश्वरम्

Scanned with CamScanner

म्. ए. संस्कृतम्
M. A. in Sanskrit

पञ्चविंशतिपत्रम्
Paper-25

# संस्कृतसाहित्ये नीतिशास्त्रम्

## (Ethics in Sanskrit Literature)

*सम्पादना*
डा. विपिन विहारी शतपथी

*साधारण-संपादकः*
प्रफेसर सुस्मित प्रसाद पाणिः

*निर्देशकः* दूर-निरन्तर-शिक्षा-निर्देशालयः

UTKAL UNIVERSITY

DDCE
Education for All

**दूर-निरन्तर-शिक्षा-निर्देशालयः**
उत्कलविश्वविद्यालयः, वाणीविहारः, भुवनेश्वरम्

Scanned with CamScanner

# संस्कृतसाहित्ये नीतिशास्त्रम्

**(Ethics in Sanskrit Literature)**

**M. A. in Sanskrit**

**Paper-25**

*सम्पादना*

डा. विपिन विहारी शतपथी

संपादक:

*प्रफेसर सुस्मित प्रसाद पाणि:*

***Published by :***

**Directorate of Distance & Continuing Education**

**Utkal University, Vani Vihar, Bhubaneswar**

**Ph. 0674-2376700, 2376703**

First **Edition : 2015**

© Directorate, DDCE, Utkal University

***No. of Copies*** : .500.Copies

***Printed at :***

*inte*CAD

442, Saheed Nagar, Bhubaneswar-751007

Ph. : 0674-2544631, Mob.- 9437044631

This SIM has been prepared exclusively by Directorate of Distance & Continuing Education (DDCE), University, It conforms to the syllabi and contents as approved by the Utkal University.

Scanned with CamScanner

UTKAL UNIVERSITY

D.D.C.E.
Education For All

# DIRECTORATE OF DISTANCE & CONTINUING EDUCATION
# UTKAL UNIVERSITY : VANI VIHAR
# BHUBANESWAR:-751007

## *From the Director's Desk*

The Directorate of Distance & Continuing Education, originally established as the University Evening College way back in 1962 has travelled a long way in the last 52 years. **'EDUCATION FOR ALL'** is our motto. Increasingly the Open and Distance Learning institutions are aspiring to provide education for anyone, anytime and anywhere. DDCE, Utkal University has been constantly striving to rise up to the challenges of Open Distance Learning system. Nearly ninety thousand students have passed through the portals of this great temple of learning. We may not have numerous great tales of outstanding academic achievements but we have great tales of success in life, of recovering lost opportunities, tremendous satisfaction in life, turning points in career and those who feel that without us they would not be where they are today. There are also flashes when our students figure in best ten in their honours subjects. In 2014 we have as many as fifteen students within top ten of honours merit list of Education, Sanskrit, English and Public Administration, Accounting and Management Honours. Our students must be free from despair and negative attitude. They must be enthusiastic, full of energy and confident of their future. To meet the needs of quality enhancement and to address the quality concerns of our stake holders over the years, we are switching over to self instructional material printed courseware. Now we have entered into public private partnership to bring out quality SIM pattern courseware. Leading publishers have come forward to share their expertise with us. A number of reputed authors have now prepared the course ware. Self Instructional Material in printed book format continues to be the core learning material for distance learners. We are sure that students would go beyond the course ware provided by us. We are aware that most of you are working and have also family responsibility. Please remember that only a busy person has time for everything and a lazy person has none. We are sure you will be able to chalk out a well planned programme to study the courseware. By choosing to pursue a course in distance mode, you have made a commitment for self improvement and acquiring higher educational qualification. You should rise up to your commitment. Every student must go beyond the standard books and self instructional course material. You should read number of books and use ICT learning resources like the internet, television and radio programmes etc. As only limited number of classes will be held, a student should come to the personal contact programme well prepared. The PCP should be used for clarification of doubt and counseling. This can only happen if you read the course material before PCP. You can always mail your feedback on the course ware to us. It is very important that you discuss the contents of the course materials with other fellow learners.

We wish you happy reading.

SP Pani

**(S.P. Pani)**

DIRECTOR

Scanned with CamScanner

# सूचीपत्रम्


| विषयक्रमः | | पृष्ठाङ्कः |
|---|---|---|
| 1. | अनुविभागः प्रथमः (Unit-I)<br>विदुरनीतिः (प्रथमोऽध्यायः) | 1-32 |
| 2. | अनुविभागः द्वितीयः (Unit-II)<br>चाणक्यनीतिः (प्रथमोऽध्यायः - पञ्चमोऽध्यायः) | 33-79 |
| 3. | अनुविभागः तृतीयः (Unit-III)<br>नीतिशतकम् (श्लोकः १ तः २५ यावत्) | 80-98 |
| 4. | अनुविभागः चतुर्थः (Unit-IV)<br>नीतिशतकम् (श्लोकः २६ तः ५० यावत्) | 99-117 |
| 5. | अनुविभागः पञ्चमः (Unit-V)<br>श्रीमद्भगवद्गीता (सप्तदशोऽध्यायः) | 118-135 |


Scanned with CamScanner

# UNIT - I

## (अनुविभागः प्रथमः)

## विदुरनीतिः

### प्रथमोऽध्यायः

**वैशम्पायन उवाच**

द्वाःस्थं प्राह महाप्राज्ञो धृतराष्ट्रो महीपतिः ।
विदुरं द्रष्टुमिच्छामि तमिहानय मा चिरम् ।।१।।

**अन्वयः** महाप्राज्ञः महीपतिः धृतराष्ट्रः द्वाःस्थं प्राह । विदुरं द्रष्टुमिच्छामि । तम् इह आनय । मा चिरम् ।

**भावार्थ :** संजये गते महाबुद्धिमान् राजा धृतराष्ट्रः द्वारपालम् आदिष्टवान्- "अहमधुना विदुरं द्रष्टुम् इच्छामि । तेन सह मम संपर्कः करणीयः । तं सत्वरं मम समीपम् आनय । विलम्बेन अलम् ।"

प्रहितो धृतराष्ट्रेण दूतः क्षत्तारमब्रवीत् ।
ईश्वरस्त्वां महाराजो महाप्राज्ञ दिदृक्षति ।।२।।

**अन्वयः** धृतराष्ट्रेण प्रहितो दूतः क्षत्तारमब्रवीत् । महाप्राज्ञ ! ईश्वरः महाराजः त्वां दिदृक्षति ।।

**भावार्थः** धृतराष्ट्रेण प्रेरितः दूतः तत्र गत्वा विदुरं प्रति कथितवान् - हे महाप्राज्ञ! अस्माकं स्वामी महाराजः धृतराष्ट्रः त्वया सह मिलितुम् इच्छति ।

एवमुक्तस्तु विदुरः प्राप्य राजनिवेशनम् ।
अब्रवीद् धृतराष्ट्राय द्वाःस्थ मां प्रतिवेदय ।।३।।

**अन्वयः** एवम् उक्तः विदुरः राजनिवेशनं प्राप्य । अब्रवीद् - द्वाःस्थ धृतराष्ट्राय मां प्रतिवेदय ।।

**भावार्थः** दूतस्य वचनं श्रुत्वा विदुरः राजप्रासादस्य समीपं गत्वा कथितवान् - हे द्वारपाल! मम आगमनस्य वार्त्ता यथाशीघ्रं धृतराष्ट्रस्य निवेदनीया ।

**द्वाःस्थ उवाच**

विदुरोऽयमनुप्राप्तो राजेन्द्र तव शासनात् ।
द्रष्टुमिच्छति ते पादौ किं करोतु प्रशाधि माम् ।।४।।



Scanned with CamScanner

NOTES

अन्वय: राजेन्द्र ! तव शासनात् अयं विदुर: अनुप्राप्त: । ते पादौ द्रष्टुम् इच्छति । मां प्रशाधि । किं करोतु ।।

भावार्थ: द्वारपालेन कथितम् - हे महाराज! भवत: आज्ञया विदुर: अत्र समागत: । स: भवत: चरणद्वयं द्रष्टुमिच्छति । मम कृते आज्ञा प्रदातव्या । तेन किं कार्यं करणीयम् ।

धृतराष्ट्र उवाच

प्रवेशय महाप्राज्ञं विदुरं दीर्घदर्शिनम्।
अहं हि विदुरस्यास्य नाकल्पो जातु दर्शने ।।५।।

अन्वय: दीर्घदर्शिनम् महाप्राज्ञं विदुरं प्रवेशय । अहम् अस्य विदुरस्य दर्शने हि न अकल्पो जातु ।।

भावार्थ: धृतराष्ट्र: कथितवान् - हे द्वारपाल! महाबुद्धिमन्तं दूरदर्शिनं विदुरम् अन्त: प्रवेशय । विदुरस्य दर्शनेन तथाच तेन सह मेलनेन मम कदापि समस्या दूरीभूता स्यात् । विदुरस्य दर्शने कापि समस्या न स्यात् ।

द्वा:स्थ उवाच

प्रविशान्त:पुरं क्षत्तर्महाराजस्य धीमत: ।
न हि ते दर्शनेऽकल्पो जातु राजाब्रवीद्धि माम् ।।६।।

अन्वय: क्षत्त:! धीमत: महाराजस्य अन्त:पुरं प्रविश । राजा माम् अब्रवीत् हि ते दर्शने अकल्पो न जातु ।

भावार्थ: द्वारपाल: विदुषकस्य समीपमागत्य कथितवान् - विदुर महाशय! भवान् यथाशीघ्रं बुद्धिमत: महाराजस्य धृतराष्ट्रस्य अन्त:पुरं प्रविशतु । महराजेन कथितं यत् विदुरेण सह मिलित्वा आलापं कर्तुं न काऽपि समस्या स्यात् ।

वैशम्पायन उवाच

तत: प्रविश्य विदुरो धृतराष्ट्रनिवेशनम् ।
अब्रवीत् प्राञ्जलिर्वाक्यं चिन्तयानं नराधिपम् ।।७।।

अन्वय: तत: विदुर: धृतराष्ट्रनिवेशनं प्रविश्य चिन्तयानं नराधिपं प्राञ्जलि: वाक्यम् अब्रवीत् ।।

भावार्थ: वैशम्पायन: कथितवान् - तदनन्तरं विदुर: धृतराष्ट्रस्य प्रसादम् अन्तरा प्रविश्य चिन्तामग्नं तं महाराजं बद्धाञ्जलि: प्रोवाच ।

विदुरोऽहं महाप्राज्ञ सम्प्राप्तस्तव शासनात् ।
यदि किञ्चन कर्तव्यमयमस्मि प्रशाधि माम् ।।८।।



Scanned with CamScanner

**अन्वय:** महाप्राज्ञ ! अहं विदुर: तव शासनात् सम्प्राप्त: । अहम् अस्मि । यदि किञ्चन कर्त्तव्यं मां प्रशाधि ।

**भावार्थ:** हे महाप्राज्ञ ! अहं विदुर: अस्मि । भवत: आज्ञया अत्र उपस्थित: । मया किमपि करणीयम् अस्ति चेत् कथयतु । अहं सर्वं कर्तुं शक्नोमि । मम कृते आज्ञा प्रदेया ।

**<u>धृतराष्ट्र उवाच</u>**

**सञ्जयो विदुर प्राज्ञो गर्हयित्वा च मां गत: ।**
**अजातशत्रो: श्वो वाक्यं सभामध्ये स वक्ष्यति ।।९।।**

**अन्वय:** विदुर! प्राज्ञो सञ्जय: मां गर्हयित्वा गत: । श्व: सभामध्ये अजातशत्रो: (युधिष्ठिरस्य) वाक्यं स वक्ष्यति ।।

**भावार्थ:** धृतराष्ट्रेण प्रोक्तम् - हे विदुर ! सञ्जय: मम समीपम् आगतवान् । स: मां भर्त्सयित्वा इत: आगच्छत्, श्व: सभायां अजातशत्रो: युधिष्ठिरस्य वचनं श्रावयिष्यति ।

**तस्याद्य कुरुवीरस्य न विज्ञातं वचो मया ।**
**तन्मे दहति गात्राणि तदकार्षीत् प्रजागरम् ।।१०।।**

**अन्वय:** अद्य तस्य कुरुवीरस्य वचो मया न विज्ञातम्। तत् मे गात्राणि दहति । तत् प्रजागरम् अकार्षीत् ।।

**भावार्थ:** अहमद्य कुरुवीरस्य युधिष्ठिरस्य वार्त्तां न जानामि । तत् मम शरीरं दहति । तेन अहं जागरित: । अधुनापि मम नेत्रे निद्रा नायाति ।

**जाग्रतो दह्यमानस्य श्रेयो यदनुपश्यसि ।**
**तद् ब्रूहि त्वं हि नस्तात धर्मार्थकुशलो ह्यसि ।।११।।**

**अन्वय:** दह्यमानस्य जाग्रत: यत् श्रेय: अनुपश्यसि तद् ब्रूहि। यत: त्वं हि धर्मार्थकुशलो असि ।।

**भावार्थ:** हे तात! चिन्तया दह्यमानस्य जाग्रत: मम यत् मंगलविधायकं विषयं त्वं पश्यसि विचारयसि वा तत् वद । यत: अस्मासु त्वं धार्मिक: अर्थज्ञाननिपुणश्च ।

**यत: प्राप्त: सञ्जय: पाण्डवेभ्यो न मे यथावन्मनस: प्रशान्ति: ।**
**सर्वेन्द्रियाण्यप्रकृतिं गतानि किं वक्ष्यतीत्येव मेऽद्य प्रचिन्ता ।।१२।।**

**अन्वय:** सञ्जय: यत: पाण्डवेभ्यो न प्राप्त: । यथावत् मे मनस: प्रशान्ति: (न) । सर्वेन्द्रियाणि अप्रकृतिं गतानि, किं वक्ष्यति इति एव अद्य मे प्रचिन्ता ।

NOTES



Scanned with CamScanner

NOTES

**भावार्थ:** संजय: यावत् पर्यन्तं पाण्डवानां समीपात् न प्रत्यागत: तावत् मम मनसि पूर्णशान्ति: नायाति । मम सर्वे इन्द्रिया: व्याकुलिता: भवन्ति । श्व: स: किं वदिष्यति ? तत् विचिन्त्य सम्प्रति मम मन: अतीव चिन्ताव्याकुलितम् । किमपि हितकरं वचनं मह्यं श्रावय ।

<u>विदुर उवाच</u>

**अभियुक्तं बलवता दुर्बलं हीनसाधनम् ।**

**हृतस्वं कामिनं चोरमाविशन्ति प्रजागरा: ।।१३।।**

**अन्वय:** बलवता अभियुक्तं दुर्बलं हीनसाधनं हृतस्वं कामिनं चोरं प्रजागरा: आविशन्ति ।

**भावार्थ:** विदुरेण कथितम् - राजन्! यस्य जनस्य बलवता जनेन साकं विरोध: भवति । तं उपायहीनं दुर्बलं जनं हृतसर्वस्वजनं कामपरायणं जनं चौरं च रात्रिजागरण रोग: न त्यजति । वास्तवत: रात्रिजागरणरोगेण ते पीडिता: भवन्ति ।

**कच्चिदेतैर्महादोषैर्न स्पृष्टोऽसि नराधिप ।**

**कच्चिच्च परवित्तेषु गृध्यन्न परितप्यसे ।।१४।।**

**अन्वय:** नराधिप ! एतै: महादोषै: कच्चित् न स्पृष्टो असि । कच्चित् परवित्तेषु गृध्य: न परितप्यसे ।

**भावार्थ:** हे राजेन्द्र ! एतै: महादोषै: साकं भवत: संपर्क: न अभवत् ? एकेन दोषेण सह संपर्क: न जात: किम्? भवान् परधनेषु लोभासक्त: सन् परितापं न करोति?

<u>धृतराष्ट्र उवाच</u>

**श्रोतुमिच्छामि ते धर्म्यं परं नै:श्रेयसं वच: ।**

**अस्मिन् राजर्षिवंशे हि त्वमेक: प्राज्ञसम्मत: ।।१५।।**

**अन्वय:** अस्मिन् राजर्षिवंशे त्वं हि एक: प्राज्ञसम्मत: । (अहं) ते परं नि:श्रेयसं धर्म्यं वच: श्रोतुम् इच्छामि ।

**भावार्थ:** हे विदुर ! अस्मिन् राजर्षिवंशे त्वं हि सर्वेषु विज्ञजनेषु माननीय: । अत: अहं त्वत् हितकरं धर्मयुक्तं च वचनं श्रोतुम् इच्छामि ।

<u>विदुर उवाच</u>

**राजा लक्षणसम्पन्नस्त्रैलोक्यस्याधिपो भवेत् ।**

**प्रेष्यस्ते प्रेषितश्चैव धृतराष्ट्र युधिष्ठिर: ।।१६।।**



Scanned with CamScanner

**अन्वय:** धृतराष्ट्र ! राजा युधिष्ठिर: लक्षणसम्पन्न: त्रैलोक्यस्य अधिप: भवेत् । प्रेष्य: ते एव प्रेषित: ।

**भावार्थ:** हे महाराज धृतराष्ट्र ! श्रेष्ठलक्षणयुक्त: युधिष्ठिर: त्रैलोक्यस्य स्वामी भवितुं योग्य:, तस्मिन् राजपदं युज्यते एव, । स: भवत: आज्ञाकारी परन्तु स: भवता वनं प्रति प्रेषित: ।

**विपरीततरश्च त्वं भागधेये न सम्मत: ।**
**अर्चिषां प्रक्षयाच्चैव धर्मात्मा धर्मकोविद: ।।१७।।**

**अन्वय:** (हे धृतराष्ट्र!) (त्वं) धर्मात्मा धर्मकोविद: त्वं - अर्चिषां प्रक्षयात् च एव विपरीततर: भागधेये च न सम्मत: ।

**भावार्थ:** हे धृतराष्ट्र ! भवान् धर्मात्मा तथाच सम्यक् धर्मविषयं जानाति । भवान् नेत्रहीन: । अत: युधिष्ठिरं सम्यक् ज्ञातुं न समर्थ: । अत: तस्य कृते भवान् विपरीतम् आचरितवान् । येन राज्यभागं प्रदातुं भवान् न सम्मत: अभवत् ।

**आनृशंस्यादनुक्रोशाद् धर्मात् सत्यात् पराक्रमात् ।**
**गुरुत्वात् त्वयि सम्प्रेक्ष्य बहून् क्लेशांस्तितिक्षते ।।१८।।**

**अन्वय:** आनृशंस्यात् अनुक्रोशात् धर्मात् सत्यात् पराक्रमात् गुरुत्वात् त्वयि सम्प्रेक्ष्य बहून् क्लेशान् तितिक्षते ।

**भावार्थ:** हे धृतराष्ट्र ! युधिष्ठिरस्य समीपे क्रूरता नास्ति । तस्मिन् दयागुण: परिपूर्ण: । धर्मे सत्ये पराक्रमे च तस्य मति: अस्ति । स: भवन्तं प्रति पूज्यभावनां पोषयति । एतदर्थं स: बहुविधान् क्लेशान् सोढुं समर्थ: भवति । स: युधिष्ठिर बहुसद्बुद्धियुक्त: भवति ।

**दुर्योधने सौबले च कर्णे दु:शासने तथा ।**
**एतेष्वैश्वर्यमाधाय कथं त्वं भूतिमिच्छसि ।।१९।।**

**अन्वय:** दुर्योधने सौबले कर्णे तथा च दु:शासने एतेषु ऐश्वर्यम् आधाय त्वं कथं भूतिम् इच्छसि ?

**भावार्थ:** विदुर: कथयति - हे महाराज ! धृतराष्ट्र ! त्वं दुर्योधने शकुनौ कर्णे दु:शासने च किमर्थं राज्यभारम् अर्पयसि ? एते सर्वे अयोग्या: भवन्ति । एतेषु अयोग्येषु राज्यभारं समर्प्य कथं त्वं समृद्धिं ऐश्वर्यं च कामयसि ?

**आत्मज्ञानं समारम्भस्तितिक्षा धर्मनित्यता ।**
**यमर्थान्नापकर्षन्ति स वै पण्डित उच्चते ।।२०।।**

NOTES



Scanned with CamScanner

NOTES

**अन्वय:** आत्मज्ञानं समारम्भ: तितिक्षा धर्मनित्यता च यम् (मनुष्यं) अर्थात् न अपकर्षन्ति स वै पण्डित उच्चते ।

**भावार्थ:** स्वस्य स्वरूपस्य यथार्थज्ञानम् उद्योग: दु:खसहनशक्ति: धर्मे स्थिरता एते गुणा: यं नरं पुरुषार्थात् विच्युतं कर्त्तुं न पारयन्ति स: नर: सर्वै: पण्डित: उच्यते ।

**निषेवते प्रशस्तानि निन्दितानि न सेवते ।**
**अनास्तिक: श्रद्दधान एतत् पण्डितलक्षणम् ।।२१।।**

**अन्वय:** प्रशस्तानि निषेवते, निन्दितानि न सेवते । अनास्तिक: श्रद्दधान एतत् पण्डितलक्षणम् ।

**भावार्थ:** ये जना: उत्तमकर्माणि कुर्वन्ति कुकर्माणि न आचरन्ति च । मन्दकार्यात् दूरे तिष्ठन्ति । ते आस्तिका: श्रद्धालव: च भवन्ति । तेषां ते सद्गुणा: एव पण्डितानां विदुषां लक्षणम् एव ।

**क्रोधो हर्षश्च दर्पश्च ह्री: स्तम्भो मान्यमानिता ।**
**यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते ।।२२।।**

**अन्वय:** क्रोध: हर्ष: दर्प: ह्री: स्तम्भ: मान्यमानिता च यम् अर्थान् न अपकर्षन्ति । स वै पण्डित उच्चते ।

**भावार्थ:** क्रोध: हर्ष: दर्प: लज्जा उद्दण्डता मान्यमानिता च यस्य समीपे सन्ति । पुनरपि एतै: य: नर: पथभ्रष्ट्र: न भवति । स: जन एव पण्डित रूपेण सर्वै: परिगण्यते ।

**यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे ।**
**कृतमेवास्य जानन्ति स वै पण्डित उच्यते ।।२३।।**

**अन्वय:** यस्य कृत्यं मन्त्रं मन्त्रितं परे वा न जानन्ति अस्य कृतम् एव जानन्ति । स वै पण्डित: उच्यते ।

**भावार्थ:** अपरे जना: यस्य कर्त्तव्यं गुप्तविचारं पूर्वकृतविचारं वा न जानन्ति । परं कार्यसम्पादनात् परं जानन्ति । स एव पण्डित: कथ्यते ।

**यस्य कृत्यं न विघ्नन्ति शीतमुष्णं भयं रति: ।**
**समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ।।२४।।**

**अन्वय:** शीतम् उष्णं भयं रति: समृद्धि: असमृद्धि: वा यस्य कृत्यं न विघ्नन्ति । स वै पण्डित: उच्यते ।

**भावार्थ:** यस्य जनस्य कार्यकलापे शीतम् उष्णं भयं रति: समृद्धि: दरिद्रता च विघ्न जनयितुं न समर्थ: स: मानव: संसारेऽस्मिन् पण्डितरूपेण सम्मानित: भवति ।



Scanned with CamScanner

NOTES

**यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते ।**
**कामादर्थं वृणीते यः स वै पण्डित उच्यते ।।२५।।**

**अन्वयः** यस्य संसारिणी प्रज्ञा धर्मार्थों अनुवर्त्तते । यः कामादर्थं वृणीते स वै पण्डित उच्यते ।

**भावार्थः** यस्य लौकिकी बुद्धिः धमम् अर्थं च अनुसरति, यः भोगात् विच्युतः सन् पुरुषार्थं स्वीकरोति, स एव पण्डितः कथ्यते ।

**यथाशक्ति चिकीर्षन्ति यथाशक्ति च कुर्वते ।**
**न किञ्चिदवमन्यन्ते नराः पण्डितबुद्धयः ।।२६।।**

**अन्वयः** (ये नराः) यथाशक्ति चिकीर्षन्ति यथाशक्ति कुरुते च किञ्चित् न अवमन्यन्ते (ते) नराः पण्डितबुद्धयः (भवन्ति) ।

**भावार्थः** विवेकशालिनः बुद्धिमन्तः नराः यथाशक्ति कार्यं कर्तुम् इच्छन्ति पुनरपि यथाशक्ति कर्म कुर्वन्ति च । किमपि वस्तु निरर्थकं हेयं वा न मन्यन्ते ।

**क्षिप्रं विजानाति चिरं शृणोति विज्ञाय चार्थं भजते न कामात् ।**
**नासम्पृष्टो व्युपयुङ्क्ते परार्थे तत् प्रज्ञानं प्रथमं पण्डितस्य ।।२७।।**

**अन्वयः** विद्वान् चिरं शृणोति क्षिप्रं विजानाति विज्ञाय चार्थं भजते न कामात् । न अपृष्टो परार्थे व्युपयुङ्क्ते । पण्डितस्य तत् प्रथमं प्रज्ञानम् ।

**भावार्थः** विद्वान् जनः कमपि विषयं बहुकालं यावत् सम्यक् शृणोति परं शीघ्रं तदर्थं विजानाति अर्थात् अवगच्छति । सर्वं विज्ञाय कर्त्तव्यबुद्ध्या पुरुषार्थे प्रवृत्तः भवति । परन्तु कामनायाः हेतोः कस्मिन्नपि विषये प्रवृत्तः न भवति । सः अपृष्टः चेत् अन्यविषये किमपि वृथा न कथयति । एते स्वभावाः पण्डितानां मुख्याः परिचयाः भवन्ति ।

**नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।**
**आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः ।।२८।।**

**अन्वयः** अप्राप्यं न अभिवाञ्छन्ति । नष्टं शोचितुं न इच्छन्ति । पण्डित बुद्धयः नराः आपत्सु न च मुह्यन्ति ।

**भावार्थः** ये मानवाः पण्डितानां समः बुद्धिमन्तः ते दुर्ल्लभपदार्थं न कामयन्ति । यानि पदार्थानि विनष्टानि तेषां पदार्थानां विषये अनुशोचनां कर्त्तुं न इच्छां प्रकटयन्ति । विपदि ते विचलिताः कातराः वा न भवन्ति ।

**निश्चित्य यः प्रक्रमते नान्तर्वसति कर्मणः ।**
**अवन्ध्यकालो वश्यात्मा स वै पण्डित उच्यते ।।२९।।**



Scanned with CamScanner

NOTES

**अन्वय:** यः निश्चित्य प्रक्रमते (सः) कर्मणः अन्तः न वसति । अबन्ध्यकालो वश्यात्मा स वै पण्डित उच्यते ।

**भावार्थ:** यः नरः प्रथमतः निश्चयं कृत्वा कर्मारम्भं करोति । कार्यम् अन्तरा कथंचित् तस्मात् कर्मणः विच्युतः न भवति । समयस्य वृथा दुरुपयोगं न करोति । स्वाधीने चित्तः तिष्ठति । स पण्डितः उच्यते ।

**आर्यकर्मणि रज्यन्ते भूतिकर्माणि कुर्वते ।**

**हितं च नाभ्यसूयन्ति पण्डिता भरतर्षभ ।।३०।।**

**अन्वय:** हे भरतर्षभ! पण्डिताः आर्यकर्माणि रज्यन्ते । भूतिकर्माणि कुर्वते । हितं न अभि असूयन्ति ।

**भावार्थ:** हे भरतकुलभूषण धृतराष्ट्र! पण्डिताः सदा उत्तमकर्मणि अभिरुचिं स्थापयन्ति । उन्नतिकरं कार्यं कुर्वन्ति । हितसाधनाय जनाय न असूयन्ति । तस्य हितसाधनजनस्य गुणे पण्डिताः दोषं न पश्यन्ति ।

**न हृष्यत्यात्मसम्माने नावमानेन तप्यते ।**

**गाङ्गो ह्रद इवाक्षोभ्यो यः स पण्डित उच्यते ।।३१।।**

**अन्वय:** यः आत्मसम्माने न हृष्यति, अवमानेन न तप्यते, गङ्गा ह्रद इव आक्षोभ्यो । सः पण्डित उच्यते ।

**भावार्थ:** यः जनः स्वस्य सम्माने हर्षोत्फुल्लः न भवति, अपि च अवमानेन सन्तप्तः न भवति गंगाह्रदवत् यस्य चित्ते क्षोभः नायाति, सः एव पण्डितः कथ्यते ।

**तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम् ।**

**उपायज्ञो मनुष्याणां नरः पण्डित उच्यते ।।३२।।**

**अन्वय:** (यः) सर्वभूतानां तत्त्वज्ञः सर्वकर्मणां योगज्ञः । मनुष्याणाम् उपायज्ञो (सः) नरः पण्डित उच्यते ।

**भावार्थ:** यः सर्वभौतिकवस्तूनां वास्तवस्वरूपं जानाति । सर्वकर्माणां साधनोपायं जानाति । मनुष्येषु साधन- कौशलं यः अधिकं जानाति सः एव पण्डितः कथ्यते ।

**प्रवृत्तवाक्चित्रकथ ऊहवान् प्रतिभानवान् ।**

**आशु ग्रन्थस्य वक्ता च यः स पण्डित उच्यते ।।३३।।**

**अन्वय:** (यः) प्रवृत्तवाक् चित्रकथ ऊहवान् प्रतिभानवान् ग्रन्थस्य आशु वक्ता च स पण्डित उच्यते ।



Scanned with CamScanner

**भावार्थ:** यस्य भीषणा वाणी कुत्रापि शिथिलता स्थिरा वा न भवति, यः विचित्रशैल्या आलापं करोति, तर्के सुदक्षः तथा च प्रतिभाशाली भवति पुनरपि यः ग्रन्थस्य तात्पर्यं यथाशीघ्रं बोधयितुं प्रकाशयितुं वा समर्थः सः पण्डितः कथ्यते ।

**श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा ।**

**असम्भिन्नार्यमर्यादः पण्डिताख्यां लभेत सः ।।३४।।**

**अन्वय:** यस्य श्रुतं प्रज्ञानुगं प्रज्ञा च श्रुतानुगा एव। (यः) असम्भिन्नार्यमर्यादः सः पण्डिताख्यां लभेत ।

**भावार्थ:** यस्य विद्या बुद्धिम् अनुसरति । बुद्धिः विद्याम् अनुसरति । यः शिष्टजनः मर्यादालंघनं न करोति । सः जनः पण्डितपदं लभते ।

**अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः ।**

**अर्थांश्चाकर्मणा प्रेप्सुर्मूढ इत्युच्यते बुधैः ।।३५।।**

**अन्वय:** (यः) अश्रुतः च समुन्नद्धो दरिद्रश्च महामनाः । अकर्मणा अर्थान् च प्रेप्सु, बुधैः मूढ इति उच्यते ।

**भावार्थ:** यः विद्यां विनापि गर्वी भवति । दरिद्रः अपि महामनाः भवति । किमपि कर्म अकृत्वापि धनं प्राप्तुम् इच्छुकः भवति । तमपि पण्डिताः मूर्ख इति कथयन्ति ।

**स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति ।**

**मिथ्या चरति मित्रार्थे यश्च मूढः स उच्यते ।।३६।।**

**अन्वय:** यः स्वमर्थं परित्यज्य परार्थम् अनुतिष्ठति मित्रार्थे मिथ्या चरति । सः मूढः उच्यते ।

**भावार्थ:** यः स्वकर्त्तव्यं परित्यज्य अपरस्य कर्त्तव्यं पालयति, यः मित्रेण सह असाधुम् आचरति । सः मूर्खः कथ्यते ।

**अकामान् कामयति यः कामयानान् परित्यजेत् ।**

**बलवन्तं च यो द्वेष्टि तमाहुर्मूढचेतसम् ।।३७।।**

**अन्वय:** यः अकामान् कामयति कामयानान् परित्यजेत् । यः बलवन्तं द्वेष्टि तम् मूढचेतसम् आहुः।

**भावार्थ:** यः अवाञ्छितं पदार्थं प्राप्तुम् इच्छति । इप्सितं वाञ्छितं वा पदार्थप्राप्तिं परित्यजति । यः आत्मनः बलवता जनेन सह द्रोहाचरणं करोति, तादृशः जनः मूर्खरूपेण परिचितः भवति ।

NOTES



Scanned with CamScanner

NOTES

**अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।**

**कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ।।३८।।**

**अन्वय:** (य:) अमित्रं मित्रं कुरुते । मित्रं द्वेष्टि हिनस्ति च । दुष्टं कर्म आरभते च । तं मूढचेतसम् आहु:।

**भावार्थ:** य: जन: शत्रुं मित्रं करोति । मित्राय द्रुह्यति, मित्राय कष्टं ददाति । सर्वदैव मन्दं कार्यं करोति, तादृश: जन: मूढचेत्ता भवति ।

**संसारयति कृत्यानि सर्वत्र विचिकित्सते ।**

**चिरं करोति क्षिप्रार्थे स मूढो भरतर्षभ ।।३९।।**

**अन्वय:** भरतर्षभ ! (य:) कृत्यानि संसारयति । सर्वत्र विचिकित्सते । क्षिप्रार्थे चिरं करोति । स मूढो (भवति) ।

**भावार्थ:** हे भरतश्रेष्ठ धृतराष्ट्र ! य: स्वकार्यस्य वृथा प्रसारं करोति । सर्वेषु क्षेत्रेषु सन्देहं करोति । शीघ्रं साधितं कर्म विलम्वेन करोति स: अवश्यं मूढ: भवति ।

**श्राद्धं पितृभ्यो न ददाति दैवतानि न चार्चति ।**

**सुहृन्मित्रं न लभते तमाहुर्मूढचेतसम् ।।४०।।**

**अन्वय:** (य:) पितृभ्य: श्राद्धं न ददाति, दैवतानि न अर्चति । सुहृत् मित्रं न लभते, तं मूढचेतसम् आहु:।

**भावार्थ:** य: जन: पितृपुरुषेभ्य: श्राद्धं न प्रददाति । देवान् यथाकालं न पूजयति । सुहृत् मित्रं च न लभते । तादृश: जन: सर्वै: मूढचेता इति कथ्यते ।

**अनाहूत: प्रविशति अपृष्टो बहु भाषते ।**

**अविश्वस्ते विश्वसिति मूढचेता नराधम: ।।४१।।**

**अन्वय:** अनाहूत: प्रविशति अपृष्टो बहु भाषते । अविश्वस्ते विश्वसिति (स:) मूढचेता नराधम: (भवति)।

**भावार्थ:** य: मूढमना अधमपुरुष: स: निमन्त्रणं विना उत्सवादिषु अन्येषां गृहे प्रविशति । कोऽपि न पृच्छति परं स: अधिकं कथयति । य: न विश्वासयोग्य: तस्मिन् एव विश्वसिति । एतादृश: मूढस्वभावजन: सर्वदा सर्वत्र निन्दित: भवति ।

**परं क्षिपति दोषेण वर्तमान: स्वयं तथा ।**

**यश्च क्रुध्यत्यनीशान: स च मूढतमो नर: ।।४२।।**



Scanned with CamScanner

**अन्वय:** स्वयं दोषेण वर्त्तमान: (सन्) तथा परं क्षिपति । य: अनीशान: क्रुध्यति । स: नर: च मूढतमो भवति ।

**भावार्थ:** य: स्वयमेव दोषावहं कर्म कृत्वापि अपरस्य दोषं विलोक्य तम् आक्षिपति पुनरपि स: प्रभुत्वविहीन: सन् वृथा अन्यस्मै क्रुध्यति । स: मूढेषु मूढतम: भवति ।

**आत्मनो बलमज्ञाय धर्मार्थपरिवर्जितम् ।**

**अलभ्यमिच्छन्नैष्कर्म्यान्मूढबुद्धिरिहोच्यते ।।४३।।**

**अन्वय:** (य:) आत्मन: बलम् अज्ञाय नैष्कर्म्यात् धर्मार्थपरिवर्जितम् अलभ्यम् इच्छन् स: मूढ़बुद्धि: इह उच्यते ।

**भावार्थ:** य: स्वकीयं बलम् अविज्ञाय कर्म अकृत्वापि धर्मार्थविरोधी भवति पुनरपि अप्राप्यं पदार्थम् इच्छति, स: जन: संसारेऽस्मिन् मूढबुद्धि: कथ्यते ।

**अशिष्यं शास्ति यो राजन् यश्च शून्यमुपासते ।**

**कदर्यं भजते यश्च तमाहुर्मूढचेतसम् ।।४४।।**

**अन्वय:** हे राजन् ! यो अशिष्यं शास्ति । य: शून्यम् उपासते । य: कदर्यं भजते । तं मूढचेतसम् आहु:।

**भावार्थ:** हे महाराज धृतराष्ट्र ! य: शासनस्य कृते अयोग्य: । यस्योपरि अधिकार: नास्ति तं शास्ति उपदिशति वा पुनरपि शून्यस्य उपासनां करोति । कृपणस्य सेवां करोति । स: मूढमना इति कथ्यते ।

**अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव वा ।**

**विचरत्यसमुन्नद्धो य: स पण्डित उच्यते ।।४५।।**

**अन्वय:** (य:) महान्तम् अर्थं विद्याम् ऐश्वर्य्यम् एव वा आसाद्य असमुन्नद्ध: विचरति स: पण्डित उच्यते ।

**भावार्थ:** य: जन: बहूनि धनानि विद्याम् ऐश्वर्यं च आसाद्य निरभीमान: सन् आचरति संसारेऽस्मिन् स: पण्डित: उच्यते ।

**एक: सम्पन्नमश्नाति वस्ते वासश्च शोभनम् ।**

**योऽसंविभज्य भृत्येभ्य: को नृशंसतरस्तत: ।।४६।।**

**अन्वय:** य: भृत्येभ्य: असंविभज्य एक: शोभनं वास: च वस्ते एक: अश्नाति तत: क: नृशंसतर: ।

NOTES

NOTES

**भावार्थ :** य: जन: स्वस्य भरण-पोषणयोग्येभ्य: जनेभ्य: असंविभज्य एकाकी उत्तमभोजनं करोति । बहुमूल्यै: असंविभज्य एकाकी उत्तम भोजनं करोति, बहुमूल्यं सुन्दरं वस्त्रं धारयति । तदपेक्षया अधिक: क्रूर: अपर: क: स्यात् ?

**एक: पापानि कुरुते फलं भुङ्क्ते महाजन: ।**

**भोक्तारो विप्रमुच्यन्ते कर्ता दोषेण लिप्यते ।।४७।।**

**अन्वय:** एक: पापानि कुरुते । महाजन: फलं भुङ्क्ते । भोक्तार: विप्रमुच्यन्ते । कर्त्ता दोषेण लिप्यते ।

**भावार्थ:** मानव: एकाकी पापं करोति । पापमार्गेण धनम् उपार्जयति । परं तत् पापधनं बहुभि: जनै: उपभोग्यते । कालक्रमे उपयोगकारिण: दोषात् विमुक्ता: भवन्ति । परन्तु उपार्जनकारी दोषेण लिप्त: भवति । परिशेषे स एव दोषी भवति ।

**एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता ।**

**बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद् राष्ट्रं सराजकम् ।।४८।।**

**अन्वय:** धनुष्मता मुक्त: इषु: एकं हन्यात् वा न हन्यात् । बुद्धिमता उत्सृष्टा बुद्धि: सराजकं राष्ट्रं हन्यात् ।

**भावार्थ:** केनापि धनुर्धरेण निक्षिप्तेन धनुषा कोऽपि मृत: स्यात् न वा स्यात् । एक: धनुर्धर: शरं त्यजति । तेन शरेण कोऽपि मृत: भवेत् न वा भवेत् । परन्तु एकेन बुद्धिमता जनेन प्रयोगकृता बुद्धि: राज्ञा साकं देशमपि विनश्यति ।

**एकया द्वे विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु ।**

**पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भव ।।४९।।**

**अन्वय:** एकया द्वे विनिश्चित्य चतुभि: त्रीन् वशे कुरु । पञ्च जित्वा षट् विदित्वा सप्त: हित्वा सुखी भव ।

**भावार्थ:** विदुरेण प्रोक्तम् - हे धृतराष्ट्र! भवान् एकया बुद्ध्या द्वे निश्चित्य चतुर्भि: त्रयाणां वशीकरणं करोतु । पञ्च विजित्य षट् ज्ञात्वा सप्त त्यक्त्वा सुखी भवतु । अर्थात् प्रथमत: धृतराष्ट्र: एकया बुद्ध्या किं कर्त्तव्यं किम् अकर्त्तव्यं तत् निर्णयं करोतु । तत: साम-दान-दण्ड भेदेन शतृ-मित्र - उदासिजनाम् वशीकरणं करोतु आयत्ताधीनं करोतु च । पुनरपि पञ्च ज्ञानेन्द्रियाणि विजित्य सन्धि - विग्रह -यान - आसन - द्वैधीभाव समाश्रयरूपगुणान् ज्ञात्वा स्त्री-द्यूत- मृगया - मद्य- कठोरवचन - दण्डकठोरता - अन्यायोपार्जितधनं त्यक्त्वा सुखी भवतु ।



Scanned with CamScanner

**एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते ।**

**सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविप्लवः ।।५०।।**

**अन्वयः** विषरसो एकं हन्ति, शस्त्रेण एकः च वध्यते । मन्त्रविप्लवः सराष्ट्रं सप्रजं राजानं च हन्ति ।

**भावार्थः** विषरसः एकं जनं हन्ति । यः विषं पिबति स एव मृत्युवरणं करोति । शस्त्रेण एकः जनः वध्यते । यं शस्त्रेण आघातः क्रियते सः मृतः भवति । परन्तु गुप्तमन्त्रणायाः परिप्रकाशेन राज्यस्य क्षतिसाधनं प्रजानाम् अमङ्गलं राज्ञः विनाशः च भवति ।

**एकः खादु न भुञ्जीत एकश्चार्थान्न चिन्तयेत् ।**

**एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात् ।।५१।।**

**अन्वयः** एकः खादु न भुञ्जीत । एकः च अर्थान् न चिन्तयेत् । एकः न अध्वानं न गच्छेत् । सुप्तेषु एकः न जागृयात् ।

**भावार्थः** एकाकी जनः सुस्वादुखाद्यं न खादेत् । एकाकी कस्मिन् विषये निश्चयं न कुर्यात् । मार्गेण एकाकी कुत्रापि न गच्छेत् । यदा सर्वे सुप्ताः भवन्ति तदा एकः जनः न जागृयात् ।

**एकमेवाद्वितीयं तद् यद् राजन्नावबुध्यसे ।**

**सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ।।५२।।**

**अन्वयः** राजन् ! पारावारस्य नौरिव स्वर्गस्य यद् एकमेव अद्वितीयं सोपानं स्वर्गम् तत् न अवबुध्यसे ।

**भावार्थः** हे राजन्! यथा समुद्रं तर्तुं नौकया प्रयोजनं विद्यते तथैव स्वर्गस्य कृते सत्यमेव अद्वितीयं सोपानं भवति । एतत् त्वं कथं ज्ञातुं न शक्नोषि ?

**एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।**

**यदेनं क्षमया युक्तमशक्तं मन्यते जनः ।।५३।।**

**अन्वयः** क्षमावतां एकः दोषो नद्वितीय उपपद्यते । क्षमया यत् एनं युक्तं जनः अशक्तं मन्यते ।

**भावार्थः** श्लोकेऽस्मिन् क्षमायाः महत्त्वं वर्ण्यते । ये क्षमाशीलाः जनाः सन्ति; तेषु एकस्य दोषस्य आरोपः क्रियते । अपरस्य द्वितीयदोषस्य सम्भावना न स्यात् । तत्र दोषस्य कारणमेव - जनाः क्षमाशीलजनान् विलोक्य चिन्तयन्ति यत् एते जनाः असमर्थाः इति ।

NOTES

NOTES

**सोऽस्य दोषो न मन्तव्य: क्षमा हि परमं बलम् ।**

**क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा ।।५४।।**

**अन्वय:** अस्य स: दोष: न मन्तव्य: । क्षमा हि परमं बलम् । अशक्तानां क्षमा हि गुण: । शक्तानां क्षमा भूषणम् ।

**भावार्थ:** क्षमाशीलानां जनानां स: दोष: इति न चिन्तनीयम् । युधिष्ठिर: क्षमाशील: अत: स: असमर्थ: इति चिन्त्यते । सर्वदैव क्षमा हि श्रेष्ठं बलम् । क्षमा असमर्थजनानां बलम् । पुनरपि सा क्षमा समर्थजनानां भूषणमेव ।

**क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते ।**

**शान्तिखड्ग: करे यस्य किं करिष्यति दुर्जन: ।।५५।।**

**अन्वय:** लोके क्षमा वशीकृति: । क्षमया किं न साध्यते । यस्य करे शान्तिखड्ग: (तस्य) दुर्जन: किं करिष्यति ।

**भावार्थ:** धर्मराज: युधिष्ठिर: परम: समर्थ: । क्षमाशीलता तस्य भूषणम् । संसारे क्षमावशीकरणं मन्त्रस्वरूपम् एव । क्षमया किं वा साधितं न भवति ? यस्य करे शान्तिखड्ग: विद्यते । दुर्जन: तस्य जनस्य किं वा करिष्यति ?

**अतृणे पतितो बह्नि: स्वयमेवोपशाम्यति ।**

**अक्षमावान् परं दोषैरात्मानं चैव योजयेत् ।।५६।।**

**अन्वय:** अतृणे पतित: वह्नि: स्वयम् एव उपशाम्यति । अक्षमावान् आत्मानं परं चैव दोषै: योजयेत् ।

**भावार्थ:** तृणविहीने स्थाने दाह्यवस्तुरहिते स्थाने पतित: अग्नि: स्वयम् एव उपशाम्यति । परन्तु क्षमाहीन: मानव: आत्मानम् अपरं जनं च दोषै: योजयेत्। अत: सर्वै: ज्ञायते यत् क्षमाहीन: जन: अग्ने: अपेक्षया मारात्मक: भवति ।

**एको धर्म: परं श्रेय: क्षमैका शान्तिरुत्तमा ।**

**विद्यैका परमा तृप्तिरहिंसैका सुखावहा ।।५७।।**

**अन्वय:** एक: धर्म: परं श्रेय: । एका क्षमा उत्तमा शान्ति: । एका विद्या परमा तृप्ति: । एका अहिंसा सुखावहा ।

**भावार्थ:** धर्म: एव सर्वेषां परममङ्गलविधायक: । एका एव क्षमा परमशान्तिप्रदायिका । एका एव विद्या या परमसन्तोषविधायिका भवति । एका एव अहिंसा या सर्वदैव सुखप्रदायिका भवति ।



Scanned with CamScanner

द्वाविमौ ग्रसते भूमिः सर्पो विलशयानिव ।

राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम् ।।५८।।

**अन्वयः** सर्पः विलशयान् इव अविरोद्धारं राजानं अप्रवासिनं ब्राह्मणं च इमौ द्वौ भूमिः ग्रसते ।

**भावार्थः** गर्त्ते स्थितान् मूषकादीन् यथा सर्पः भक्षयति तथैव इयं पृथिवी शत्रुणा साकं यः राजा विरोधं न करोति तं पुनः विदेशे न वसन्तं ब्राह्मणं च ग्रसते ।

द्वे कर्मणी नरः कुर्वन्नस्मिँल्लोके विरोचते ।

अब्रुवन् परुषं किञ्चिदसतोऽनर्चयंस्तथा ।।५९।।

**अन्वयः** किञ्चित् परुषं अब्रुवन् तथा असतो अनर्चयन् नरः द्वे कर्मणी कुर्वन् अस्मिन् लोके विराजते ।

**भावार्थः** यः जनः किञ्चिदपि कष्टकरं वचनं न कथयति पुनरपि असाधुजने आदरं न करोति सः अर्थात् द्वे कर्मणी कुर्वन् नरः अस्मिन् संसारे सर्वैः जनैः आदरणीयः भवति । सः सर्वत्र सर्वदा च शोभते ।

द्वाविमौ पुरुषव्याघ्र परप्रत्ययकारिणौ ।

स्त्रियः कामितकामिन्यो लोकः पूजितपूजकः ।।६०।।

**अन्वयः** पुरुषव्याघ्र ! कामितकामिन्यः स्त्रियः पूजितपूजकः लोकः इमौ द्वौ परप्रत्ययकारिणौ ।

**भावार्थः** हे पुरुषश्रेष्ठ ! अन्यस्त्रीद्वारा प्रार्थितपुरुषाणां कामनाकारिण्यः स्त्रियः तथा अन्यद्वारा पूजितमनुष्यस्य च आदरकर्त्तापुरुषः एतौ द्वौ परस्परं प्रति विश्वासं स्थापयित्वा अग्रे एव चलतः ।

द्वाविमौ कण्टकौ तीक्ष्णौ शरीरपरिशोषिणौ ।

यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ।।६१।।

**अन्वयः** यः अधनः (धनं) कामयते । यः अनीश्वरः कुप्यति । इमौ द्वौ शरीरपरिशोषिणौ तीक्ष्णौ कण्टकौ (भवतः) ।

**भावार्थः** यः जनः निर्धन अपि बहुमूल्यं पदार्थम् इच्छति । यस्य प्रभुत्वं न स्यात् परं सदा कुप्यति एतौ द्वौ जनौ स्वस्य कृते तीक्ष्णौ कण्टकौ भवतः । पुनरपि निजशरीरपोषणकारिणौ भवतः ।

NOTES



Scanned with CamScanner

NOTES

**द्वावेव न विराजेते विपरीतेन कर्मणा ।**
**गृहस्थश्च निरारम्भः कार्यवांश्चैव भिक्षुकः ।।६२।।**

अन्वयः विपरीतेन कर्मणा द्वौ एव न विराजेते । निरारम्भः गृहस्थः कार्यवान् भिक्षुकः एव ।

भावार्थः संसारेऽस्मिन् द्विविधौ जनौ स्वस्य विपरीतकार्येण न शोभेते । प्रथमतः अकर्मण्यगृहस्थः द्वितीयतः विषयाग्रस्तः सन्यासी ।

**द्वाविमौ पुरुषौ राजन् स्वर्गस्योपरि तिष्ठतः ।**
**प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवान् ।।६३।।**

अन्वयः राजन् ! इमौ द्वौ पुरुषौ स्वर्गस्य उपरि तिष्ठतः । प्रभुः क्षमया युक्तः दरिद्रःच प्रदानवान् ।

भावार्थः हे राजन् ! एतौ द्वौ मानवौ स्वर्गस्य उपरि तिष्ठतः । यः प्रभुः शक्तिशाली अपि क्षमया युक्तः भवति । कथ्यते - ''क्षमा गुणवतां बलम् ।'' यः निर्धनःअपि अन्येभ्यः ददाति । यः प्रभु शक्तिशाली अपि क्षमां ददाति, यः निर्द्धनः अपि दानं करोति । एतौ पूज्यौ ।

**न्यायागतस्य द्रव्यस्य बोद्धव्यौ द्वावतिक्रमौ ।**
**अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनम् ।।६४।।**

अन्वयः न्यायागतस्य द्रव्यस्य द्वौ अवतिक्रमौ बोद्धव्यौ। अपात्रे प्रतिपत्तिः पात्रे अप्रतिपादनं च ।

भावार्थः न्यायमार्गेण यत् धनम् उपार्जितं भवति । तस्य धनस्य द्वयोः दुरुपयोगः स्यात् । अयोग्यपात्राय दानं पुनरपि सत्पात्राय दानं न करणीयम् ।

**द्वावम्भसि निवेष्टव्यौ गले बध्वा दृढां शिलाम् ।**
**धनवन्तमदातारं दरिद्रं चातपस्विनम् ।।६५।।**

अन्वयः अदातारं धनवन्तं अतपस्विनं दरिद्रं द्वौ गले शिलां दृढां वद्ध्वा अम्भसि निवेष्टव्यौ ।

भावार्थः यः जनः धनवान् परन्तु कस्मै किमपि न ददाति पुनः यः दरिद्रः सः कष्टसहिष्णुः न भवति । तादृशस्य जनद्वयस्य गलदेशे दृढ़ां शिलां बध्वा जले निवेशनं करणीयम् ।

**द्वाविमौ पुरुषव्याघ्र सूर्यमण्डलभेदिनौ ।**
**परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ।।६६।।**

Scanned with CamScanner

**अन्वयः** पुरुषव्याघ्र! योगयुक्तः परिब्राड् रणे अभिमुखो हतः च इमौ द्वौ सूर्यमण्डलभेदिनौ ।

**भावार्थः** हे पुरुषश्रेष्ठ धृतराष्ट्र ! संसारेऽस्मिन् यः योगयुक्तः सन्यासी पुनः संग्रामे सम्मुखसमरे युध्यमानः यः मृत्यवरणं करोति । एतादृशौ नरौ सूर्यमण्डलम् अतिक्रम्य स्वर्गलोकं गच्छतः एव ।

**त्रयो न्याया मनुष्याणां श्रूयन्ते भरतर्षभ ।**

**कनीयान्मध्यमः श्रेष्ठ इति वेदविदो विदुः ।।६७।।**

**अन्वयः** भरतर्षभ ! मनुष्याणां त्रयो न्यायाः श्रूयन्ते । वेदविदः कनीयान् मध्यमः श्रेष्ठ इति विदुः ।

**भावार्थः** हे भरतश्रेष्ठ धृतराष्ट्र ! उत्तम - मध्यम - अधमरूपेण त्रयः न्यायानुकुल - उपायाः श्रूयन्ते । एतत् केवलं वेदज्ञाः एव जानन्ति ।

**त्रिविधाः पुरुषा राजन्नुत्तमाधममध्यमाः ।**

**नियोजयेद् यथावत् तांस्त्रिविधेष्वेव कर्मसु ।।६८।।**

**अन्वयः** राजन् ! उत्तम-मध्यम - अधमाः त्रिविधाः पुरुषाः (सन्ति) त्रिविधेषु कर्मसु एव तान् यथाविधि नियोजयेत् ।

**भावार्थः** हे राजन् ! संसारेऽस्मिन् उत्तम-मध्यम-अधम भेदेन त्रिविधाः मानवाः विद्यन्ते । प्रथमतः एतेषां योग्यतां बीक्ष्य यथायोग्यं तेषु तेषु त्रिविधेषु कार्येषु एते नियोजनीयाः ।

**त्रय एवाधना राजन् भार्या दासस्तथा सुतः ।**

**यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ।।६९।।**

**अन्वयः** राजन् ! भार्या दास तथा सुतः एव अधना (सन्ति) । यत् ते यस्य समधिगच्छन्ति तत् तस्य धनम् ।

**भावार्थः** हे राजन् ! संसारेऽस्मिन् भार्या पुत्रः तथा दासः एते त्रयः न धनस्य अधिकारिणः सन्ति । यतः एते यस्य अधिकारे तिष्ठन्ति एतैः उपार्जितं सर्वं धनं तस्य एव भवति ।

**हरणं च परस्वानां परदाराभिमर्शनम् ।**

**सुहृदश्च परित्यागस्त्रयो दोषाः क्षयावहाः ।।७०।।**

**अन्वयः** परस्वानां हरणं परदाराभिमर्शनम् । सुहृदः परित्यागः त्रयो दोषाः क्षयावहाः ।

**भावार्थः** अपरस्य धनानाम् अपहरणम्, अपरस्य पत्न्या साकं संसर्गस्थापनं तथा च मित्राणां परित्यागः एते त्रयः दोषाः मानवस्य आयु - धर्म - यशादीनां क्षयकारिणः भवन्ति ।

NOTES



Scanned with CamScanner

NOTES

**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।**

**कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ।।७१।।**

**अन्वयः** कामः क्रोधस्तथा लोभः च आत्मनः नाशनं नरकस्य इदं त्रिविधं द्वारम् । तस्मात् एतत् त्रयं त्यजेत् ।

**भावार्थः** सांसारिकविषयादिकामना लोभः क्रोधः च एते आत्मनः विनाशकारिणः भवन्ति । एते एव नरकस्य त्रिविधं द्वारम् । अतः सर्वथैव एतत् त्रयं त्यजेत् ।

**वरप्रदानं राज्यं च पुत्रजन्म च भारत ।**

**शत्रोश्च मोक्षणं कृच्छ्रात् त्रीणि चैकं च तत्समम् ।।७२।।**

**अन्वयः** भारत ! वरप्रदानं राज्यं पुत्रजन्म च शात्रोः मोक्षणं कृच्छ्रात् त्रीणि चैकं च तत्समम् ।

**भावार्थः** हे भरतवंशज धृतराष्ट्र ! वरदानप्राप्तिः राज्यप्राप्तिः पुत्रजन्म च एतान् त्रीन् तुलादण्डस्य एकपार्श्वे संस्थाप्य अपरस्मिन् पार्श्वे शत्रुमोक्षणं स्थापयित्वा समानतां पश्यामः चेत् तत्र समानता भविष्यति एव ।

**भक्तं च भजमानं च तवास्मीति च वादिनम् ।**

**त्रीनेतांश्छरणं प्राप्तान् विषमेऽपि न संत्यजेत् ।।७३।।**

**अन्वयः** भक्तं च भजमानं तव अस्मि च इति वादिनं एतान् शरणं प्राप्तान् त्रीन् विषमेऽपि न संत्यजेत् ।

**भावार्थः** भक्तशीलजनं सेवकं अहं भवतः भवामि 'च इति वादिनं शरणागतं जनत्रयं प्राणित्रयं वा विषमे पतितेऽपि न संत्यजेत् । यः शरणागतः भवति । तस्मै शरणं दद्यात् । यतः शरणागतरक्षणं महत् पुण्यं भवति ।

**चत्वारि राज्ञा तु महाबलेन वर्ज्यान्याहुः पण्डितस्तानि विद्यात् ।**

**अल्पप्रज्ञैः सह मन्त्रं न कुर्या- न्न दीर्घसूत्रै रभसैश्चारणैश्च ।।७४।।**

**अन्वयः** अल्पप्रज्ञैः दीर्घसूत्रैः रभसैश्चारणैः च सह मन्त्रं न कुर्यात् । महाबलेन राज्ञा तु चत्वारि वर्ज्यानि आहुः । पण्डितः तानि विद्यात् ।

**भावार्थः** अल्पबुद्धियुक्तजनैः दीर्घसूत्रैः रभसैः चारणैः च सह गुप्तपरामर्शः न करणीयः । महाबलशालिना राज्ञा एतादृशाः चतुर्विधगुणयुक्ताः नराः वर्जनीयाः । विद्वांसः जनाः एतान् सम्यक् जानीयुः । (रभसैः - त्वरितकार्यकारकैः)

Scanned with CamScanner

चत्वारि ते तात गृहे वसन्तु श्रियाभिजुष्टस्य गृहस्थधर्मे ।

वृद्धो ज्ञातिरवसन्नः कुलीनः सखा दरिद्रो भगिनी चानपत्या ।।७५।।

**अन्वयः** तात ! ज्ञातिः वृद्धो अवसन्नः कुलीनः सदा दरिद्रौ अनपत्या भगिनी च । ते चत्वारि श्रियाभिजुष्टस्य गृहस्थधर्मे गृहे वसन्तु ।

**भावार्थः** हे पूज्य! स्वस्य परिवारस्य वृद्धःजनः संकट-पतितः उच्चकुलसम्भूतः मानवः । धनहीनबन्धुः सन्तानहीना भगिनी च एते चत्वारः जनाः लक्ष्मीयुक्तस्य गृहस्थधर्मपरिपालनस्य भवतः गृहे सर्वदा वासं कुर्युः ।

चत्वार्याह महाराज साद्यस्कानि बृहस्पतिः ।

पृच्छते त्रिदशेन्द्राय तानीमानि निबोध मे ।।७६।।

**अन्वयः** महाराज ! पृच्छते त्रिदशेन्द्राय वृहस्पतिः इमानि साद्यस्कानि चत्वारि आह । तानि मे निबोध ।

**भावार्थः** हे महाराज ! इन्द्रेण पृष्टः बृहस्पतिः, सोऽपि येषां चतुर्णां सद्यः फलदातृ णां विषये प्रोक्तवान् । मम समीपात् तदेव अवगच्छतु इति ।

देवतानां च सङ्कल्पमनुभावं च धीमताम् ।

विनयं कृतविद्यानां विनाशं पापकर्मणाम् ।।७७।।

**अन्वयः** देवतानां सङ्कल्पं धीमताम् अनुभावं च कृतविद्यानां विनयं पापकर्मणां विनाशं ।

**भावार्थः** देवाः यत् संकल्पं कुर्वन्ति तत् तत्क्षणादेव सफलं भवति । बुद्धिमतां बुद्धेः प्रभावः तत्क्षणात् समाजे पतति । विदुषां विनयभावः तत्क्षणादेव तं सम्मानपात्रं करोति । पापिजनानां विनाशेन साक्षात् धर्मः विराजमानः भवति ।

चत्वारि कर्माण्यभयङ्कराणि भयं प्रयच्छन्त्ययथाकृतानि ।

मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञः ।।७८।।

**अन्वयः** चत्वारि कर्माणि अभयङ्कराणि अयथा कृतानि भयं प्रयच्छन्ति । मानाग्निहोत्रम् उत मानमौनं मानेन अधीतम् उत मानयज्ञः ।

**भावार्थः** चत्वारि कर्माणि न भयङ्कराणि भवन्ति । परन्तु भयदूरकारिणि भवन्ति । तेषां कर्मणां यथायथं सम्पादनं न भवति चेत् तर्हि तानि भयप्रदानि स्युः । प्रथमतः सादरं अग्निहोत्रं करणीयम् । द्वितीयतः सादरं मौनव्रतपालनं कुर्यात् । तृतीयतः सादरं वेदादीनां सद्ग्रन्थानां पाठः कर्त्तव्यः । चतुर्थतः सादरं यज्ञानुष्ठानं करणीयम् ।

पञ्चाग्नयो मनुष्येण परिचर्याः प्रयत्नतः ।

पिता माताग्निरात्मा च गुरुश्च भरतर्षभ ।।७९।।

NOTES



Scanned with CamScanner

NOTES

**अन्वय:** भरतर्षभ ! मनुष्येण पिता माता अग्नि आत्मा गुरु: च प्रयत्नत: पञ्चाग्नयो परिचर्या: ।

**भावार्थ:** हे भरतश्रेष्ठ ! मनुष्येण पिता माता अग्नि: आत्मा गुरु: च एते यत्नेन पूजनीया: । एते पंचाग्नय: भवन्ति । अग्नि: यथा पूज्यते । एते तथा पूज्या: ।

**पञ्चैव पूजयँल्लोके यश: प्राप्नोति केवलम् ।**

**देवान् पितृ न् मनुष्यांश्च भिक्षूनतिथिपञ्चमान् ।।८०।।**

**अन्वय:** देवान् पितृ न् मनुष्यान् भिक्षून् अतिथिपञ्चमान् लोके पञ्चैव पूजयन् केवलं यश: प्राप्नोति ।

**भावार्थ:** श्लोकेऽस्मिन् कीदृश: नर: विशुद्धं यश: लभते तत् वर्ण्यते । येन देवा: पितृलोका: नरनारायणा: सन्यासिन: अतिथय: च पूज्यन्ते । स: अवश्यं विशुद्धयशलाभं करोति ।

**पञ्च त्वानुगमिष्यन्ति यत्र यत्र गमिष्यसि ।**

**मित्राण्यमित्रा मध्यस्था उपजीव्योपजीविन: ।।८१।।**

**अन्वय:** यत्र यत्र गमिष्यसि । मित्राणि अमित्रा मध्यस्था उपजीव्य उपजीविन: पञ्च त्वाम् अनुगमिष्यन्ति ।

**भावार्थ:** हे राजन् ! त्वं यत्र यत्र स्थानं गमिष्यसि त्वाम् अनु तव मित्राणि रिपव: उदासिन: जना: आश्रयं प्राप्तवन्त: जना: च एते पञ्च अवश्यं गमिष्यन्ति ।

**पञ्चेन्द्रियस्य मर्त्यस्यच्छिद्रं चेदेकमिन्द्रियम् ।**

**ततोऽस्य स्रवति प्रज्ञा दृते: पात्रादिवोदकम् ।।८२।।**

**अन्वय:** पञ्चेन्द्रियस्य मर्त्यस्य चेत् एकम् इन्द्रियं छिद्रं (भवति) । तत: दृते: पात्रात् उदकम् इव अस्य प्रज्ञा स्रवति ।

**भावार्थ:** पञ्चज्ञानेन्द्रिययुक्तस्य पुरुषस्य एकम् इन्द्रियं यदि छिद्रयुक्तं (दोषयुक्तं) भवति । तत: मशकद्रष्टछिद्रयुक्तपात्रात् ज़लनि:सरणम् इव अस्य बुद्धि: वहिर्गच्छति ।

**षड् दोषा: पुरुषेणेह हातव्या भूतिमिच्छता ।**

**निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ।।८३।।**

**अन्वय:** इह भूतिमिच्छता पुरुषेण निद्रा तन्द्रा भयं क्रोध: आलस्यं दीर्घसूत्रता षड् दोषा: हातव्या ।

**भावार्थ:** संसारेऽस्मिन् य: नर: ऐश्वर्य्यं उन्नतिं वा इच्छति स: निद्रां तन्द्रां भयं क्रोधम् आलस्यं दीर्घसूत्रतां च त्यजेत् ।



Scanned with CamScanner

षडिमान् पुरुषो जह्याद् भिन्नां नावमिवार्णवे ।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ।।८४।।
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ।।८५।।

**अन्वय:** अप्रवक्तारम् आचार्यम् अनधीयान् अमृत्विजम् अरक्षितारं राजानं अप्रियवादिनीं भार्य्यां ग्रामकामं गोपालं वनकामं नापितं च अर्णवे भिन्नां नावम् इव इमान् षड् पुरुष: जह्यात् ।

**भावार्थ:** य: आचार्य: उपदेशं न ददाति, य: शिष्य: मन्त्रोच्चारणं न करोति, राज्यरक्षणे असमर्थ: राजा, कटुवचनवदतीं भार्या, ग्रामे स्थातुं इच्छन्तं गोपं, वने स्थातुं इच्छन्तं नापितं सागरे भिन्नं नौका इव इमान् षड् त्यजेत् ।

षडेव तु गुणा: पुंसा न हातव्या: कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृति: ।।८६ ।।

**अन्वय:** पुंसा सत्यं दानम् अनालस्यं अनसूया क्षमा धृति: षडेव गुणा: तु कदाचन न हातव्या: ।

**भावार्थ:** संसारेऽस्मिन् पुरुषेण के षड् गुणा: कदाचिदपि न परित्यक्तव्या तत् वर्ण्यते । सत्यकथनं दानकरणम् आलस्यपरित्याग: असूयभावरहित: क्षमापरायणं धैर्यधारणं च एते षड्गुणा: कदापि पुरुषेण न त्यजनीया: ।

अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन् ।।८७।।

**अन्वय:** राजन् ! अर्थागम: नित्यम् अरोगिता प्रिया भार्या प्रियवादिनी पुत्रो वश्य: विद्या अर्थकरी (एते) षड् जीवलोकस्य सुखानि (भवन्ति) ।

**भावार्थ:** हे राजन् ! संसारेऽस्मिन् सुखाय षड् एव अवलम्बनीयम् । धनस्य आय:, नित्यं रोगशून्यता । पत्नी अनुकुला प्रियभाषिणी, पुत्र: आज्ञाकारी, उपार्जितविद्यया धनागमनम् च एते षड् मर्त्यलोके सर्वदा सुखप्रदायका: भवन्ति ।

षण्णामात्मनि नित्यानामैश्वर्यं योऽधिगच्छति ।
न स पापै: कुतोऽनर्थैर्युज्यते विजितेन्द्रिय: ।।८८।।

**अन्वय:** आत्मनि नित्यानां षण्णां ऐश्वर्य्यं य: अधिगच्छति स: विजितेन्द्रिय: पापै: अनर्थै: कुत: युज्यते ।

NOTES



Scanned with CamScanner

षडिमान् पुरुषो जह्याद् भिन्नां नावमिवार्णवे ।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ।।८४।।
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ।।८५।।

**अन्वय:** अप्रवक्तारम् आचार्यम् अनधीयान् अमृत्विजम् अरक्षितारं राजानं अप्रियवादिनीं भार्य्यां ग्रामकामं गोपालं वनकामं नापितं च अर्णवे भिन्नां नावम् इव इमान् षड् पुरुष: जह्यात् ।

**भावार्थ:** य: आचार्य: उपदेशं न ददाति, य: शिष्य: मन्त्रोच्चारणं न करोति, राज्यरक्षणे असमर्थ: राजा, कटुवचनवदतीं भार्या, ग्रामे स्थातुं इच्छन्तं गोपं, वने स्थातुं इच्छन्तं नापितं सागरे भिन्न नौका इव इमान् षड् त्यजेत् ।

षडेव तु गुणा: पुंसा न हातव्या: कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृति: ।।८६ ।।

**अन्वय:** पुंसा सत्यं दानम् अनालस्यं अनसूया क्षमा धृति: षडेव गुणा: तु कदाचन न हातव्या: ।

**भावार्थ:** संसारेऽस्मिन् पुरुषेण के षड् गुणा: कदाचिदपि न परित्यक्तव्या तत् वर्ण्यते । सत्यकथनं दानकरणम् आलस्यपरित्याग: असूयभावरहित: क्षमापरायणं धैर्यधारणं च एते षड्गुणा: कदापि पुरुषेण न त्यजनीया: ।

अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन् ।।८७।।

**अन्वय:** राजन् ! अर्थागम: नित्यम् अरोगिता प्रिया भार्या प्रियवादिनी पुत्रो वश्य: विद्या अर्थकरी (एते) षड् जीवलोकस्य सुखानि (भवन्ति) ।

**भावार्थ:** हे राजन् ! संसारेऽस्मिन् सुखाय षड् एव अवलम्बनीयम् । धनस्य आय:, नित्यं रोगशून्यता । पत्नी अनुकुला प्रियभाषिणी, पुत्र: आज्ञाकारी, उपार्जितविद्यया धनागमनम् च एते षड् मर्त्यलोके सर्वदा सुखप्रदायका: भवन्ति ।

षण्णामात्मनि नित्यानामैश्वर्यं योऽधिगच्छति ।
न स पापै: कुतोऽनर्थैर्युज्यते विजितेन्द्रिय: ।।८८।।

**अन्वय:** आत्मनि नित्यानां षण्णां ऐश्वर्य्यं य: अधिगच्छति स: विजितेन्द्रिय: पापै: अनर्थै: कुत: युज्यते ।

NOTES



Scanned with CamScanner

NOTES

भावार्थ: मनसि सर्वदा स्थितानां काम-क्रोध - लोभ - मोह-मद - मात्सर्य्यादीनां षड्
रिपूणां वशतां य: अधिगच्छति स: जितेन्द्रिय: भवति । पापे स: लिप्त: न भवति ।
पुनरपि कामादिषड् - इन्द्रियेभ्य: जातेन इन्द्रियेण साकं स: कथं युक्त: स्यात् ।

**षडिमे षट्सु जीवन्ति सप्तमो नोपलभ्यते ।**
**चौरा: प्रमत्ते जीवन्ति व्याधितेषु चिकित्सका: ।।८९।।**
**प्रमदा: कामयानेषु यजमानेषु याजका: ।**
**राजा विवदमानेषु नित्यं मूर्खेषु पण्डिता: ।।९०।।**

अन्वय: इमे षड् षट्सु जीवन्ति, न सप्तम: उपलभ्यते । प्रमत्ते चौरा: व्याधितेषु चिकित्सका: कामयानेषु प्रमदा: । यजमानेषु याजका: विवदमानेषु राजा, मूर्खेषु पण्डिता: नित्यं जीवन्ति ।

भावार्थ: षड् मानवा: षड् प्रकारेषु मानवेषु आश्रयं कृत्वा जीविकानिर्वाहं कुर्वन्ति । तान् विहाय सप्तम: जन: न लभ्यते । चौरा: असावधानजनेषु निर्भरशीला:, वैद्या: रोगिजनेषु निर्भरशीला: कामुकजनेषु कामोन्मत्ता: रमण्य: यजमानेषु पुरोहिता:, विवादमानजनेषु राजान: मूर्खजनेषु विद्वांस: च सदा निर्भरशीला: भवन्ति ।

**षडिमानि विनश्यन्ति मुहूर्तमनवेक्षणात् ।**
**गाव: सेवा कृषिर्भार्या विद्या वृषलसंगति: ।।९१।।**

अन्वय: गाव: सेवा कृषि: भार्या विद्या वृषलसंगति: इमानि षड् मुहूर्त्तम् अवेक्षणात् विनश्यन्ति ।

भावार्थ: प्रतिमुहूर्त्तं रक्षणं विना एकं क्षणम् अवेक्षणं विना वा गौ: सेवा कृषिक्षेत्रं स्त्री विद्या तथाच शूद्रसंपर्क: एतानि षड् विनाशं लभन्ते ।

**षडेते ह्यवमन्यन्ते नित्यं पूर्वोपकारिणम् ।**
**आचार्यं शिक्षिता: शिष्या: कृतदाराश्च मातरम् ।।९२।।**
**नारीं विगतकामास्तु कृतार्थाश्च प्रयोजकम् ।**
**नावं निस्तीर्णकान्तारा आतुराश्च चिकित्सकम् ।।९३।।**

अन्वय: शिक्षिता: शिष्या: आचार्यं कृतदारा: मातरं विगतकामा: नारीं कृतार्था: प्रयोजनं निस्तीर्णकान्तारा नावं आतुरा: चिकित्सकं च नित्यं पूर्वोपकारिणं एते षड् हि अवमन्यन्ते ।

भावार्थ: संसारेऽस्मिन् षड्विधा: जना: षड्जनान् हि अवमन्यन्ते । कार्यकरणसमये आदर: कार्यसमाप्तिपरम् अनादर: । शिष्या: विद्यासमाप्ते: परं आचार्यस्य गुरो: वा आदरं न कुर्वन्ति । विवहात् परं पुत्रा: स्वजनन्या: आदरं न कुर्वन्ति। कामवासनातृप्ता:



Scanned with CamScanner

पुरुषाः स्वपत्नीं विस्मरन्ति । कार्ये कृतकार्याः नराः सहायकं विस्मरन्ति । येन नावा नरः नदीं तरति तं नावमपि सः विस्मरति । रोगमुक्ताः नराः वैद्यमपि विस्मरन्ति, एषः संसारस्य विचित्रनियमः दृश्यते ।

**आरोग्यमानृण्यमविप्रवासः सद्भिर्मनुष्यैः सह सम्प्रयोगः ।**
**स्वप्रत्यया वृत्तिरभीतवासः षड् जीवलोकस्य सुखानि राजन् ।।९४।।**

**अन्वयः** राजन् ! आरोग्यम् आनृण्यम् अविप्रवासः सद्भिः मनुष्यैः सह संप्रयोगः स्वप्रत्यया वृत्तिः अभीतवासः च षड् जीवलोकस्य सुखानि (भवन्ति) ।

**भावार्थः** हे राजन् ! रोगरहितः ऋणमुक्तः अप्रवासी साधुजनसंपर्कः स्ववृत्तिजीविकानिर्वाहः भीतिरहितः च एते जीवलोकस्य कृते सुखाय भवन्ति ।

**ईर्ष्यी घृणी न सन्तुष्टः क्रोधनो नित्यशङ्कितः ।**
**परभाग्योपजीवी च षडेते नित्यदुःखिताः ।।९५।।**

**अन्वयः** ईर्ष्यी घृणी न सन्तुष्टः क्रोधनो नित्यशङ्कितः परभाग्योपजीवी एते षड् नित्यदुःखिताः ।

**भावार्थः** पराय यः ईर्ष्यति, अपरात् यः जुगुप्सते, सर्वदा यः असन्तुष्टः भवति । क्रोधान्वितः जनः, यः नित्यं भयभीतः भवति पुनः अपरस्य भाग्यस्योपरि यः निर्भरशीलः भवति । एते षड् जनाः सर्वदा दुःखमनुभवन्ति ।

**सप्तदोषाः सदा राज्ञा हातव्या व्यसनोदयाः ।**
**प्रायशो यैर्विनश्यन्ति कृतमूला अपीश्वराः ।।९६।।**
**स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पञ्चमम् ।**
**महच्च दण्डपारुष्यमर्थदूषणमेव च ।।९७।।**

**अन्वयः** स्त्रियो अक्षा मृगया पानं वाक्पारुष्यं च पञ्चमं (पुनः) - महत् दण्डपारुष्यम् अर्थदूषणं च व्यसनोदयाः सप्तदोषाः राज्ञा सदा हातव्या । प्रायशः कृतमूला अपीश्वराः यैः विनश्यन्ति ।

**भावार्थः** स्त्रीविषयिका आसक्तिः द्युतक्रीडा मृगया मद्यपानं वाणीकठोरता महत् दण्डप्रदानं धनस्य दुरुपयोगः च इमे सप्त दुःखदायकाः दोषाः राज्ञा परित्यक्तव्याः । प्रायः दृढमूलराजानः एभिः दोषैः विनष्टाः भवन्ति । ये राजानः एतान् दोषान् न परित्यजन्ति ते अवश्यं दुःखं लभन्ते विनाशतां प्राप्स्यन्ति च ।

**अष्टौ पूर्वनिमित्तानि नरस्य विनशिष्यतः ।**
**ब्राह्मणान् प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते ।।९८।।**

NOTES



Scanned with CamScanner

NOTES

ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति ।
रमते निन्दया चैषां प्रशंसां नाभिनन्दति ।।९९।।
नैनान् स्मरति कृत्येषु याचितश्चाभ्यसूयति ।
एतान् दोषान्नरः प्राज्ञो बुध्येद् बुद्ध्वा विसर्जयेत् ।।१००।।

**अन्वय:** विनशिष्यत: नरस्य अष्टौ पूर्व निमितानि (भवन्ति) प्रथमं ब्राह्मणान् द्वेष्टि ब्राह्मणै: विरुध्यते ब्राह्मणस्वानि आदत्तो ब्राह्मणान् जिघांसति निन्दया रमते एषां प्रशंसां न अभिनन्दति कृत्येषु एतान् न स्मरति याचित: आभ्यसूयति च एतान् दोषान् प्राज्ञ: नर: बुद्ध्वा बुध्येत् विसर्जयेत् च ।

**भावार्थ:** विनाशमुखे पतितस्य मानवस्य अष्टौ पूर्वचिह्नानि भवन्ति । प्रथमत: स: ब्राह्मणाय द्रुह्यति । द्वितीयत: ब्राह्मणै: विरोधस्य सम्मुखिन्नं भवति । तृतीयत: ब्राह्मणस्य धनम् अपहरति । चतुर्थत: ब्राह्मणं हन्तुम् इच्छति । पञ्चमत: निन्दितं ब्राह्मणम् अवलोक्य आनन्दम् अनुभवति । षष्ठत: ब्राह्मणस्य प्रशंसां श्रोतुं नेच्छति । सप्तमत: यज्ञादिकार्ये ब्राह्मणं नैव स्मरति । अन्तिमे ब्राह्मण किमपि याचते चेत् तस्य केवलं दोषं पश्यति । एतान् सर्वान् दोषान् बुद्धिमान् मानव: सम्यक् ज्ञात्वा यथाकालं त्यजति ।

**अष्टाविमानि हर्षस्य नवनीतानि भारत ।**
**वर्तमानानि दृश्यन्ते तान्येव स्वसुखान्यपि ।।१०१।।**
**समागमश्च सखिभिर्महांश्चैव धनागम: ।**
**पुत्रेण च परिष्वङ्ग: संनिपातश्च मैथुने ।।१०२।।**
**समये च प्रियालाप: स्वयूथ्येषु समुन्नति: ।**
**अभिप्रेतस्य लाभश्च पूजा च जनसंसदि ।।१०३।।**

**अन्वय:** भारत ! सखिभि: समागम: महान् चैव धनागम: पुत्रेण परिष्वङ्ग: मैथुने संनिपात: समये प्रियालाप: स्वयूथ्येषु समुन्नति: अभिप्रेतस्य लाभस्य जनसंसदि पूजा च इमानि अष्टौ हर्षस्य नवनीतानि वर्त्तमानानि दृश्यन्ते तानि स्वसुखानि अपि ।

**भावार्थ:** हे भरतवंशीय धृतराष्ट्र! मित्रै: सह मेलनम्, प्रचुरधनप्राप्ति:, पुत्रस्यालिङ्गनम्, मैथुने संलग्न:, यथाकालं प्रियवचनप्रकाश: स्ववर्गीयानाम् उन्नति: अभिष्टवस्तुप्राप्ति: जनसमाजे सम्मानप्राप्ति: - इमानि अष्टौ हर्षकारणानि भवन्ति । इमानि लौकिकसुखानां साधनानि सन्ति । मानवजेवने एतानि श्रेष्ठ- सुखानन्दस्य कारणानि भवन्ति एव ।

**अष्टौ गुणा: पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दम: श्रुतं च ।**
**पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ।।१०४।।**

**अन्वय:** प्रज्ञा कौल्यं दम: श्रुतं पराक्रम: अबहुभाषिता यथाशक्ति दानं कृतज्ञता च अष्टौ गुणा: पुरुषं दीपयन्ति ।

**भावार्थः** बुद्धिः कुलीनता इन्द्रियनिग्रहः शास्त्रज्ञानं पराक्रमः मितभाषणं यथाशक्ति दानं परोपकारिणः उपकारस्वीकारः एते अष्टौ गुणाः मानवं ख्यातिसम्मानं कारयन्ति । एतैः गुणैः नरः अवश्यं ख्यातिलाभं करोति । यशस्वी भवति ।

**नवद्वारमिदं वेश्म त्रिस्थूणं पञ्चसाक्षिकम् ।**
**क्षेत्रज्ञाधिष्ठितं विद्वान् यो वेद स परः कविः ।।१०५।।**

**अन्वयः** यः विद्वान् इदं क्षेत्रज्ञाधिष्ठितं वेश्म नवद्वारं त्रिस्थूणं पञ्चसाक्षिकं वेद स परः कविः ।

**भावार्थः** यः विद्वान् नरः शरीरे स्थितं नवद्वारं त्रिस्थूणं पञ्चसाक्षिस्थितस्य आत्मनः निवासस्थलं एतत् शरीररूपिगृहं सम्यक् जानाति सः परमः ज्ञानी भवति ।

श्लोकेऽस्मिन् तात्पर्यं लक्ष्यते यत् - शरीरेऽस्मिन् चक्षुद्वयम्, द्वौ कर्णौ, द्वे नासिके एकं मुखं एकः लिंगः एकं मलद्वारं च सन्ति । सत्त्वः रजः तमो च एते त्रिगुणाः खम्बरूपेण विद्यमानाः । दर्शन-श्रवण-आघ्राण - आस्वादन- स्पर्शज्ञानादीनां साधनाय यथाक्रमेण चक्षु-कर्ण-नासिका जिह्वा चर्म च एते पञ्चज्ञानेन्द्रियाः साक्षिस्वरूपाः वर्त्तन्ते । अतः इदं गृहं क्षत्रज्ञम् । जीवात्मनः वासस्थानम् । अस्य शरीरस्य तत्त्वानि यः जानाति सः महाज्ञानी उच्यते ।

**दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान् ।**
**मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।।१०६।।**
**त्वरमाणश्च लुब्धश्च भीतः कामी च ते दश ।**
**तस्मादेतेषु सर्वेषु न प्रसज्जेत पण्डितः ।।१०७।।**

**अन्वयः** धृतराष्ट्र ! मत्तः प्रमत्तः उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः त्वरमाणः लुब्धः भीतः कामी च दश धर्मं न जानन्ति । तान् निबोध । तस्मात् एतेषु सर्वेषु पण्डितः न प्रसज्जेत ।

**भावार्थः** हे धृतराष्ट्र! निशाद्रव्यसेवकः अर्थात् निशामत्तः असावधानजनः उन्मत्तजनः अर्थात् विकृतमस्तिस्कजनः क्लान्तजनः क्रोधयुक्तनरः क्षुधार्त्तः त्वरितकर्मकर्त्ता लाभग्रस्तजनः भयालुः कामुकः च एते दशविधाः जनाः धर्मं सम्यक् न जानन्ति । भावान् एतान् सम्यक् अवगच्छतु । एतदर्थं विद्वांसः जनाः एतादृशेषु जनेषु आसक्ताः न भवन्ति ।

**अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।**
**पुत्रार्थमसुरेन्द्रेण गीतं चैव सुधन्वना ।।१०८।।**

NOTES



Scanned with CamScanner

NOTES

**अन्वय:** असुरेन्द्रेण सुधन्वना पुत्रार्थं चैव गीतम् । अत्र एव पुरातनम् इमम् इतिहासम् उदाहरन्ति ।

**भावार्थ:** विषयेऽस्मिन् असुरराजा प्रह्लाद: सुधन्वना सह स्वपुत्रं प्रति किमपि उपदेशं प्रदत्तवान् । नीतिज्ञा: जना: एतस्य पुरातन-इतिहासस्य उदाहरणं प्रयच्छन्ति ।

**य: काममन्यू प्रजहाति राजा पात्रे प्रतिष्ठापयते धनं च ।**
**विशेषविच्छ्रुतवान् क्षिप्रकारी तं सर्वलोक: कुरुते प्रमाणम् ।।१०९।।**

**अन्वय:** य: राजा कामम् अन्यू प्रजहाति, पात्रे धनं प्रतिष्ठापयते च । विशेषविच्छ्रुतवान् क्षिप्रकारी । सर्वलोक: तं प्रमाणं कुरुते ।

**भावार्थ:** य: राजा कामं क्रोधं च त्यजति । सत्पात्राय धनं प्रददाति । पुन: विशेषज्ञ: शास्त्रज्ञता सत्वरं कर्त्तव्य-साधनकारी स: भवति । तादृशस्य राज्ञ: व्यवहारं वचनं च सर्वजन: प्रमाणरूपेण स्वीकरोति ।

**जानाति विश्वासयितुं मनुष्यान् विज्ञातदोषेषु दधाति दण्डम् ।**
**जानाति मात्रां च तथा क्षमां च तं तादृशं श्रीर्जुषते समग्रा ।।११०।।**

**अन्वय:** (य: राजा) मनुष्यान् विश्वासयितुं जानाति । विज्ञातदोषेषु दण्डं दधाति । मात्रां तथा क्षमां च जानाति, तादृशं तं समग्रा श्री: जुषते ।

**भावार्थ:** य: राजा नराणां मनसि विश्वासयितुं कौशलं जानाति यस्य मनुष्यस्य अपराध: प्रमाणित: भवति; तस्य कृते दण्डं विदधाति । य: दण्डस्य न्यूनाधिकमात्रां ज्ञातुं शक्नोति । पुनरपि क्षमाया उपयोगं सम्यक् जानाति । स: राजा समग्राया: सम्पत्ते: अधिकारी भवति । श्री: तादृशं राजानं सेवते एव ।

**सुदुर्बलं नावजानाति कञ्चिद् युक्तो रिपुं सेवते बुद्धिपूर्वम् ।**
**न विग्रहं रोचयते बलस्थै: काले च यो विक्रमते स धीर: ।।१११।।**

**अन्वय:** कश्चित् सुदुर्बलं न अवजानाति । युक्तो बुद्धिपूर्वं रिपुं सेवते । बलस्थै: न विग्रहं रोचयते । काले य: विक्रमते । स धीर: ।

**भावार्थ:** य: नर: कस्यापि अतिदुर्बलस्य जनस्य अपमानं करोति । सावधानपूर्वकं शत्रुणा साकं बुद्धिपूर्बकं व्यवहरति । बलवता जनेन साकं युद्धं कर्त्तुं न इच्छति । यथाकाले पराक्रमं प्रदर्शयति । स: पण्डित: धैर्यशील: भवति ।

**प्राप्यापदं न व्यथते कदाचिदुद्योगमन्विच्छति चाप्रमत्त: ।**
**दु:खं च काले सहते महात्मा धुरन्धरस्तस्य ज़िता: सपत्ना:।।११२।।**



Scanned with CamScanner

NOTES

**अन्वय:** (य:) धुरन्धर: आपदं प्राप्य कदाचित् न व्यथते । अप्रमत्त: उद्योगम् अनु इच्छति । महात्मा काले दु:खं च सहते । तस्य सपत्ना: जिता: ।

**भावार्थ:** य: धुरन्धर: (भारवहनाय समर्थ:) महापुरुष: विपदग्रस्तोऽपि कदाचित् दु:खित: न भवति । परन्तु ससावधानम् उद्योगम् आश्रयति । यथाकाले दु:खं सहते । तस्य शत्रु: पराजित: भवति । शत्रो: पराजय: तस्य कृते कष्टकर: न भवति ।

**अनर्थकं विप्रवासं गृहेभ्य: पापै: सन्धिं परदाराभिमर्शम् ।**

**दम्भं स्तैन्यं पैशुनं मद्यपानं न सेवते यश्च सुखी सदैव ।।११३।।**

**अन्वय:** य: गृहेभ्य: अनर्थकं विप्रवासं, पापै: सन्धिं परदाराभिमर्शम्, दम्भं स्तैन्यं पैशुनं मद्यपानं न सेवते (स:) सदैव सुखी ।

**भावार्थ:** य: नर: गृहत्यागपूर्वकं निरर्थके विदेशे न निवसति, पापिजनै: सह न मिलति, परभार्यया सह संपर्कं न स्थापयति, दम्भभावं न प्रकटयति, चौरवृत्तिं न आचरति, इतस्तत: गोपनविषयं न प्रकटयति, मद्यपानं न करोति च, स:सर्वदा सुखी भवति ।

**न संरम्भेणारभते त्रिवर्गमाकारित: शंसति तत्त्वमेव ।**
**न मित्रार्थे रोचयते विवादं नापूजित: कुप्यति चाप्यमूढ: ।।११४।।**
**न योऽभ्यसूयत्यनुकम्पते च न दुर्बल: प्रातिभाव्यं करोति ।**
**नात्याह किञ्चित्क्षमते विवादं सर्वत्र तादृग् लभते प्रशंसाम् ।।११५।।**

**अन्वय:** (य:) संरम्भेण त्रिवर्गं न आरभते । आकारित: तत्त्वमेव संसति, मित्रार्थे विवादं न रोचयते, अमूढ: अपूजित: न कुप्यति, य: न अभिसूयति अनुकम्पते च न दुर्बल: प्रातिभाव्यं करोति न किञ्चित् आह, विवादं क्षमते, तादृग् सर्वत्र प्रशंसां लभते ।

**भावार्थ:** य: नर: क्रोधेन व्यग्रतया च धर्मार्थकामानाम् कार्यं न करोति तस्मिन् पृष्टे यथार्थवचनं प्रकटयति, मित्राय कलहं न स्वीकरोति । आदरं न लभते चेत् न क्रुध्यति, कदापि विवेकहीन: न भवति, अपरस्य दोषं न पश्यति, सर्वान् दयते, असमर्थ: भवति चेत् अपरस्य प्रतिभू: न भवति । अधिकं न कथयति यत् आवश्यकं तत् वदति । विवादं सहते । तादृश: जन: सर्वत्र प्रशंसां लभते ।

**यो नोद्धतं कुरुते जातु वेषं न पौरुषेणापि विकत्थतेऽन्यान् ।**
**न मूर्च्छित: कटुकान्याह किञ्चित् प्रियं सदा तं कुरुते जनो हि ।।११६।।**

**अन्वय:** य: जातु उद्धतं वेषं न कुरुते, पौरुषेण अपि अन्यान् न विकत्थते, मूर्च्छित: किञ्चित् कटुवाक्यानि न आह । जनो हि सदा तं प्रियं कुरुते ।

**भावार्थ:** य: नर: कदापि उद्धतरूपेण स्वस्य वेषं न करोति अर्थात् उद्धण्डजनस्य वेषवत् वेषं न धारयति, अन्येषां जनानां पुरत: स्वस्य पराक्रमस्य श्लाघ्यं न दर्शयति,



Scanned with CamScanner

NOTES

क्रोधेन व्याकुलितोऽपि सन् किमपि कटुवचनं न प्रकाशयति, सः जनः सर्वदैव सर्वेषां प्रियं भवति ।

**न वैरमुद्दीपयति प्रशान्तं न दर्पमारोहति नास्तमेति ।**
**न दुर्गतोऽस्मीति करोत्यकार्यं तमार्यशीलं परमाहुरार्याः ।।११७।।**

**अन्वयः** यः प्रशान्तं वैरं न उद्दीपयति, न दर्पम् आरोहति, न अस्तम् एति । दुर्गतः न अस्मि इति अकार्यं न करोति । तम् आर्यशीलं आर्याः परमम् आहुः ।

**भावार्थः** यः नरःनिर्वापितं शान्तम् शत्रुरूपाग्निं पुनः न प्रज्ज्वालयति, गर्वभावं न प्रकटयति, हीनतां न प्रदर्शयति, 'अहं विपदि पतितोऽस्मि इति चिन्तयन् इति, चिन्तयन् अनुचितं कर्म न करोति । सः सत्स्वभावसम्पन्नः मानवः साधुपुरुषैः सर्वश्रेष्ठ इति कथ्यते ।

**न स्वे सुखे वै कुरुते प्रहर्षं नान्यस्य दुःखे भवति प्रहृष्टः ।**
**दत्त्वा न पश्चात्कुरुतेऽनुतापं स कथ्यते सत्पुरुषार्यशीलः ।।११८।।**

**अन्वयः** (यः) स्वे सुखे प्रहर्षं वै न कुरुते । अन्यस्य दुःखे प्रहृष्टः न भवति । दत्त्वा पश्चात् अनुतापं न कुरुते । सः सत्पुरुषार्यशीलः कथ्यते ।

**भावार्थः** यः नरः आत्मनः सुखे अतीव हर्षान्वितः न भवति, अपरस्य दुःखे प्रीतः न भवति, दानात् परं पश्चात्तापं न करोति । सः सज्जनेषु सदाचारी एव कथ्यते ।

**देशाचारान् समयाञ्ज्ञातिधर्मान् बुभूषते यः स परावरज्ञः ।**
**स यत्र तत्राभिगतः सदैव महाजनस्याधिपत्यं करोति ।।११९।।**

**अन्वयः** (यः) देशाचारान् समयान् जातिधर्मान् बुभूषते स परावरज्ञः । सः यत्र अभिगतः तत्र सदैव महाजनस्य आधिपत्यं करोति ।

**भावार्थः** यः नरः देशस्य आचारव्यवहारं समयम् अवसरं वा जातिधर्मतत्त्वं च सम्यक् ज्ञातुम् इच्छति । सःयत्र गच्छति तत्र विशालजनसमागमे स्वस्य प्रभुत्वं विस्तारयति ।

**दम्भं मोहं मत्सरं पापकृत्यं राजद्विष्टं पैशुनं पूगवैरम् ।**
**मत्तोन्मत्तैर्दुर्जनैश्चापि वादं यः प्रज्ञावान् वर्जयेत् स प्रधानः ।।१२०।।**

**अन्वयः** यः प्रज्ञावान् दम्भं मोहं मत्सरं पापकृत्यं राजद्विष्टं पैशुनं पूगवैरम् अपि च मत्तोन्मत्तैः जनैः वादं वर्जयेत् स प्रधानः ।

**भावार्थः** यः बुद्धिमान् मानवः दम्भं मोहं परश्रीकातरतां पापकार्यं राजद्रोहं पैशुनं च एतैः सह शत्रुतां पुनरपि मत्तैः उन्मत्तैः दुर्जनैः च साकं विवादं वर्जयति । स एव प्रधानः श्रेष्ठः भवति ।



Scanned with CamScanner

**दानं होमं दैवतं मङ्गलानि प्रायश्चित्तान् विविधाँल्लोकवादान् ।**

**एतानि यः कुरुते नैत्यकानि तस्योत्थानं देवता राधयन्ति ।।१२१।।**

**अन्वयः** यः दानं होमं दैवतं मङ्गलानि प्रायश्चित्तान् विविधान् लोकवादान् एतानि नैत्यकानि कुरुते । देवताः तस्य उत्थानं राधयन्ति ।

**भावार्थः** यः नरः दानं होमं देवपूजनं माङ्गलिकं कर्म प्रायश्चित्तं बहुविधं लौकिकाचारं सर्वं नित्यकर्त्तव्यकर्म करोति । देवाः तस्य अभ्युदयस्य सिद्धिं कारयन्ति ।

**समैर्विवाहं कुरुते न हीनैः समैः सख्यं व्यवहारं कथां च ।**

**गुणैर्विशिष्टांश्च पुरो दधाति विपश्चितस्तस्य नयाः सुनीताः ।।१२२।।**

**अन्वयः** (यः) समैः विवाहं सख्यं व्यवहारं कथां च कुरुते । हीनैः समैः (एतत्) न (कुरुते) । पुरो गुणैः विशिष्टान् च दधाति । तस्य विपश्चितः सुनीताः नयाः ।

**भावार्थः** यः जनः निजसमास्कन्दजनैः सह विवाहं मित्रतां व्यवहारं वाक्यालापं च करोति । नीचजनैः सह एतादृशं कर्म न करोति । सर्वदैव गुणाधिकमानवानां पुरतः स्थापयति अर्थात् गुणिजनेभ्यः अग्रासनं प्रददाति । तस्य विदुषः नीतिः श्रेष्ठा नीतिः भवति एव ।

**मितं भुङ्क्ते संविभज्याश्रितेभ्यो मितं स्वपित्यमितं कर्म कृत्वा ।**

**ददात्यमित्रेष्वपि याचितः संस्तमात्मवन्तं प्रजहत्यनर्थाः ।।१२३।।**

**अन्वयः** (यः) आश्रितेभ्यः संविभज्य मितं भुङ्क्ते अमितं कर्म कृत्वा मितं स्वपिति । याचितः अमित्रेषु अपि ददाति । अनर्थाः तम् आत्मवन्तं प्रजहति ।

**भावार्थः** यः जनः प्रथमतः स्वस्य आश्रितेभ्यः जनेभ्यः भोजनद्रव्याणि संविभज्य ददाति, ततः स्वयम् अल्पं खादति । पुनरपि अपरिमित कर्म कृत्वा स्वल्पकालं शेते । रिपवः धनं याचन्ते चेत् तेभ्यः शत्रुभ्यः धनं वितरन्ति । तादृशं मनस्विनं मानव सर्वे अनर्थाः दूरात् परित्यजन्ति ।

**चिकीर्षितं विप्रकृतं च यस्य नान्ये जनाः कर्म जानन्ति किञ्चित् ।**

**मन्त्रे गुप्ते सम्यगनुष्ठिते च नाल्पोऽप्यस्य च्यवते कश्चिदर्थः ।।१२४।।**

**अन्वयः** यस्य चिकीर्षितं विप्रकृतं च किञ्चित् कर्म अन्ये जनाः न जानन्ति । मन्त्रे गुप्ते सम्यक् अनुष्ठिते च । अस्य कश्चित् अर्थः अल्पः अपि न च्यवते ।

**भावार्थः** यस्य जनस्य निज-इच्छानुकूलम् अपरस्य इच्छा विरुद्धं कार्यं अन्ये जनाः किञ्चित् अपि ज्ञातुं न पारयन्ति । पुनः मन्त्रस्य गुप्तकारणात् अभीष्टकार्यस्य सम्पादनं

NOTES



Scanned with CamScanner

NOTES

सम्यक् अनुष्ठितात् च तस्य नरस्य स्वल्पकर्म अपि विकल्पं न स्यात् । तस्य समस्तकर्म उत्तमरूपेण सम्पन्नं भवति एव ।

**यः सर्वभूतप्रशमे निविष्टः सत्यो मृदुर्मानकृच्छुद्धभावः ।**

**अतीव स ज्ञायते ज्ञातिमध्ये महामणिर्जात्य इव प्रसन्नः ।।१२५।।**

**अन्वयः** यः सर्वभूतप्रशमे निविष्टः सत्यो मृदुः मानकृत् शुद्धभावः स महामणिः जात्य ज्ञातिमध्ये अतीव प्रसन्नः ज्ञायते ।

**भावार्थः** यः नरः सर्वेभ्यः प्राणिभ्यः शान्तिप्रदाने तत्परः सत्यवादी कोमलहृदयवान् अपरस्य समादरकारी पवित्रविचारवान् च भवति, सः उत्तम खनिजातमणि तेजवत् स्व ज्ञातिमध्ये अतीव प्रसिद्धिलाभः भवति । सः ज्ञातिमध्ये रत्न इव आदरं लभते ।

**य आत्मनापत्रपते भृशं नरः स सर्वलोकस्य गुरुर्भवत्युत ।**

**अनन्ततेजाः सुमनाः समाहितः स तेजसा सूर्य इवावभासते ।।१२६।।**

**अन्वयः** यः नरः भृशं आत्मनापत्रपते । स उत सर्वलोकस्य गुरुः भवति । अनन्ततेजाः सुमनाः समाहितः स तेजसा सूर्य इव अवभासते ।

**भावार्थः** यः नरः स्वयम् अतीव लज्जाशीलः । सः सर्वेषु जनेषु श्रेष्ठः भवति । पुनरपि असीमः तेजस्वी निर्मलहृदयवान् एकाग्रतायुक्तः च भवति सः स्वतेजसा सूर्यवत् शोभते ।

**वने जाताः शापदग्धस्य राज्ञः पाण्डोः पुत्राः पञ्च पञ्चेन्द्रकल्पाः ।**

**त्वयैव बाला वर्धिताः शिक्षिताश्च तवादेशं पालयन्त्याम्बिकेय ।।१२७।।**

**अन्वयः** शापदग्धस्य राज्ञः पाण्डोः पञ्चेन्द्रकल्पाः पञ्चपुत्राः वने जाताः । हे अम्बिकेय! त्वया एव बालाः वर्धिताः शिक्षिताः च । (ते) तवादेशं पालयन्ति ।

**भावार्थः** श्लोकेऽस्मिन् विदुरः धृतराष्ट्रं बहुनीतिवाणीं श्रावयित्वा पाण्डवानां कृते तस्य किं कर्त्तव्यं स्यात् तत् सूचयति । हे अम्बिकानन्दन! मृगरूपधारिणः किन्दमऋषेः अभिशापेन दग्धीभूतस्य राज्ञः पण्डोः वने पञ्चपुत्राः जाताः । ते पञ्च इन्द्रतुल्याः पराक्रमशालिनः, भवान् तान् बाल्यावस्थायां लालनपालनं कृत्वा क्रमेण बर्द्धयन्ति स्म । तेन शिक्षापि प्रदत्ता । विशेषतः ते भवतः आज्ञां पालयन्ति एव ।

**प्रदायैषामुचितं तात राज्यं सुखी पुत्रैः सहितो मोदमानः ।**

**न देवानां नापि च मानुषाणां भविष्यसि त्वं तर्कणीयो नरेन्द्र ।।१२८।।**

**अन्वयः** तातः ! एषाम् उचितं राज्यं प्रदाय पुत्रैः सहितः मोदमानः सुखी (भव) । नरेन्द्र! देवानां मनुष्याणां च न त्वं तर्कणीयः भविष्यसि ।



Scanned with CamScanner

भावार्थ: हे अग्रपूज्य अग्रज! तेभ्य: तेषां न्यायोचितं राज्यभागं प्रदाय भवान् स्वपुत्रै: साकं आनन्दित: सन् सुखेन कालातिपातं करोतु । हे राजन् ! एतेन भवान् देवै: नरै: वा आलोचनीय: न भविष्यति । स्वर्गे मर्त्ते वा कोऽपि भवन्तं कटुसमालोचनां न करिष्यति ।

NOTES

## प्रश्ना: समाधेया:

१. पण्डितानां लक्षणविषये विदुरेण किं प्रोक्तम् ?

२. मूर्खाणां लक्षणविषये विदुरेण किमुपस्थापितम् ?

३. क्षमाया: महत्त्वप्रसङ्गे विदुरेण किमुक्तम् ?

४. धृतराष्ट्रस्य अशान्ते: कारणं किम् ?

५. विदुरनीते: प्रथमोऽध्यायस्य सारं लिखत ।

६. क: सत्पुरुषार्थशील: कथ्यते ?

७. क: सदैव सुखी ?

८. के अष्टौ गुणा: पुरुषं दीपयन्ति ?

९. के षड् नित्यदु:खिता: भवन्ति ?

१०. कानि षड् जीवलोकस्य सुखानि भवन्ति ?

११. के षड् हि अवमन्यन्ते ?

१२. के षड् केषु षट्सु जीवन्ति ?

१३. पुंसा के षड्गुणा: न हातव्या: ?

१४. के पञ्चाग्नय:मनुष्येण परिचर्या: ?

१५. किमर्थं मनुष्याणां चिन्ता वर्द्धते ?

१६. बुद्धे: प्रवलता कीदृशी तस्या: सदुपयोगं वर्णयत ।

१७. केषां शारणागतानां त्याग: न कर्त्तव्य: ?

१८. राज्ञा कीदृशा: पुरुषा: परित्यज्या: ?

१९. राजा कीदृशान् दोषान् जनान् च परित्यजेत् ?

२०. केषां षण्णां मनुष्याणां परस्परं जीविकानिर्वाहं कुर्वन्ति ?

२१. कानि षट् अनवेक्षणात् विनश्यन्ति ?



Scanned with CamScanner

NOTES

२२. राज्ञां के सप्तदोषा: हातव्या: ?

२३. लौकिकसुखसाधनस्य कानि साधनानि ?

२४. के गुणा: पुरुषं दापयन्ति ?

२५. के दश धर्मं न जानन्ति ?

२६. राजलक्ष्मी: कीदृशस्य राज्ञ: सेवायां नियोजिता भवति ?

२७. भीरुपुरुषस्य लक्षणं किम् ?

२८. कस्य सर्वत्र प्रशंसा भवति ?

२९. आर्या: कं सर्वश्रेष्ठं मन्यन्ते ?

३०. कीदृश: पुरुष: प्रधान: स्यात् ?

३१. देवता: कस्य उत्थानं साधयन्ति ?

३२. क: सूर्यस्य तुल्य: अवभासते ?

३३. किमर्थं पाण्डवेभ्य: राज्यभाग: प्रदेय: इति विदुरेण प्रोक्तम् ?

❖❖❖



Scanned with CamScanner

# UNIT - II

## (अनुविभाग: द्वितीय:)

NOTES

# चाणक्य-नीति:

### प्रथमोऽध्याय:

प्रणम्य शिरसा विष्णुं त्रैलोक्याधिपतिं प्रभुम् ।

नानाशास्त्रोद्ध तं वक्षे राजनीतिसमुच्चयम् ।१।

**अन्वय:** त्रैलोक्याधिपतिं प्रभुं विष्णुं शिरसा प्रणम्य नानाशास्त्रोद्धृतं राजनीतिसमुच्चयं वक्षे ।

**भावार्थ:** श्लोकेंऽस्मिन् चाणक्य: कथयति - य: स्वर्ग-मर्त्य-पातालस्य अधिपति: विष्णु:; तं भगवन्तं शिरसा प्रणमामि । प्रणामात् परं नानाशास्त्रेभ्य: उद्धृतं राजनीतिसमुच्चयं कथयामि । तेन चाणक्येन अत्र राजनीतिसम्वन्धीया: विचारा: प्रतिपादिता: । तस्मिन् समये कार्याणां निर्विघ्नसमाप्तये तेन कथितम् अहं कौटिल्य: चाणक्य: सर्वप्रथमं त्रिलोकनाथं भगवन्तं विष्णुं शिरसा नमस्करोमि । विभिन्नेषु शास्त्रेषु राजनीतिविषया: वर्णिता: सन्ति । तेषु सारतत्त्वयुक्ता: राजनीतिमुख्यविषया: अत्र आलोचिता: ।

श्लोकेऽस्मिन् निर्विघ्नार्थं ईश्वरप्रार्थना चाणक्येन कृता ।

अधीत्येदं यथाशास्त्रं नरो जानाति सत्तम: ।

धर्मोपदेशविख्यातं कार्याऽकार्य शुभाशुभम् ।२।

**अन्वय :** (य:) नर: इदं यथा शास्त्रं धर्मोपदेशविख्यातं कार्याऽकार्यशुभाशुभम् अधीत्य जानाति सत्तम: (भवति)।

**भावार्थ:** श्लोकेऽस्मिन् श्रेष्ठमानवस्य लक्षणं प्रोक्तम् । य: नर: धर्मोपदेशयुक्तं कार्याऽकार्यविषयप्रकटितं शुभाशुभप्रसङ्गसमन्वितं नीतिशास्त्रम् अधीत्य तदर्थम् अवगम्य यथार्थं कार्यं सम्पादयति स एव श्रेष्ठ: मानव: भवति ।

नीतिशास्त्रेऽस्मिन् किं करणीयम् किम् अकरणीयं किं शुभं किम् अशुभं च तत् वर्ण्णते । एतत् सम्यक् पठित्वा जीवनायने एतेषां प्रयोगं य: कर्त्तुं शक्नोति स एव मानव: श्रेष्ठ: भवति ।



Scanned with CamScanner

NOTES

आचार्यविष्णुगुप्त - चाणक्यस्य वक्तव्यं भवति यत् ज्ञानी जनः नीतिशास्त्रं पठित्वा एतत् अवश्यं ज्ञातुं पारयति यत् तेन किं करणीयं किं च परित्याज्यम् । कर्म प्रति जनस्य एतादृशी ज्ञानदृष्टिः धर्मोपदेशस्य प्रमुखावश्यकी । सर्वे जनाः गुणेन स्वभावेन वा न समानाः । सर्वेषां धर्मः न समानः । यथा अग्नेः धर्मः ज्वलनं परं जलस्य धर्मः निर्वापनम् । तथैव राजनीतौ कतिपयानि कर्माणि धर्मानुकूलानि पुनः कतिपयानि कर्माणि धर्माणां विरुद्धमाचरन्ति ।

श्रीमद्भगवद्गीतायां श्रीकृष्णः युद्धक्षेत्रे अर्जुनं क्षात्रधर्मविषये सचेतनं कारितवान् । रणभूमौ शत्रुसम्मुखे पलायनं न क्षात्रधर्मः । रणाङ्गनात् पलायनं भीरुता एव । एतदर्थं आचार्यचाणक्येन धर्मः ज्ञानसम्मतः इति प्रोक्तम् ।

**तदहं संप्रवक्ष्यामि लोकानां हितकाम्यया ।**

**येन विज्ञातमात्रेण सर्वज्ञत्वं प्रपद्यते ।३।**

**अन्वय** : अहं लोकानां हितकाम्यया तत् संप्रवक्ष्यामि । येन विज्ञातमात्रेण सर्वज्ञत्वं प्रपद्यते ।

**भावार्थः** श्लोकेऽस्मिन् चाणक्यः कथयति - अहं जनानां हिताय राजनीतेः तत् रहस्यमयं विषयम् उपस्थापयामि । यत् ज्ञात्वा व्यक्तिः आत्मानं सर्वज्ञः इति चिन्तयति ।

अत्र ज्ञायते यत् राजनीतिसिद्धान्तः न तथा महत्त्वपूर्णः तस्य परिणामः प्रभावः च सम्यक् विचारणीयः । एतदर्थं नीतिशास्त्रज्ञः राजनीतौ पण्डितः स्यात् । पुनरपि न केवलम् आत्मकल्याणाय अपितु जगतः कल्याणाय राजनीतिः ज्ञातव्या ।

**मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेन च ।**

**दुःखितैः संप्रयोगेण पण्डितोऽप्यवसीदति ।४।**

**अन्वय** : मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेन दुःखितैः संप्रयोगेण च पण्डितोऽपि अवसीदति ।

**भावार्थः** मूर्खशिष्यं यः पाठयति, तस्मै उपदेशं प्रददाति । पुनः दुष्टभार्यायाः भरणपोषणं करोति । दुःखितैः जनैः साकं निवसति सः विद्वान् अपि दुःखं लभते । अतः दुष्टशिष्याय उपदेशः न प्रदातव्यः । दुष्टभार्यया सह संपर्कः न स्थापनीयः तस्याः समीपात् दूरे स्थातव्यम् । दुःखिजनसंसर्गः त्यक्तव्यः ।

एवं विचारणीयं यत् पण्डितः यस्मै शिष्याय विद्याशिक्षां प्रददाति सः शिष्यः तस्याः विद्यायाः पुनः गुरोः मर्यादां च जातीयात् । येन शिक्षादानं फलप्रदं स्यात् । यस्य सामान्यतमं ज्ञानं न विद्यते तं कोऽपि बोधयितुं न शक्नुयात् । यः दुष्टस्त्रिया सह



Scanned with CamScanner

संपर्कं स्थापयति तस्या: भरणपोषणं तस्य कृते दु:खाय भवति । या नारी स्वस्या: स्वामिनं प्रति विश्वासनीया न भवति, सा कथं अपरस्य कृते विश्वासयोग्या स्यात् ? य: दु:खी जन: आत्मबलहीन: भवति निराश: भवति च तं कोवा उद्धरेत् ? अस्मिन् प्रसङ्गे पञ्चतन्त्रे कथ्यते-

माता यस्य गृहे नास्ति भार्या चाप्रियवादिनी

अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ।।

अर्थात् यस्य गृहे माता नास्ति स्त्री व्यभिचारिणी च भवति । तस्मात् गृहात् विनिर्गत्य वनं गन्तव्यम्। यत: अस्मिन् प्रसङ्गे गृहारण्ययो: मध्ये न कश्चित् प्रभेद: ।

पुनरपि दु:खिजनस्य लालनपालनं सन्तापकारकम् । वैद्य: परदु:खेन तप्यते । स: अपरस्य दु:खेन दु:खी भवति । परन्तु दु:खिजनै: सह समव्यवहारेण पण्डितोऽपि दु:खी भवति ।

**दुष्टाभार्या शठं मित्रं भृत्यश्चोत्तरदायक: ।**

**ससर्पे च गृहे वासो मृत्युरेव न संशय: ।५।**

**अन्वय :** दुष्टाभार्य्या शठं मित्रं भृत्य: उत्तरदायक: च ससर्पे च गृहे वास: मृत्यु: एव (भविष्यति) (अत्र) न संशय: ।

**भावार्थ:** श्लोकेऽस्मिन् मृत्यो: कारणात् दूरे स्थातव्यम् इति प्रतिपादितम् ।

दुष्टा पत्नी, शठं मित्रं, प्रत्युत्तरप्रदानकारी सेवक: तथा च सर्पपूर्णं गृहम् - एते चत्वार: मृत्यो: कारणभूता: भवन्ति । नास्ति अत्र कोऽपि सन्देह: ।

प्रसङ्गेऽस्मिन् चाणक्य: कथयति - एते चत्वार: जनाय जीवन्तकाले मृत्युतुल्या: भवेयु: । अत: दुश्चरित्रां पत्नीं दुष्टं मित्रं सर्वदैव प्रतिवादस्वभावयुक्तं भृत्यं च त्यजेत् । अत: गृहस्थित: सर्प: कथञ्चित् मारणीय: । नोचेत् सर्वदा जन: विपद्ग्रस्त: स्यात् । सद्गृहस्थस्य कृते दुष्टा पत्नी सदा मृत्युसमाना भवति सा सर्वदा दु:खस्य कारणभूता भवति । अत: तादृशी पत्नी परिहर्त्तव्या ।

मित्रं वन्धो: हितं साधयति । परन्तु शठं मित्रं अहितं करोति । धूर्त्तरूपेण अमङ्गलं करोति । तादृश: धूर्त्त: जन: अवश्यं परिहारयोग्य: ।

सेवक: गृहस्य गुप्तभेदं जानीयात् । स: गृहस्वामिन: आज्ञां न पालयति चेत् स: विपद: कारणं स्यात् । अत: तस्मिन् तीक्ष्णा दृष्टि: दातव्या ।

अत: पत्नी आज्ञाकारिणी भवितव्या, सखा विश्वसनीय: स्यात् । भृत्य: स्वामिनं प्रति श्रद्धावान् स्यात्, एतेषां विपरीतक्रियया केवलं दु:खंकष्टं च लभते ।

NOTES



Scanned with CamScanner

NOTES

**आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि**

**आत्मानं सततं रक्षेद् दारैरपि धनैरपि ।६।**

**अन्वय** : आपदार्थे धनं रक्षेत् । धनैः अपि दारान् रक्षेत् । दारैः अपि धनैः अपि आत्मानं सततं रक्षेत् ।

**भावार्थः** श्लोकेऽस्मिन् विपदि किं करणीयं तत् आलोच्यते । संकटसमये दुःखकाले च धनेन नितरां प्रयोजनं भवति । अतः धनसञ्चयस्य आवश्यकता अस्ति । काले धनैः पत्न्याः सुरक्षा करणीया । परन्तु यदा आत्मनि विपद् समायाति, तदा धनात् पत्न्याः वा आत्मरक्षा करणीया ।

विपदि दुःखसमये च मानवस्य धनेन प्रयोजनं भवति । अतः धनसुरक्षार्थं मानवः यत्नशीलः भवेत् । धनापेक्षया पत्नी अतीव साहाय्यकारिणी । अतः धनव्ययेनापि तस्याः सुरक्षा प्रथमतः करणीया । परन्तु एतयोः आत्मरक्षा अवश्यं कर्त्तव्या । आत्मरक्षा सर्वरक्षा भवति इति सर्वैः ज्ञातव्यम् ।

आचार्येण चाणक्येन धनस्य महत्त्वन्न्यूनं न कृतम् । येन मानवस्य नानाविधकार्यः साधितः भवति । परन्तु पत्न्याः सम्मानप्रश्नः भवति चेत् तत्र धनस्य आकलनम् अनावश्यकम् । परिवारस्य सम्मान - मर्यादायाः कृते व्यक्तिगतमर्यादा निर्भरशीला भवति । परन्तु सदा मानवः स्वयं विपदग्रस्तः भवति । सदा धनं पत्नीं विहाय आत्मरक्षा करणीया ।

**आपदर्थे धनं रक्षेत् श्रीमतश्च किमापदः ।**

**कदाचिच्चलिता लक्ष्मीः सञ्चिताऽपि विनश्यति ।७।**

**अन्वय** : आपदर्थे धनं रक्षेत् । श्रीमतः (समीपं) किं आपदः (आयाति)? लक्ष्मीः कदा विचलिता (स्यात्) । सञ्चिता अपि विनश्यति ।

**भावार्थः** विपदः दूरीकरणार्थं धनसञ्चयं नितराम् आवश्यकम् । विपदकाले धनेन प्रयोजनं स्यात् । श्रीयुक्तनरस्य समीपं विपद् आगच्छेत् किम् । आम्, कदाचित् दैवयोगेन चञ्चला लक्ष्मीः अन्तर्हिता भवेत् । तदा केवलं सञ्चितधनस्य विनाशः स्यात् ।

दुर्दिने जनस्य सर्वं विनष्टं भवेत् । लक्ष्मीः स्वभावेन चञ्चला । तस्यां विश्वासः न कर्त्तव्यः । कदाचित् सा अन्तर्हिता स्यात् । अतः धनी कदाचित् एवं न चिन्तयेत् यत् सः कदापि विपदि न पतेत् । अतः दुःखपूर्णसमयस्य कृते तेन अवश्यं धनं सञ्चनीयम् ।



Scanned with CamScanner

अत्र विचारणीयं यत् अनुचितकार्ये धनस्य विनियोग: न करणीय: । धने विनाशे सति विपद् कदाचित् आगच्छेत् । परं सत्कार्ये यत् धनं व्ययितं तेन जन: सम्मानित: प्रतिष्ठित: आदरणीय: च भवति । यत: धनं विनाशशीलम् । धनार्थं गर्व: न करणीय: ।

एतत् स्मरणीयं यत् यस्य श्रम: बुद्धि: कार्यक्षमता च सन्ति, तस्य समीपे लक्ष्मी: स्थिरा: स्यात् ।

**यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवा: ।**

**न च विद्यागमोऽप्यस्ति वासं तत्र न कारयेत् ।८।**

**अन्वय** : यस्मिन् देशे सम्मानो न वृत्ति: न बान्धवा: न विद्यागम: अपि न तत्र वासं न कारयेत् ।

**भावार्थ:** श्लोकेऽस्मिन् कस्मिन् स्थाने न वस्तव्यं तत् विषये वर्ण्यते ।

यस्मिन् देशे सम्मान: नास्ति, यत्र जीविकार्जनाय वृत्ति: न उपलभ्यते, यत्र बान्धवा: न तिष्ठन्ति, यत्र विद्याध्ययनं कर्त्तुं न शक्यते, तेषु स्थानेषु एव न वस्तव्यम् ।

निवासाय मानवेन समुचितस्थानं निर्धारणीयम् । यत्र सम्मानबोध: नास्ति तत्र कदापि न स्थातव्यम् । अर्थं विना जीवनं कष्टकरम् । अत: यत्र धनोपार्जनाय कापि वृत्ति: नोपलब्धा तत्र न वस्तव्यम् । मानव: सामाजिक- प्राणी अत: परिवारेण बन्धुना सह स्थातुं तस्य आग्रह: स्यात् । यत्र संपर्कीया: न सन्ति तत्र कथं वा वस्तव्यम् । विद्याहीन: जन: पशुसमान: । यत्र विद्याध्ययनस्य सौविध्यं नास्ति तत्र न वस्तव्यम् । यत्र सर्वविधं सौविध्यं तिष्ठति तत्रैव वस्तव्यम् ।

**धनिक: श्रोत्रियो राजा नदी वैद्यस्तु पञ्चम: ।**

**पञ्च यत्र न विद्यन्ते न तत्र दिवसं वसेत् ।९।**

**अन्वय** : धनिक: श्रोत्रिय: राजा नदी वैद्य: तु पञ्चम: । यत्र पञ्च न विद्यन्ते तत्र दिवसं न वसेत् ।

**भावार्थ:** यस्मिन् देशे धनिक:, वेदवित् विद्वान्, सुशासक:, राजा, नदी, वैद्य: च न सन्ति तत्र एकं दिनमपि न स्थातव्यम् ।

धनिकस्य उपस्थिति: यत्र नास्ति तत्र आवश्यकसमये धनं नैव हस्तगतं स्यात् । अत: तत्र न स्थातव्यम् । विद्वांस: सत्पथप्रदर्शका: भवन्ति; अत: यत्र वेदज्ञा: विद्वांस: न तिष्ठन्ति तत्र जना: बुद्धिहीना: भवन्ति । अत: तत्र क्षणमपि न अवसन्नम् । शासकं विना राज्ये अराजकता बर्द्धते । अत: तत्र वास: न कार्य: ।

NOTES



Scanned with CamScanner

NOTES

कथ्यते शरीरं व्याधिमन्दिरम् । शरीरम् अस्ति चेत् रोगाः सन्ति । पुनः वैद्यं विना रोगग्रस्तजनाः रोगमुक्ताः न भवन्ति । अतः वैद्येन किम् प्रयोजनम् ? अयं देशः नदीमातृका । नद्याः आवश्यकता सर्वदैव मानवजीवने आयाति । यत्र नदी न प्रवहति तत्र न वस्तव्यम् ।

यत्र जीवनधारणस्य सौविध्यं विद्यते सर्वं सहजेन उपलब्धं भवति तत्रैव वस्तव्यम् ।

**लोकयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता ।**

**पञ्च यत्र न विद्यन्ते न कुर्यात् तत्र संस्थितिम् ।१०।**

**अन्वय :** लोकयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता यत्र (एतत्) पञ्च न विद्यन्ते तत्र संस्थितिं न कुर्यात् ।

**भावार्थः** आचार्यः चाणक्यः कथयति - यत्र जीवनधारणार्थं कर्मसंस्थानं न लभ्यते, जनेषु भयं लज्जा उदारता दानार्थम् इच्छाशक्तिः च न विद्यन्ते, तत्र स्थानेषु निवासार्थं नरः न इच्छेत् ।

विशेषतः जीवनधारणाय यत्र कापि आजीविका स्थली वाणिज्यस्थली वा न स्यात् । यत्र जनाः लोकलज्जायाः न बिभ्यति, यत्र परोपकारी जनः दुर्लभः, त्यागभावना न उपलभ्यते, यत्र जनाः समाजात् नियमात् वा न बिभ्यति, यत्र जनाः दातुं नेच्छन्ति, तत्र जनः सम्मानं न लभते । तत्र तस्य अवस्थानमपि कष्टप्रदं भवति । अतः स्वनिवासार्थं जनः स्वं सर्वसाधनसम्पन्नं व्यावहारिकस्थानं निरूपयेत् । येन सः सुस्थवातावरणे सपरिवारः सुरक्षितः सन् सुखेन तिष्ठेत् । यतः यत्र जनेषु ईश्वर-लोक-परलोकादिषु आस्था विश्वासः च स्यात्, तत्र नूनं सामाजिकादरभावना स्यात्, अकरणीयकार्यसम्पादने भयं संकोचः लज्जा च भवेत् । जनेषु परस्परं त्यागभावना तिष्ठेत् । तेषु जनेषु स्वार्थान्धः सन् नियमभङ्गभावना प्रवृतिः वा न स्यात् । सः अवश्यं अपरस्य हितार्थं दानशीलस्वभावः भवेत् ।

**जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे ।**

**मित्रं चापत्तिकालेषु भार्यां च विभवक्षये ।११।**

**अन्वय :** प्रेषणे भृत्यान् जानीयात् । व्यसनागमे बान्धवान् (जानीयात्) आपत्तिकालेषु मित्रं विभवक्षये भार्यां च (जानीयात्) ।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः यथाकालं संपर्कीयाणां परीक्षां कुर्य्यात् इति वर्णयति । महत्त्वपूर्णकार्यकरणाय यदा सेवकः प्रेषितः तदा सः परीक्षणीयः । दुःखसमये बान्धवाः परीक्षणीयाः । विपद्काले मित्रं सम्यक् जानीयात् । निर्धनकाले पत्नीं जानीयात् ।



Scanned with CamScanner

NOTES

कदाचित् विशेषकारणवशत: कुत्रापि गुरुत्वपूर्णकार्यार्थं शिष्य: प्रेषणीय: चेत् तदा तस्य सत्यवादितां कर्त्तव्यपरायणतां विश्वसनीयतां च सम्यक् ज्ञातुं शक्यते ।

जन: यदा रोगग्रस्त: विपदग्रस्त: दु:खित: वा भवति तदा अन्ये जना: तस्य समीपं नागच्छन्ति, बान्धवा: तस्य समीपं श्रद्धया नागच्छन्ति । परन्तु य: परमसखा स: अवश्यं समायाति । अत: दु:खसमये य: उपस्थित: भवति स एव परमबन्धु: । विपद्काले प्रायत: सामान्यजना: सहयोगार्थं नायान्ति । परन्तु य: परमसखा स: एव आयाति । सम्पदकाले सर्वे सखाय: भवन्ति विपद्काले तेषां दर्शनं दुर्लभं भवति । पुनरपि स: अवश्यं परमं मित्रं य: विभवक्षयसमये उपस्थित: सन् सर्वविधसाहाय्यं करोति । धनहीनकाले उत्तमा पत्नी स्वामिना साकं सर्वविधसहयोगं करोति । समीपे तिष्ठति, दु:खं न प्रकटयति, धनं विनापि सर्वकर्म सम्पादयति ।

**आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे ।**

**राजद्वारे श्मशाने च यस्तिष्ठति स बान्धव: ।१२।**

**अन्वय :** आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे राजद्वारे श्मशाने च य: तिष्ठति स बान्धव: (भवति) ।

**भावार्थ:** श्लोकेऽस्मिन् वास्तवत: क: वान्धव: तत्विषये चाणक्येन प्रोक्तम् । रोगातुरसमये दु:खकाले दुर्भिक्षे शत्रुकृतविपदि राजद्वारे श्मशाने य: तिष्ठति स एव प्रकृतबन्धु: ।

शरीरं व्याधिमन्दिरम् । शरीरे रोगा: जायन्ते । रोगाणां निवारणार्थं प्रशमनार्थं च औषधसेवनं करणीयम् । प्रकृत: बन्धु: रोगसमये मित्रसमीपम् आयाति परामर्शं च प्रददाति । परन्तु स्वार्थपर: बन्धु: दूरे तिष्ठति ।

चक्रवत् परिवर्त्तन्ते सुखानि च दु:खानि च । प्राय: सुखकाले सर्वे सखाय: भवन्ति दु:खकाले समीपं नागच्छन्ति । परन्तु य: उत्तम: बन्धु: स: अवश्यं दु:खसमये बन्धो: समीपं समायाति । बन्धो: दु:खेन दु:खित: भवति समवेदनां च ज्ञापयति ।

भिक्षाया: अभाव: दुर्भिक्षम् । यदा भिक्षा दुर्लभा भवति तदा जन: अतीव दु:खेन कालं यापयति । प्रकृत: बन्धु: दुर्भिक्षकाले तस्य समीपम् आयाति यथाशक्ति सहायतामपि करोति ।

शत्रुकृतविपद्काले सामान्यजना: समीपं नागच्छन्ति, परं प्रकृत: बन्धु: न केवलम् आगच्छति अपितु विपद: त्रातुं प्रयत्नं करोति ।

यदा राजद्वारि बन्धु: तिष्ठति राजदण्डेन दण्डित: भवति तदा प्रकृत: बन्धु: तत्र गत्वा मित्रं रक्षति ।



Scanned with CamScanner

NOTES

एषः संसारः मरणशीलः । जातस्य हि ध्रुवो मृत्युः । तथापि आत्मीयजनस्य मरणं दुःखं जनयति । तदा प्रकृतः बन्धुः गच्छति समवेदनां प्रकटयति श्मशानं प्रति गत्वा शवसंस्कारकर्मणि साहाय्यं करोति च ।

अतः एतेषु कार्येषु प्रकृतमित्रस्य परिचयः ज्ञातव्यः ।

**यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते ।**

**ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ।१३।**

**अन्वय** : यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते । तस्य ध्रुवाणि नश्यन्ति । अध्रुवं हि नष्टम् एव ।

**भावार्थः** श्लोकेऽस्मिन् चाणक्येन कथितम् - यः निश्चितं परित्यज्य अनिश्चितं स्वीकरोति आश्रयति वा तस्य निश्चितकर्म विनश्यति । मानवस्य कृते सर्वफलं न सुलभम् । यत् द्रव्यं फलं वा नूनं लभते तत् न परित्यक्तव्यम् । येन कर्मणा फलं सुनिश्चितं लभ्यते प्रथमतः तत् कर्म सम्पादनीयम् । परं कदाचित् जनः निश्चितं कर्म त्यक्त्वा अनिश्चितकर्मकरणाय आग्रहं प्रकटयति । तेन निश्चितकर्मफलं तस्य हस्तात् दूरं गच्छति । अनिश्चितकार्ये विश्वसिति । अतः सर्वदा विचारणीयं यत् किं कर्म करणीयम् ? कदा करणीयम्? केन करणीयम्? कथं करणीयम् ? पुनरपि किं कर्म निश्चितं किं कर्म अनिश्चितम् ? सर्वेषु विषयेषु सम्यक् विचार्य कर्म करणीयम् । यतः समये गते किमु सावधानम् ? कदाचित् मानवः लोभासक्तः सन् मोहयुक्तः वा निश्चितकर्म विहाय अनिश्चितकर्म अनु धावति । अन्ते किमपि साफल्यं नैव लभ्यते ।

**वरयेत् कुलजां प्राज्ञो विरूपामपि कन्यकाम् ।**

**रूपशीलां न नीचस्य विवाहः सदृशे कुले ।१४।**

**अन्वय** : प्राज्ञः विरूपाम् अपि कुलजां कन्यकां वरयेत् । न नीचस्य रूपशीलां (वरयेत्) । सदृशे कुले विवाहः (करणीयः) ।

**भावार्थः** बुद्धिमान् जनः उत्तमकुलसम्भूतां कुरूपां कन्यामपि परिणयेत् । परन्तु नीचकुलस्य सुन्दरीं कन्यां न परिणयेत्, यतः सदृशे कुले विवाहः कार्यः । आचार्यः चाणक्यः श्लोकेऽस्मिन् विवाह सन्दर्भे कथयति यत् रूपकुलयोः कुलः श्रेष्ठः । बुद्धिमान् नरः कुलीनकन्यायाः पाणिग्रहणं कुर्यात् । नीचकुले जाता कन्या रूपवती सुशीला स्यात् तथापि सा न बुद्धिमता परिणेया । यतः विवाहः समानकुले एव करणीयः । विवाहार्थं वरकन्ययोः वंशपरंपरा समाना स्यात् । बुद्धिमान् जनः साधारणरूप-रंग विशिष्टां निजकुलकन्यां परिणयेत् । परन्तु सुशीलां सुन्दरीं



Scanned with CamScanner

सरूपवतीं नीचकुलसम्भूतां कन्यां न परिणयेत् । यत: असमानविवाह: बहुकारणात् असफलं भवति । तस्य परिणामं न सुखकरं स्यात् । अत: विवाहप्रसङ्गे सर्वविषये जागरूक: भवेत् ।

**नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा ।**

**विश्वासो नैव कर्त्तव्य: स्त्रीषु राजकुलेषु च ।१५।**

**अन्वय** : नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा स्त्रीषु राजकुलेषु च विश्वास: नैव कर्त्तव्य: ।

**भावार्थ:** श्लोकेऽस्मिन् केषु विश्वास: न कर्त्तव्य: इति चाणक्येन कथितम् । नद्यां, शस्त्रधारिणि जने, नखविशिष्टे प्राणिनि, शिङ्गयुक्तपशौ स्त्रियां राजकुले च कदापि विश्वास: न करणीय: । एते कदा आक्रमणं करिष्यन्ति न कोऽपि वक्तुं शक्नुयात् । सिंह-भल्लूक-व्याघ्रादय: दीर्घलम्बनखयुक्ता: भवन्ति । एतेषु को वा विश्वसेत् ।

कदाचित् नर: नदीं तरितुम् इच्छति चेत् तस्या: गभीरताविषये प्रवाहमानविषये च जानीयात् । यत: नदीविषये कोऽपि सम्यक् न जानीयात् । अत: नदीम् अन्तरा य: प्रविशति स: सतर्क: स्यात्, तत्र विवेकानुमोदित: स: जन: भवेत् ।

पुनरपि शिङ्गयुक्तपशु: शस्त्रधारिजन: न विश्वासयोग्य: । कदाचित् ते स्वार्थाय मरणात्मकम् आक्रमणं कुर्यु: । तथैव स्त्रीजने अविचार्य: विश्वास: न करणीय: । यत: तासां मनोभाव: केनापि नैव ज्ञायते । तासु संकीर्णभावना, प्रीति: ईर्ष्या च दृश्यन्ते । ता: यत् वदन्ति तत् न कुर्वन्ति पुन: यत् कुर्वन्ति तत् न वदन्ति । तथैव राजनीति: सर्वदा परिवर्त्तनशीला, राजान: लोभात् कुटनीतिग्रस्ता: भवन्ति । कदाचित् ते विश्वासधातका: भवेयु: । अत: राजकुलेषु विश्वास: न कर्त्तव्य: ।

**विषादप्यमृतं ग्राह्यममेध्यादपि काञ्चनम् ।**

**नीचादप्युत्तमां विद्या स्त्रीरत्नं दुष्कुलादपि ।१६।**

**अन्वय** : विषात् अपि अमृतं अमेध्यात् अपि काञ्चनं नीचात् अपि उत्तमां विद्यां दुष्कुलात् अपि स्त्रीरत्नं ग्राह्यम् ।

**भावार्थ:** श्लोकेऽस्मिन् चाणक्य: कथयति - विषात् अमृतम् अशुद्धपदार्थात् सुवर्णं नीचजनात् विद्यां दुष्कुलात् स्त्रीरत्नं च गृह्णीयात् ।

अमृतं हि अमृतम् । अमृतं जीवनप्रदायकम् । अत: विषात् पतितम् अमृतं गृह्णीयात् । तथैव सुवर्णं सर्वदैव सुवर्णं । अशुद्धपदार्थे सुवर्णं पतितं चेत् तत् स्वीकरणीयम् । नीचजन: श्रेष्ठज्ञानाधिकारी चेत् तस्मात् साग्रहं ज्ञानम् आहरणीयम् । तथैव दुष्कुले गुणवती सुशीला कन्या अस्ति चेत् सा अवश्यं स्वीकार्या ।



Scanned with CamScanner

NOTES

अत्र विचारणीयम् - यत् सर्वदा श्रेष्ठत्वं ग्रहणीयम् । मन्दस्रोतसः श्रेष्ठपदार्थ ग्राह्यम् । तत्र संकोचः न करणीयः । पूर्वं चाणक्येन प्रोक्तम् - नीचकुलजातसुन्दरी कन्या न परिणेया । परन्तु अत्र सूच्यते । कन्या नीचकुले जाता परं सा गुणवती भवति चेत् सा परिणेया ।

**स्त्रीणां द्विगुणं आहारो लज्जा चापि चतुर्गुणा ।**
**साहसं षड्गुणं चैव कामश्चाष्टगुणः स्मृतः ।१७।**

**अन्वय** : स्त्रीणाम् आहारः द्विगुणं लज्जा चापि चतुर्गुणाः । साहसं षड्गुणं चैव कामः अष्टगुणः च स्मृतः ।

**भावार्थः** श्लोकेऽस्मिन् चाणक्येन कथितम् - पुरुषाणाम् अपेक्षया स्त्रीणाम् आहारः द्विगुणं भवति । तासां लज्जा चतुर्गुणा भवति । तासां साहसः षट्गुणः भवति पुनः कामप्रवृत्तिः अष्टगुणः भवति ।

वस्तुतः अत्र नारीणां विषये यत् कथितम् अस्ति तत्र तासां निन्दा न क्रियते अपितु गुणदृष्ट्या प्रशंसा क्रियते । पुरुषाणाम् अपेक्षया स्त्रियः द्विगुणं खादन्ति । तथैव तासां लज्जा चतुर्गुणः भवति । पुरुषाणां कार्यकरणसमये यथा साहसः विद्यते नारीणां तेषामपेक्षया षट्गुणः भवति । पुरुषाणां यथा सम्भोगेच्छा भवति नारीणां तेषामपेक्षया अष्टगुणः अधिको भवति ।

## द्वितीयोऽध्यायः

**अनृतं साहसं माया मूर्खत्वमतिलोभिता ।**
**अशौचत्वं निर्दयत्वं स्त्रीणां दोषाः स्वभावजाः ।१।**

**अन्वय** : अनृतं साहसं माया मूर्खत्वम् अतिलोभिता अशौचत्वं निर्दयत्वं स्त्रीणां स्वभावजाः दोषाः (भवन्ति) ।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः स्त्रीणां स्वभावविषये सम्यक् ज्ञापयति । असत्यकथनं साहसं माया मूर्खत्वम् अतिलोभिता अशौचत्वं निर्दयत्वं च एते दोषाः स्त्रीणां भवन्ति ।

स्त्रियः सत्यं बदन्ति परन्तु असत्यकथने ताः प्रवीणाः भवन्ति । विचारं विना किमपि कार्यं ताः कुर्वन्ति, तासां साहसः अकलनीयः । ताः मायास्वरूपिण्यः । मायया ताः स्वार्थं साधयन्ति । मूर्खः यथा कार्यं अविचार्य करोति । नार्यः मूर्खवत् कार्यम् आचरन्ति । तासां लोभः अनन्तकः भवति । ताः अतिलोभात् दुःखं लभन्ते । अपवित्रताः ताः कदाचित् भवन्ति । भयं विहाय निर्भीकरूपेण ताः स्वेच्छया कार्यं कुर्वन्ति । एते दोषाः तासां स्वभावजाः भवन्ति ।



Scanned with CamScanner

सृष्टिप्रक्रियायां नारी स्वतन्त्रा, नारी अतीव बुद्धिमती । कदाचित् शङ्कराचार्येण भणितम् - 'द्वारं किमेकं नरकस्य नारी' । तस्य कथनस्यायम् अभिप्राय: नर्कस्य मुख्यद्वारं नारी । यद्यपि नारी ममतामयी दयामयी क्षमामयी च भवति । पुन: तां विना सृष्टि: अपूर्णा । पुनरपि सीता - राधा - लक्ष्मीवाई प्रभृति नारीषु अवगुणा: न दृश्यन्ते । ता: एव नारीणाम् आदर्शभूता: भवन्ति । परन्तु चाणक्येन नारीणां दोषविषये यत् कथितम् तदेव तासां स्वाभाविकी प्रवृत्ति: ।

**भोज्यं भोजनशक्तिश्च रतिशक्तिर्वराङ्गना ।**

**विभवो दानशक्तिश्च नाल्पस्य तपस: फलम् ।२।**

**अन्वय** : भोज्यं भोजनशक्ति: रतिशक्तिर्वराङ्गना विभव: दानशक्ति: च अल्पस्य तपस: फलं न।

**भावार्थ:** श्लोकेऽस्मिन् चाणक्य: कथयति - भाग्यशाली एव जीवने सुखं लभते । भोज्यपदार्थं भोजनशक्ति: रतिशक्ति: सुन्दरी स्त्री दानशक्ति: च सामान्यतपस्याफलं न भवन्ति । भाग्यशाली एव सर्वदा सुन्दरं खाद्यं प्राप्नोति । आजीवनं यस्य भोजनशक्ति: तिष्ठति अर्थात् यत् खादति तत् पाचनं भवति स एव भाग्यवान् । यस्य स्त्रीसम्भोगशक्ति: जाग्रता भवति पुन: तस्य कृते सुन्दरी स्त्री सुलभा भवति स एव भाग्यशाली । य: धनसंपत्तियुक्त: पुन: तस्य दानशक्ति: स्यात् स एव सुखी । एतत् सर्वं सौभाग्यं पूर्वजन्मतपस्याफलम् इति चाणक्य: सूचयति ।

कदाचित् समीपे प्रचुरं खाद्यद्रव्यम् अस्ति परं भोजनार्थं जनस्य शक्ति: नास्ति । समीपे सुन्दरी स्त्री अस्ति परं जनस्य तस्या: सम्भोगशक्ति: न विद्यते । प्रचुरधनस्य अधिकारी परं दानार्थं तस्य जनस्य स्पृहा नास्ति सा कदापि भाग्यशाली न भवति ।

**यस्य पुत्रो वशीभूतो भार्याच्छन्दानुगामिनी ।**

**विभवे यश्च सन्तुष्टस्तस्य स्वर्ग इहैव हि ।३।**

**अन्वय** : यस्य पुत्रो वशीभूत:, भार्याच्छन्दानुगामिनी, य: विभवे सन्तुष्ट: तस्य इह हि स्वर्ग एव।

**भावार्थ:** चाणक्येन प्रोक्तम् - यस्य पुत्र: वशीभूत:, पत्नी वेदमार्गेण परिचालिता, निजवैभवेन सन्तुष्ट: स एव सुखी । तस्य कृते स्वगृहमेव स्वर्गसदृश: ।

कथनस्यायम् अभिप्राय: यत् यस्य नरस्य पुत्र: आज्ञाकारी भवति । जनकस्य वचनानुसारं कार्यं करोति । जनकस्यादेशं पालयति । पुन: यस्य जनस्य पत्नी अतीव धार्मिकी सुगृहीणी पुनश्च य: जन: स्वविभवेन सदा सन्तुष्ट: । स: जन: संसारेऽस्मिन् स्वर्गसुखं लभते । तस्य जनस्य कृते इयं पृथिवी स्वर्गसमा ।

NOTES



Scanned with CamScanner

NOTES

वास्तवत: सौभाग्यशालिन: जनस्य पुत्र: आज्ञाकारी भवति, पत्नी पतिव्रता भवति, धनं प्रति निर्लोभ: स: भवति, पुनरपि सदैव सन्तुष्ट: भवति । स्वर्गसुखं यथा आनन्दप्रदं तथैव गृहसुखं आनन्दप्रदायकम् ।

**ते पुत्रा ये पितुर्भक्ता: स पिता यस्तु पोषक: ।**

**तन्मित्रं यत्र विश्वास: सा भार्या यत्र निर्वृत्ति: ।४।**

**अन्वय** : ते पुत्रा: ये पितृभक्ता:, स: पिता य: तु पोषक: । तत् मित्रं यत्र विश्वास:, सा भार्या यत्र निर्वृत्ति: ।

**भावार्थ:** श्लोकेऽस्मिन् चाणक्य: कथयति - यस्य जनस्य पुत्र: पितृभक्त: इत्युक्ते: स: एव प्रकृत: पुत्र: य: सदैव पितृभक्त: । स: एव प्रकृत: पिता य: पोषक: सम्यक् लालनपालनं करोति, स एव प्रकृतं मित्रं यस्मिन् विश्वास: करणीय: य: विश्वास-योग्य: । सा एव भार्या या सर्वदैव आनन्दं प्रददाति ।

य: पुत्र: पितु: आज्ञापालनकारी निरन्तरं पितरं सेवते स एव पुत्रपदवाच्य: । तथैव य: निजसन्तानं सम्यक् पालयति पोषयति तस्मै उत्तमशिक्षां प्रददाति पुत्रं योग्यार्थं यत्नं करोति स एव प्रकृतजनक: भवति । मित्रं मित्रे विश्वसिति कदापि विश्वासघातकतां न करोति स एव वास्तवत: प्रकृतमित्रं भवति । या कदापि पत्यै दु:खं न ददाति पत्यु: सुखाय सततं चेष्टते सा एव पत्नीपदवाच्या ।

**परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।**

**वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ।५।**

**अन्वय** : परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् तादृशं पयोमुखम् विषकुम्भं मित्रं वर्जयेत् ।

**भावार्थ:** श्लोकेऽस्मिन् कीदृशं मित्रं वर्जयेत् तत् चाणक्येन प्रतिपादितम् । य: परोक्षे कार्यं हन्ति, प्रत्यक्षे प्रियं कथयति तम् अवश्यं त्यजेत् । यथा पयोमुखं विषकुम्भं जन: त्यजति तथैव दुर्जनं त्यजेत् ।

संसारेऽस्मिन् विविधस्वभावसम्पन्ना: जना: निवसन्ति । सर्वेषां स्वभाव: न समान: । केचन जना: प्रत्यक्षे मधुरं प्रियं वचनं कथयन्ति परन्तु परोक्षे कार्ये वाधका: भवन्ति कार्यधाराया: प्रतिबन्धका: भवन्ति । अत: तादृशा: जना: वर्जनीया: । कविना उदाहरणमुखेन कथ्यते यत् - यथा विषकुम्भं पयोमुखं त्यजेत् तथा कुमित्रं त्यजेत् ।

**न विश्वसेत् कुमित्रे च मित्रे चापि न विश्वसेत् ।**

**कदाचित् कुपितं मित्रं सर्वं गुह्यं प्रकाशयेत् ।६।**



Scanned with CamScanner

अन्वय : कुमित्रे न विश्वसेत् । सुमित्रे चापि न विश्वसेत् । कदाचित् कुपितं मित्रं सर्वं गुह्यं प्रकाशयेत् ।

भावार्थ: श्लोकेऽस्मिन् चाणक्येन कथितम् - कुमित्रे कदापि न विश्वसेत् । प्रायत: जन: मित्रे विश्वसिति । तत्र विचारणीयम् - कुमित्रे कदापि न विश्वास: करणीय: । सुमित्रेऽपि सम्पूर्ण-विश्वास: न कर्त्तव्य: । कदाचित् मित्रं कुपितं भवति चेत् सर्वं गोपनीयतथ्यं स: प्रकाशयेत् ।

कदाचित् व्यक्ति: मित्रे अतीव विश्वसिति । तस्य विश्वासयोग्यस्य मित्रस्य समीपे सर्वविधं गोपनीयतथ्यं प्रकाशयति । परन्तु कदाचित् उभयो: मित्रयो: मध्ये मतभेद: भवति चेत् स: कुमित्रं रुष्टकारणात् सर्वेषां पुरस्तात् सर्वं गुप्ततथ्यं प्रकटयति । स्वार्थपरकारणात् बन्धुं अनैतिककार्यकरणाय प्रेरयेत् । अत: चाणक्य: कथयति - अति विश्वस्तमित्रमपि गुप्तकथां योजनारहस्यं वा न कथयेत् ।

**मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत् ।**

**मन्त्रेण रक्षयेद्गूढं कार्ये चापि नियोजयेत् ।७।**

अन्वय : मनसा चिन्तितं कार्यं वाचा न एव प्रकाशयेत् । गूढं मन्त्रेण रक्षयेत् । कार्ये चापि नियोजयेत् ।

भावार्थ: श्लोकेऽस्मिन् चाणक्येन कथितम्- गुप्तमनोभाव: न प्रकाशनीय: । मानव: मनसि यत् चिन्तयति तत् अपरस्य समीपे न प्रकाशनीयम् । यथा मन्त्र: न प्रकाशयोग्य: तथा मनोभाव: न प्रकटनीय: ।

मानव: यत् कर्त्तुं संकल्पं करोति । तत् मनसि स्थापनीयम् । केवलं लक्ष्यप्राप्तये कर्म करणीयम् । कर्मसमये अन्यत्र अपरस्य समुखे वा कर्मविषय: न प्रकाशनीय: । कदाचित् प्रकाशित: भवति चेत् शत्रु: कर्मणि बाधक: स्यात् । कार्ये समाप्ते सर्वे ज्ञास्यन्ति अत: पूर्वं कथं वा प्रकाशयेत् ? यत: मनोविज्ञानदृष्ट्या मानव: सुचिन्तितरूपेण यत् कर्म करोति अवश्यं तत्र सफलतां लभते । अत: मनसा चिन्तितं कर्म कदापि अन्यत्र न प्रकाशयेत् ।

**कष्टं च खलु मूर्खत्वं कष्टं च खलु यौवनम् ।**

**कष्टात्कष्टतरं चैव परगेह-निवासनम् ।८।**

अन्वय : मूर्खत्वं खलु कष्टं, यौवनं च खलु कष्टम् । परगेह-निवासनं कष्टात् कष्टतरं चैव ।

भावार्थ: आचार्य्येण चाणक्येन श्लोकेऽस्मिन् सूचितम् - मूर्खता मानवस्य कृते कष्टम्, यौवनकालोऽपि दु:खं ददाति परन्तु परगृहवास: अतीव कष्टप्रदायक: भवति ।

NOTES



Scanned with CamScanner

NOTES

यः मूर्खः तस्य किं करणीयं किम् अकरणीयम् इति ज्ञानं न स्यात् । अतः सदैव कष्टमनुभवति । अतः कथ्यते मूर्खत्वमेव महान् अभिशापः । जीवने अवश्यं किं कार्य किम् अकार्यम् एतत् ज्ञातव्यम् । पुनः यौवनं सर्वविधकुप्रवृत्तिमूलम् । यौवनसमये नरः कदाचित् अन्धवत् कार्यं करोति पुनः कदापि प्रमत्तवत् कर्म आचरति । यौवनकालः कामनया मानवं विवेकशून्यं करोति कारयति च । यौवनकाले नरः निर्ल्लजः सन् कदाचित् कुकर्म करोति येन सः समाजे निन्दितः घृणितः अपमानितः वा भवति । नरः परगृहे वसति चेत् प्रथमतः तस्य स्वाधीनता विनश्यति । अपरस्य दयया जीवननिर्वाहं करोति । तस्य जीवनयात्रा पराधीना भवति । अतः परगृहनिवासः तस्य जनस्य कृते महत्दुःखं जनयति ।

**शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।**

**साधवो न हि सर्वत्र चन्दनं न वने वने ।९।**

**अन्वय** : शैले शैले माणिक्यं न । गजे गजे मौक्तिकं न । सर्वत्र साधवः न । वने वने चन्दनं न ।

**भावार्थः** आचार्यः श्लोकेऽस्मिन् कथयति- सर्वेषु पर्वतेषु माणिक्यं न लभ्यते । सर्वेषु गजेषु मौक्तिकं न उपलभ्यते । सर्वस्मिन् स्थाने साधवः न विद्यन्ते । सर्वेषु वनप्रदेशेषु चन्दनवृक्षाः न सन्ति ।

मणिमाणिक्यं पर्वते उपलब्धम् । परन्तु यस्मिन् कस्मिन् पर्वते माणिक्यप्राप्तिः न सम्भवति । कतिपयाः गजाः सन्ति येषां मस्तकेषु मणयः लभ्यन्ते परं सर्वेषु गजमस्तकेषु मणिप्राप्तिः न सम्भवेत् । पृथिव्यां बहुषु देशेषु स्थानेषु वा वनम् अस्ति । अरण्ये चन्दनपादपः लभ्यते, परं सर्वेषु वनप्रदेशेषु चन्दनवृक्षाः न लभ्यन्ते । तथैव पृथिव्यां बहवः साधवः सन्ति । किन्तु सर्वत्र सर्वस्थाने सर्वदेशे सर्वकाले वा साधुः नास्ति । साधुजनः दुर्लभः भवति । यत्र साधवः उपलब्धाः तत्र तेषाम् आदरः करणीयः । पूजा करणीया । सम्मानः प्रदर्शनीयः ।

**पुत्राश्च विविधैः शीलैर्नियोज्याः सततं बुधैः ।**

**नीतिज्ञाः शीलसंपन्ना भवन्ति कुलपूजिताः ।१०।**

**अन्वय** : बुधैः विविधैः शीलैः पुत्राः च सततं नियोज्याः । (यतः) नीतिज्ञाः शीलसंपन्नाः कुलपूजिताः भवन्ति ।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः कथयति - बुद्धिमन्तः जनाः पुत्रेभ्यः सदाचारशिक्षां दद्युः । नीतिज्ञः सदाचारी पुत्रः कुलस्य गौरवबर्द्धने सहायकः भवति । जनकस्य प्रथमतः कर्त्तव्यं भवेत् पुत्रेभ्यः सर्वोचशिक्षा प्रदातव्या । न



Scanned with CamScanner

केवलं विद्यालयशिक्षा पर्याप्ता । पिता सुव्यवहारविषये आचरणविषये शिक्षाप्रदानं कुर्यात् । सुपुत्र: एव स्वकुलस्य गौरवभूत:, तदर्थं नीतिज्ञा: सुशीला: पुत्रा: स्वकुले सुपूजिता: भवन्ति । अद्यतनयुवका: स्वाधीननागरिका: इति सर्वे कथयन्ति । एतत् कथनेन किम् । कथं युवका: पुत्रा: वा सुयोग्या: सदाचारिण: च भवेयु: तदर्थं पित्रो: परमं कर्त्तव्यं विद्यते । पुनरपि अस्मिन् क्षेत्रे समाजस्यापि कर्त्तव्यबोध: स्यात् ।

**माता शत्रु: पिता वैरी याभ्यां बाला न पाठिता: ।**

**सभामध्ये न शोभन्ते हंसमध्ये बको यथा ।११।**

**अन्वय** : माता शत्रु: पिता वैरी याभ्यां बाला: न पाठिता: । यथा हंसमध्ये बक: (न शोभते) (तथा) ते सभामध्ये न शोभन्ते ।

**भावार्थ:** आचार्य: चाणक्य: कदाचित् अप्रियसत्यमपि वदति । सन्तानस्य शिक्षादायित्वं पित्रो: न्यस्तम् । य: सन्तान: विद्याशून्य: मूर्ख: भवति तत्र पितु: मातु: स एव दोष: । सन्तानस्य पठनप्रसङ्गे या माता यत्नशीला न भवति । पुत्रं स्वयं न पाठयति सा सन्तानस्य शत्रु: भवति । तथैव सन्तानस्य शिक्षाविषये जनकस्य चिन्तनीयम् । य: जनक: सन्तानस्य पाठविषये न यत्नं करोति सन्तान: पठति न पठति वा तत्विषये सतर्क: जागरुक: वा न भवति स: सन्तानस्य वैरी भवति । विद्यारहित: जन: हंसमध्ये बकवत् भवति। इत्युक्ते विद्वत्जनेषु स: विद्याहीन: जन: न शोभते । कथ्यते विद्याविहीन: नर: पशुभि: सह समान: ।

**लालनाद् बहवो दोषास्ताड़नाद् बहवो गुणा: ।**

**तस्माद् पुत्रं शिष्यं च ताड़येत् न तु लालयेत् ।१२।**

**अन्वय** : लालनाद् बहव: दोषा: ताड़नात् बहव: गुणा: (भवन्ति) । तस्माद् पुत्रं शिष्यं च न लालयेत् तु ताड़येत्।

**भावार्थ:** आचार्य: चाणक्य: श्लोकेऽस्मिन् सन्तानस्य लालनपालनविषये उपदिशति । सन्तानानां लालने बहव: दोषा: जायन्ते । स्नेहकारणात् दोषा: भवन्ति । परन्तु अनुशासनेन अनेके गुणा: प्रकाश्यन्ते । एतदर्थं पुत्रे स्नेहकारणपेक्षया अनुशासनस्य गुरुत्वं विद्यते । स्नेहेन सन्ताना: विशृङ्खलिता: स्यु: । यत् ते स्वेच्छाचारिण: भवन्ति । पित्रो: गुरुजनानां च परामर्शं ते न स्वीकुर्वन्ति । अत: चाणक्येन सूचितम् - पितर: मातर: गुरव: च पुत्रा: शिष्या: वा यथा कुमार्गगामिन: न भवेयु: तदर्थं जागरुका: भविष्यन्ति दोषमुक्ता: च स्थास्यन्ति ।

**श्लोकेन वा तदर्द्धेन तदर्द्धार्द्धाक्षरेण वा ।**

**अवन्ध्यं दिवसं कुर्याद् दानाध्ययनकर्मभि: ।१३।**

NOTES



Scanned with CamScanner

NOTES

**अन्वय** : श्लोकेन तदर्द्धेन तदर्द्धार्द्धाक्षरेण वा (पठेत्)। (यत:) दानाध्ययनकर्मभि: दिवसम् अवन्ध्यं कुर्यात् ।

**भावार्थ**: श्लोकेऽस्मिन् आचार्य: चाणक्य: स्वाध्यायस्य महत्त्वं प्रतिपादयति । कोऽपिजन: दिवसे एकं श्लोकं तस्य श्लोकस्यार्द्धं चतुर्थांशं एकम् अक्षरं वा सम्यक् पठेत् । मननं कुर्यात् । मननेन दानेन अध्ययनेन वा दिवस: सार्थक: स्यात् । मानव: स्वकल्याणार्थं समयस्य सदुपयोगं कुर्यात् । मानवस्य कृते एकं मुहूर्त्तमपि अमूल्यं भवति । समयस्य उपयोगेन तस्य जीवने साफल्यं मिलिष्यति । स्वाध्यायेन जीवनस्य साफल्यं भवेत् । कर्म चिन्तनेन मननेन वा जन: स्वजीवने सफलतां लभते । अपरं सत्कर्म भवति दानम् । यथाशक्ति मानव: दानं कुर्यात् । दानेन तस्य जीवनं सार्थकं भविष्यति ।

**कान्तावियोग: स्वजनापमानो रणस्य शेष: कुनृपस्य सेवा ।**
**दरिद्रभावो विषमा सभा च विनाग्नि नैते प्रदहन्ति कायम् ।१४।**

**अन्वय** : कान्तावियोग: स्वजनापमान: रणस्य शेष: कुनृपस्य सेवा दरिद्रभाव: विषमा सभा च एते विनाग्नि कायं प्रदहन्ति ।

**भावार्थ**: श्लोकेऽस्मिन् आचार्येण चाणक्येन कथितम् यत् - प्रियतमाकान्तावियोग: स्वजनकृतापमान: युद्धसमाप्ते परं जीवित: शत्रु: कुत्सितनृपसेवा दरिद्रभाव: आविवेकिसभा च एते अग्निं विना शरीरसन्तप्तं कुर्वन्ति ।

अग्नि: सर्वं प्रदहति । एतत् सर्वे जानन्ति । अग्ने: वाह्यस्वरूपं सर्वे अवगच्छन्ति । परन्तु अपर: एक: अग्नि: विद्यते । स: न दृश्यते । परं तेन सर्वं दह्यते । प्रियतमाया: पत्न्या: विच्छेदेन पति: दु:खाग्निना असह्ययन्त्रणां लभते । निजपरिवारजना: कुत्रापि असम्मानिता: भवन्ति चेत् तेन दु:खेन जना: म्रियमाणा: भवन्ति । युद्धे समाप्ते ये जीविता: तिष्ठन्ति ते शारीरिकपीडया दु:खम् अनुभवन्ति । कुनृपसमीपे ये वृत्तिं कुर्वन्ति तेषां जीवनं दुर्विषहं भवति । दुष्टजनै: आयोजितायां सभायां जना: मानसिकं दु:खं लभन्ते । एतासु स्थितावस्थासु यादृशी यन्त्रणा जायते तां यन्त्रणां द्रष्टुं न शक्यते । प्रकाशयितुम् अपि अवसर: न लभ्यते । स: अग्नि: न दृश्यते ।

**नदीतीरे च ये वृक्षा: परगृहेषु कामिनी ।**
**मन्त्रिहीनाश्च राजान: शीघ्रं नश्यन्त्यसंशयम् ।१५।**

**अन्वय** : नदीतीरे ये वृक्षा: परगृहेषु कामिनी, मन्त्रिहीना: राजान: शीघ्रं असंशयं नश्यन्ति ।



Scanned with CamScanner

NOTES

भावार्थ: आचार्य: चाणक्य: कथयति श्लोकेऽस्मिन् - स्रोतयुक्तानदीतीरे स्थिता: वृक्षा: अन्यगृहे स्थिता पत्नी, मन्त्रिहीना: राजान: - एते शीघ्रमेव विनश्यन्ति ।

नद्या: धारा अनिश्चिता । तस्या: कूले स्थिता: वृक्षा: कदाचित् स्रोतसा विनष्टा: भवन्ति । तथैव स्वस्य पत्नी अपरस्य गृहे तिष्ठति येत् तस्या: चरित्रं सुरक्षितं न स्यात् । तस्या: सतीत्वं सन्देहजनकं भवेत् । प्रसङ्गेऽस्मिन् अपरेण नीतिकारेण प्रोक्तम् -

लेखनी पुस्तिका: दारा: परहस्ते गता गता: ।

आगता दैवयोगेन नष्ट भ्रष्टा च मर्दिता ।

**बलं विद्या च विप्राणां राज्ञां सैन्यं बलं तथा ।**

**बलं वित्तं च वैश्यानां शूद्राणां पारिचर्यकम् ।१६।**

**अन्वय :** विप्राणां बलं विद्या तथा राज्ञां बलं सैन्यं च । वैश्यानां बलं बित्तम् । शूद्राणां पारिचर्यकम् बलं च (भवति)।

**भावार्थ:** राज्ञ: बलं मन्त्री । मन्त्री सर्वदा राजानं सुमार्गे गन्तुं प्रेरयति । पुन: कुमार्गात् राजानम् आनेतुं सततं यत्नं करोति । अत: मन्त्रिण: अनुपस्थिति: राज्ञ: कृते दु:खं प्रददाति । तत: राज्ञ: समीपे मन्त्री नूनं तिष्ठेत् ।

आचार्य: चाणक्य: श्लोकेऽस्मिन् किं कस्य बलम् इति सूचयति । ब्राह्मणानां बलं विद्या । राज्ञां बलं सैन्यम् । वैश्यानां बलं वित्तम् । शूद्राणां बलं सेवाकरणम् ।

ज्ञानं विद्या च ब्राह्मणानां बलम् इति स्वीकरणीयम् । तेषां कर्मक्षेत्रे अध्ययनस्य स्वाध्यायस्य च विनियोग: भवति । अत: अध्ययने स्वाध्याये ज्ञाने विद्यायां च ते निपुणा: भवेयु: । तेन ते ब्राह्मणा: संसारेऽस्मिन् आदरणीया: भवेयु: । तथैव राज्ञां बलं तेषां सैन्या: । यत: सैन्यशक्तिबलेन राजान: सुरक्षिता: भवन्ति । तेषां राज्यमपि सुरक्षितं स्यात् । पुनरपि वैश्यानां बलमेव धनम् । ते धनबलेन सर्वत्र विजयं लभन्ते । सेवाकरणं शूद्राणां बलम् । सेवया ते सर्वेषाम् आदरणीया: भवन्ति ।

**निर्द्धनं पुरुषं वेश्या प्रजा भग्नं नृपं त्यजेत् ।**

**खगो वीतफलं वृक्षं भुक्त्वा चाभ्यागतो गृहम् ।१७।**

**अन्वय :** वेश्या निर्द्धनं पुरुषं प्रजा भग्नं नृपं च त्यजेत् । खग: वीतफलं वृक्षम् अभ्यागत: भुक्त्वा गृहं च (त्यजन्ति)



Scanned with CamScanner

NOTES

**भावार्थ:** श्लोकेऽस्मिन् कः कदा कं त्यजति तत् चाणक्येन प्रोक्तम् । वेश्या निर्धनं पुरुषं त्यजति । प्रजा शक्तिहीनं राजानं त्यजति । पक्षी फलहीनं पादपं त्यजति पुनः अभ्यागतः भोजनात् परं गृहं त्यजति ।

वेश्या धनिकस्य यथा आदरं करोति; निर्धनपुरुषस्य तथा आदरं न करोति । पुनः कदाचित् राजा शक्तिहीनः भवति चेत् प्रजाः अविलम्बे तं त्यजन्ति । फलपूर्णवृक्षे पक्षी स्थातुम् इच्छति परन्तु फलशून्यं वृक्षं पक्षी त्यजति एव । कदाचित् अतिथिः भोजनार्थं गृहम् आयाति । अपितु भोजनात् परं सः अभ्यागतः तत् गृहं त्यजति । प्रायतः जनाः स्वस्वार्थसाधनं यावत् सहयोगं कुर्वन्ति । तदनन्तरं दूरे तिष्ठन्ति । वास्तवतः सर्वेषां स्थार्थप्राप्तेः परं दृष्टिपथः परिवर्त्तनीयः । कार्य्ये समाप्ते जनः स्वयं तत् स्थानं त्यजेत् ।

**गृहीत्वा दक्षिणां विप्रास्त्यजन्ति यजमानकम् ।**
**प्राप्तविद्या गुरुं शिष्या दग्धारण्यं मृगास्तथा ।१८।**

**अन्वय :** विप्राः दक्षिणां गृहीत्वा यजमानकं त्यजन्ति । शिष्याः प्राप्तविद्याः गुरुं त्यजन्ति । तथा मृगाः दग्धारण्यं (त्यजन्ति)।

**भावार्थ:** आचार्य्येण चाणक्येन श्लोकेऽस्मिन् के कान् कदा त्यजन्ति तत् विषये कथितम् । ब्राह्मणाः दक्षिणाप्राप्तेः परं यजमानं शिष्याः विद्यालाभात् परं स्वगुरुं पशवः अग्निदग्धवनं च त्यजन्ति ।

ब्राह्मणाः यजमानस्य मंगलाय पूजादिकं कुर्वन्ति । दक्षिणाप्राप्तिं यावत् ते तत्र तिष्ठन्ति । दक्षिणाप्राप्तेः परं ब्राह्मणाः साक्षात् यजमानगृहं परित्यज्य अन्यत्र गच्छन्ति । तथैव शिष्याः गुरूणां समीपे विद्याशिक्षां कुर्वन्ति । ते शिक्षासमाप्तेः परं गुरून् त्यक्त्वा अन्यत्र यान्ति । ते जीवनधारणं प्रति विचारशीलाः सन्तः आगामियोजनायां लिप्ताः भवन्ति । तथैव वने बहवः पशुपक्षिणः निवसन्ति तत्र ते सानन्दं विचरन्ति । परन्तु कदाचित् वने अग्निसंयोगः भवति चेत् तत् वनस्थलं ते त्यजन्ति ।

**दुराचारी दुरादृष्टिर्दुरावासी च दुर्जनः ।**
**यन्मैत्री क्रियते पुंभिर्नरः शीघ्रं विनश्यति ।१९।**

**अन्वय :** दुराचारी दुरादृष्टि दुरावासी दुर्जनः यत् मैत्री क्रियते । पुंभिः नरः शीघ्रं विनश्यति ।

**भावार्थ:** श्लोकेऽस्मिन् चाणक्यः कथयति - यः कारणं विना अपरस्य क्षतिसाधनं करोति । यस्य दृष्टिः अपरस्य अमङ्गलं करोति । पुनः यः कुस्थाने निवसति । तैः सह बन्धुत्वं क्षतिकारकं भवति । तत्र मैत्री शीघ्रं विनश्यति ।



Scanned with CamScanner

दुष्टजनैः सह संपर्कः न करणीयः । तस्य दुर्जनस्य प्रभावेण सुजनोऽपि दुर्जनः भवेत् । दुर्जनेन सह यः तिष्ठति निवसति वा सः अवश्यं दुःखं लभते । दुर्जनः सर्वदा स्वार्थपरः । अपरस्य क्षतिसाधनं तस्य चिन्तनम् । तस्य दृष्टिः सर्वदा विषपूर्णा भवति । दुर्जनेन सह मैत्री न मङ्गलप्रदायिनी । कथ्यते -

दुर्जनः परिहर्त्तव्यः विद्ययाऽलंकृतोऽपि सन् ।

मणिना भूषितः सर्पः किमसौ न भयङ्करः ।

**समाने शोभते प्रीतिः राज्ञि सेवा च शोभते ।**

**वाणिज्यं व्यवहारेषु दिव्यास्त्री शोभते गृहे ।२०।**

**अन्वय** : समाने प्रीतिः शोभते, राज्ञि सेवा शोभते च। व्यवहारेषु वाणिज्यं गृहे दिव्यास्त्री च शोभते।

**भावार्थः** श्लोकेऽस्मिन् कः कुत्र शोभते तत् आचार्येण चाणक्येन कथ्यते । समानस्तरे मित्रता शोभते । राज्ञः कृते सेवा शोभते । वैश्यस्य कृते वाणिज्यकरणं शोभते । गृहे सुलक्षणयुक्ता स्त्री शोभते ।

अवधारणीयं यत् - मित्रताकरणात् पूर्वं यैः सह मित्रता क्रियते सः निजसमास्कन्धः न वा एतत् विचारणीयम् । नृपतेः सेवा कर्त्तव्या । प्रजानां सेवाकरणेन राजा शोभते । राज्ञः प्रमुखं कर्म सेवाकरणम् । वैश्याः वाणिज्यप्रियाः । तेन वाणिज्येन वैश्याः शोभन्ते । गृहस्य शोभावर्द्धनकारिणी भवति सुलक्षणी स्त्री । तया स्त्रिया गृहस्य शोभा बर्द्धते । कथ्यते - गृहिणी गृहमुच्यते ।

## तृतीयोऽध्यायः

**कस्य दोषः कुले नास्ति व्याधिना के न पीड़िताः ।**

**व्यसनं केन न प्राप्तं कस्य सौख्यं निरन्तरम् ।१।**

**अन्वय** : कुले कस्य दोषः नास्ति ? के व्याधिना न पीड़िताः । केन व्यसनं न प्राप्तम् । कस्य सौख्यं निरन्तरं (तिष्ठति) ।

**भावार्थः** आचार्येण चाणक्येन प्रोक्तम् - कस्य दोषः नास्ति ? कस्य कुले दोषः न विद्यते ? ईदृशः कुलः नास्ति यः दोषरहितः । संसारेऽस्मिन् कः व्याधिना पीडितः दुःखितः वा न भवति ? यतः शरीरं व्याधिमन्दिरम् । कः कदापि दुःखेन पीडितः न भवति ? अवश्यं कदाचित् जनः दुःखितः स्यात् । कोऽवा संसारेऽस्मिन् सदा सुखी ? यतः चक्रवत् परिवर्त्तन्ते सुखानि च दुःखानि च । सर्वस्मिन् स्थाने पूर्णता नैव लभ्यते । कदाचित् अपूर्णता भवेत् । एतदेव एकमात्रम् अप्रियसत्यम् ।

NOTES



Scanned with CamScanner

**आचार: कुलमाख्याति देशमाख्याति भाषणम् ।**

**संभ्रम: स्नेहमाख्याति वपुराख्याति भोजनम् ।२।**

**अन्वय** : आचार: कुलम् आख्याति । भाषणं देशम् आख्याति । संभ्रम: स्नेहम् आख्याति । भोजनम् वपु: आख्याति ।

**भावार्थ:** श्लोकेऽस्मिन् आचार्य: चाणक्य: कथयति - आचरणात् एव जनस्य कुलसंपर्कस्य परिचय: ज्ञायते । मुखत: प्रकाशमानाया: भाषाया: देशपरिचय: लभ्यते । विशेषत: य: यां भाषां कथयति स एव तस्य देशस्य अधिवासी इति ज्ञायते । आदरसत्कारात् जनस्य स्नेहसंपर्क: ज्ञायते । शारीरिकगठनात् व्यक्ते: भोजनसंपर्कितम् आकलनं कर्तुं शक्यते ।

प्रायत: उच्चवंशीय: जन: शालीन: शान्त: भद्र: सुस्वभावयुक्त: च भवति । नीचवंशीय: उद्धत: मानमर्यादारहित: च भवति । पुन: जनस्य मुखात् या भाषा निर्गता भवति, तस्या: भाषाया: उच्चारणेन जन: कस्य अञ्चलस्याधिवासी एतत् ज्ञातुं शक्यते । पुन: जनस्य क्रियाकलापात् तस्य मनोभाव: सम्यक् अवगम्यते । तेन जनेन प्रदर्शित: स्नेह: अनाविल: न वा एतत् अवगन्तुं शक्यते । मनोभाव: कदापि न गोपनीय: स्यात् । पुनरपि जनस्य शरीरदृष्ट्या तस्य आहारविषये आकलयितुं शक्यते ।

**सुकुले योजयेत् कन्यां पुत्रं विद्यासु योजयेत् ।**

**व्यसने योजयेच्छत्रुं मित्रं धर्मे नियोजयेत् ।३।**

**अन्वय** : सुकुले कन्यां योजयेत्, विद्यासु पुत्रं योजयेत् । व्यसने शत्रुं योजयेत्, धर्मे मित्रं नियोजयेत् ।

**भावार्थ:** श्लोकेऽस्मिन् आचार्येण चाणक्येन व्यवहारकुशलविषये आलोच्यते । कन्याया: विवाह: कुलीनपरिवारे कुर्यात् । यदा कन्या विवाहयोग्या भवति तदा पितरौ तस्या: विवाहार्थं प्रयत्नं कुरुत: । योग्यवर: वरणीय: । पुन: आत्मन: पुत्र: यथा विद्यासु निपुण: स्यात् तत् चिन्तनीयम् । पुत्र: स्वशिक्षाबलेन यथा आत्मनिर्भरशील: भवेत् तदर्थं प्रयत्न: कार्य: । मित्रं सदा धर्मकार्य्ये नियोजयेत् । मित्रं यथा परिश्रमं कुर्यात् पुन: तस्य स्वकर्मणिकथं विश्वास: भवेत् तादृश: परामर्श: प्रदातव्य: । येन मित्रं स्वजीवने सुकर्म कुर्यात् । कर्मणि तस्य सफलताप्राप्ति: स्यात् । परं शत्रुं व्यसने योजयेत् । शत्रु: कुकर्म करोति चेत् तं तस्मात् कुकार्यात् न वारयेत् । अपरञ्च स: रिपु: कुकर्मणि मग्न: सन् सर्वदा कथं विपदि पतेत् तत् करणीयम् । येन जन तेन रिपुणा व्यतिव्यस्त: न स्यात् ।

Scanned with CamScanner

**दुर्जनस्य च सर्पस्य वरं सर्पो न दुर्जनः ।**

**सर्पो दशति काले तु दुर्जनस्तु पदे पदे ।४।**

**अन्वय** : दुर्जनस्य सर्पस्य च (मध्ये) सर्पः वरं दुर्जनः न। काले सर्पः दशति । तु दुर्जनः पदे पदे दशति।

**भावार्थः** दुर्जनः स्वभावेन मन्दः । सर्पः स्वभावेन दुष्टः । अनयोः दुर्जनसर्पयोः सर्पः श्रेयस्करः उत्तमः च । यतः सर्पः कदाचित्, एकवारं दशति । परन्तु दुर्जनः पदे पदे दशति । कष्टं ददाति । सर्पः कदाचित् मन्त्रेण औषधेन वा वशीभूतः भवति । परं दुर्जनः कदापि वशीभूतः न भवति । कदाचित् दुर्जनः विद्वान् भवेत् तथापि सः न विश्वासयोग्यः । विद्ययाऽलंकृतः सन् दुर्जनः सर्वदा परित्यक्तव्यः ।

**एतदर्थं कुलीनानां नृपाः कुर्वन्ति संग्रहम् ।**

**आदिमध्यावसानेषु न त्यजन्ति च ते नृपम् ।५।**

**अन्वय** : एतदर्थं नृपाः कुलीनानां संग्रहं कुर्वन्ति । (यतः) ते आदिमध्यावसानेषु नृपं न त्यजन्ति ।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः कुलीनतायाः वैशिट्यं प्रकाशयति । कुलीनः जनः आरम्भात् अन्तिमं यावत् तिष्ठति । एतदर्थं राजानः कुलीनानां जनानां संग्रहं कुर्वन्ति । ये जनाः संस्कारसंपन्नाः भवन्ति, ते यैः साकं मित्रतां कुर्वन्ति, आजीवनं मित्रताधर्मं पालयन्ति । ते मित्राणां सुखसमये दुःखसमये वा तैः सह तिष्ठन्ति । कदापि तान् न त्यजन्ति । तदर्थं राजानः संस्कारसम्पन्नकुलीनजनान् निजसमीपे स्थापयितुम् आग्रहं प्रकटयन्ति । पुनः कुलीनपरिवारजनानां नियुक्तिं कुर्वन्ति । ते कुलीनजनाः अपि पंरम्परागतशिक्षादीक्षाकारणात् स्वार्थवादिनः न भवन्ति । राजानं प्रति छलनापूर्णव्यवहारः तैः न क्रियते ।

**प्रलये भिन्न मर्यादा भवन्ति किल सागराः ।**

**सागरा भेदमिच्छन्ति प्रलयेऽपि न साधवः ।६।**

**अन्वय** : प्रलये सागराः किल भिन्न मर्यादा भवन्ति। सागराः भेदम् इच्छन्ति । साधवः प्रलये अपि न (त्यजन्ति)।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः सूचयति यत् प्रलयकाले सागरः कूललंघनं करोति । परन्तु साधवः प्रलयकाले मर्यादारहिताः न भवन्ति ।

परिस्थितिवशतः आचरणे परिवर्त्तनं स्यात्। यद्यपि जनाः समुद्रं गम्भीरः इति मन्यते तथापि प्रलये आगते समुद्रः स्वमर्यादां विस्मृत्य कूललंघनपूर्वकं स्थलभागं

NOTES



Scanned with CamScanner

NOTES

प्लावयति । परं साधवः स्वस्वभावे अपरिवर्त्तिताः भवन्ति । विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः ते स्वभावं न त्यजन्ति । अतः समुद्रात् साधुः महत्तरः । प्रायतः सर्वे समुद्रम् आदर्शरूपेण स्वीकुर्वन्ति । यतः वर्षाकाले नदीनां जलं समुद्रे प्रविशति परं समुद्रः कूललंघनं न करोति । प्रलयकाले आगते सः सागरः पृथिवीं जलमयीं करोति । प्रलयसमये सागरः स्वमर्यादारक्षणे असमर्थः भवति । परन्तु विपदकाले साधवः कदापि निजचरित्रं न त्यजन्ति । सर्वासु अवस्थासु ते स्थिराः भवन्ति । अतः समुद्रात् साधवः श्रेष्ठाः । एतदर्थं साधवः सर्वदा सम्माननीयाः भवेयुः ।

**मूर्खस्तु परिहर्त्तव्यः प्रत्यक्षो द्विपदः पशुः ।**
**भिद्यते वाक्यशल्येन अदृशं कण्टकं यथा ।७।**

**अन्वय** : मूर्खः तु परिहर्त्तव्यः। (सः) प्रत्यक्षः द्विपदः पशुः । (सः) वाक्यशल्येन भिद्यते । यथा कण्टकं अदृशं (भिद्यते)।

**भावार्थः** श्लोकेऽस्मिन् चाणक्येन कथितम् - कः परिहर्त्तव्यः ?

मूर्खजनः सर्वदा परिहर्त्तव्यः । यद्यपि सः मानवः परन्तु सः द्विपदः पशुः । तस्य वाक्यशल्येन पीडा जायते । नेत्रहीनः यथा कण्टकेन पीडितः भवति तथैव मूर्खजनेन मानवः पीडितः भवति । यः अज्ञानः मूर्खः सः पशुना सह समानः । मूर्खजनस्य वचनं अदृश्ये शल्यमिव पीड़ा जनयति । एतदर्थं मूर्खजनः सदा परिहरणीयः कथ्यते-

दुर्जनः परिहर्त्तव्यः विद्ययाऽलंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ।

**रूपयौवनसंपन्ना विशालकुलसंभवाः ।**
**विद्याहीना न शोभन्ते निर्गन्धाइव किंशुकाः ।८।**

**अन्वय** : रूपयौवनसंपन्ना विशालकुलसंभवाः । विद्याहीनाः निर्गन्धाः किंशुकाः इव न शोभन्ते ।

**भावार्थः** आचार्येण चाणक्येन श्लोकेऽस्मिन् विद्यायाः महत्त्वं प्रतिपादितम् । मानवः रूपयौवनयुक्तः विशालकुलसम्भवः सन्नपि विद्याहीनश्चेत् सः न शोभते ।

वास्तवतः विद्यया नरः शोभते । कश्चित् जनः रूपवान् परं विद्यारहितः, सः शोभमानः न भवति । सः जनः यौवनसमये न शोभते यः विद्याहीनः । धनशाली जनोऽपि सर्वदा सर्वत्र न शोभते विद्याहीनः भवति चेत् । कविना प्रोक्तम् सुवासहीनं पलाशपुष्पं यथा जनैः न आद्रियते तथैव विद्याहीनः जनः समाजे आदृतः न भवति ।

विद्याहीन: जन: समाजे असम्मानित: भवति । अत: विद्यया नर: शोभित: सम्मानित: आदृत: पूजित: च भवति ।

NOTES

**कोकिलानां स्वरो रूपं स्त्रीणां रूपं पतिव्रतम् ।**

**विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनाम् ।९।**

**अन्वय :** कोकिलानां रूपं स्वर: । स्त्रीणां रूपं पतिव्रतम् । कुरूपाणां रूपं विद्या । तपस्विनां रूपं क्षमा ।

**भावार्थ:** श्लोकेऽस्मिन् चाणक्येन केषां किं रूपं तत् वर्णितम् । आचार्य: चाणक्य: रूपचर्चावसरे रूप-सौन्दर्यापेक्षया सुगुण: महान् इति सूचयति । कोकिल: कृष्णकाय: परन्तु तस्य स्वरं सुमधुरम् । अत: कोकिलानां स्वर: एव रूपम् । रूपहीना नारी पतिव्रता चेत् सा सुन्दरी प्रतिभाति । ये जना: कुरूपा: भवन्ति, प्रायत: तेषाम् आदर: न भवति । परं ते ज्ञानस्य अधिकारिण: भवन्ति चेत् तेषां महान् आदर: भवति । अत: कुरूपजनानां रूपमेव ज्ञानम् । तथैव तपस्विन: क्षमाशीला: भवेयु: । तपस्विनां क्षमा एव रूपम् ।

**त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।**

**ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ।१०।**

**अन्वय :** कुलस्यार्थे एकं त्यजेत्, ग्रामस्यार्थे कुलं त्यजेत्। जनपदस्यार्थे ग्रामं आत्मार्थे च पृथिवीं त्यजेत् ।

**भावार्थ:** श्लोकेऽस्मिन् चाणक्येन प्रतिपादितम् यत् - किमर्थं किं त्यजेत् ?

एकस्य कुलस्य मङ्गलाय आभिजात्यस्य रक्षणाय च आवश्यकं भवति चेत् एक: जन: त्यक्तव्य: । कुलत्यागेन ग्रामस्य मङ्गलं कल्याणं वा भवति चेत् तदा कुलं त्यजेत् । ग्रामपरित्यागेन देशस्य मङ्गलसाधितं भवति चेत् तर्हि अवश्यं ग्राम: त्यक्तव्य: । परन्तु स्वजीवनरक्षार्थं यथाकालं संसार: त्यक्तव्य:। सर्वदा आत्मरक्षा करणीया । आत्मरक्षायै पृथिवीमपि त्यजेत् ।

**उद्योगे नास्ति दारिद्यं जपतो नास्ति पातकम् ।**

**मौनेन कलहो नास्ति नास्ति जागरिते भयम् ।११।**

**अन्वय :** उद्योगे दारिद्यं नास्ति। जपतो पातकं नास्ति । मौनेन कलह: नास्ति । जागरिते भयं नास्ति।

**भावार्थ:** महामना चाणक्येन सूचितं यत् परिश्रमेण फलमेव लभ्यते । उद्यमेन कार्य्याणि सिध्यन्ति । उद्यमशीलजनस्य दारिद्यं नास्ति । उद्यमेन दारिद्यं दूरं याति ।



Scanned with CamScanner

NOTES

अत: परिश्रमेण जीवनं सुसम्पन्नं स्यात् । भगवत: नाम य: जपति तस्य पातकं दूरीभूतं भवति । अत: भगवत: नाम जपनीयम् । भगवत: नामस्मरणात् मन: शुद्धं भवति । सत् कर्मकरणाय जन: प्रेरित: भवति । कुकर्म-कुसङ्ग-कुवाक्यात् स: दूरे तिष्ठति । मानव: पापरहित: स्यात् । मौनेन कलह: न भवति । य: अधिकं न वदति यत् आवश्यकं तदैव कथयति, तस्य केनापि साकं विवाद: न भवति । य: स्वकर्त्तव्ये सदा जाग्रत: तस्य कस्मादपि भयं न स्यात् । स: कस्मादपि न विभेति । यत: जाग्रत: जनस्य सर्वविधं भयं दूरे तिष्ठति ।

**अतिरूपेण वै सीता अतिगर्वेण रावण: ।**

**अतिदानाद्वलिर्बद्धो ह्यति सर्वत्र वर्जयेत् ।१२।**

**अन्वय :** सीता अतिरूपेण रावण: अतिगर्वेण वलि: अतिदानात् वै बद्ध: । हि अति सर्वत्र वर्जयेत् ।

**भावार्थ:** श्लोकेऽस्मिन् आचार्येण चाणक्येन कथितम् अति सर्वत्र गर्हितम् । जनकनन्दिनी जानकी सीता अतीव रूपवती आसीत् । अत: रावणेन सा अपहृता । रावण: अतिगर्वी आसीत् । कस्यापि आदेशम् उपदेशं परामर्शं वा स: न शृणोति स्म । अत: स: रामेण निहत: । राजा वलि: स्वदानकर्मविषये सदा चिन्तयति । स्वयं महान् दानी इति गर्वमनुभवति । तदर्थं भगवता वलिना स्वर्गगति: प्राप्ता । अत: अति सर्वत्र गर्हितम् भवति । एतदर्थं अतिभाव: वर्जनीय: ।

**को हि भार: समर्थानां किं दूरं व्यवसायिनाम् ।**

**को विदेश: सुविद्यानां क: पर: प्रियवादिनाम् ।१३।**

**अन्वय :** समर्थानां क: हि भार: ? व्यवसायिनां किं दूरम् ? सुविद्यानां क: विदेश: ? प्रियवादिनाम् क: पर: ?

**भावार्थ:** महात्मना चाणक्येन श्लोकेऽस्मिन् कथ्यते । य: जन: समर्थ:, तस्य कृते किमपि कर्म कष्टकरं न भवति । स: सहजेन सर्वकार्यं सम्पादयति । स: स्वसामर्थ्येन सर्वविधं कर्म यथाकालं करोति । य: व्यवसायी स: कमपि स्थानं दूरम् इति न चिन्तयति । यस्मिन् स्थाने तस्य वाणिज्यं भवति स: तत्र याति । वाणिज्यार्थं तस्य कृते कमपि स्थानं दूरं नास्ति । ये विद्वांस: जना: सन्ति; तेषाम् आदर: सर्वत्र अस्ति । विद्वान् सर्वत्र पूज्यते । विदुषां कृते कोऽपि देश: विदेश: नास्ति । पुन: प्रियवादिन: जनस्य सर्वे बान्धवा: भवन्ति । तस्य न कोऽपि शत्रु: । कथ्यते - 'प्रियवाक्यप्रदानेन सव तुष्यन्ति जन्तव: ।'



Scanned with CamScanner

**एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।**

**वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ।१४।**

**अन्वय** : एकेन सुगन्धिना पुष्पितेन सुवृक्षेण सर्वं तत् वनं वासितं (भवति) । यथा सुपुत्रेण कुलं (वासितं भवति)।

**भावार्थः** श्लोकेऽस्मिन् चाणक्यः तस्मात् तदेव वक्तव्यं वचने का दरिद्रता । सुपुत्रविषये कथयति । वने बहवः वृक्षाः सन्ति । वृक्षेषु बहूनि पुष्पाणि विकसन्ति । परं यदि तानि पुष्पाणि सुवासितानि न सन्ति, तर्हि तैः पुष्पैः वनभूमिः सुवासिता न भवति, परन्तु एकेन सुवासितेन पुष्पेण वनभूमिः सुवासिता भवति । तथैव बहुपुत्रजातेन को लाभः ? पुत्राः सुपुत्राः न भवन्ति चेत् तैः किं वा प्रयोजनम् । तैः परिवारस्य पित्रोः वा को लाभः स्यात् । परं एकेन सुपुत्रेण परिवारस्य गौरवरक्षा भवति । परिवारः सम्मानितः भवति । परिवारजनाः सुपुत्रं प्राप्य गौरवान्विताः भवन्ति । कथ्यते 'वरमेकः गुणी पुत्रो न च मूर्खशतान्यपि ।'

**एकेन शुष्कवृक्षेण दह्यमानेन वह्निना ।**

**दह्यते तद्वनं सर्वं कुपुत्रेण कुलं यथा ।१५।**

**अन्वय** : वह्निना दह्यमानेन एकेन शुष्कवृक्षेण सर्वं तत् वनं दह्यते । यथा कुपुत्रेण कुलं (दह्यते) ।

**भावार्थः** कुपुत्रेण कुलः कथं कलंकितः स्यात् तदेव श्लोकेऽस्मिन् चाणक्येन वर्ण्यते । वने एकः शुष्कवृक्षः अस्ति । तेन वृक्षेण अग्निः संयोजितः भवति चेत् शुष्कवृक्षः ज्वलति । अग्निना दह्यमानेन तेन शुष्कवृक्षेण समग्रं वनं दह्यते एव । समग्रवनभूमिः विनष्टा भवति । तथैव वंशे एकः कुपुत्रः जायते चेत् तेन कुपुत्रेण कुलः कलुषितः नष्टः अपमानितः निन्दितः समालोचितः च भवेत् । तेन पुत्रेण वंशः कलंकितः भवति । अतः गृहस्थः स्वसन्तानस्य सुगुणविकाशाय यत्नं कुर्यात् ।

**एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना ।**

**आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी ।१६।**

**अन्वय** : यथा शर्वरी चन्द्रेण (आह्लादिता भवति) तथैव एकेनापि साधुना विद्यायुक्तेन सुपुत्रेण सर्वं कुलम् आह्लादितं (भवति)।

**भावार्थः** श्लोकेऽस्मिन् विद्यायुक्त - सुपुत्रस्य गौरवं चाणक्यः वर्णयति । अनेकमूर्खपुत्रैः गौरवं न प्राप्यते । एकेन विद्यायुक्तेन सुपुत्रेण पितरौ गौरवम् अनुभवतः । परिवारजनाः सुपुत्रेण गौरवयुक्ताः भवन्ति । सुपुत्रस्य सुगुणेन वंशः

NOTES



Scanned with CamScanner

समुज्जलः स्यात् । एकः चन्द्रः यथा सम्पूर्णम् अन्धकारं नश्यति । चन्द्रे उदिते अन्धकारः दूरीभूतः भवति । तथैव सुपुत्रस्य सुगुणेन कुलनाम सार्थकं भवति । तेन पुत्रेण परिवारस्य सर्वे सदस्याः आनन्दिताः भवन्ति । येन तेन पुत्रेण सर्वे गर्व गौरवं च अनुभवन्ति । यथा अन्धकाररात्रिः केभ्यः न रोचते तथैव कुपुत्रोऽपि कस्मै न रोचते । परन्तु कुपुत्रेण कुलः निन्दितः घृणितः अपमानितः च भवति ।

कथ्यते - वरमेको गुणी पुत्रो न च मूर्खशतान्यपि,
एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि च ।

**किं जातैर्बहुभिः पुत्रैः शोकसन्तापकारकैः ।**
**वरमेकः कुलालम्वी यत्र विश्राम्यते कुलम् ।१७।**

**अन्वय** : शोकसन्तापकारकैः बहुभिः पुत्रैः जातैः किम् ? एकः कुलालम्वी वरम्। यत्र कुलं विश्राम्यते ।

**भावार्थः** श्लोकेऽस्मिन् आचार्य्यः चाणक्यः कथयति - शोकसन्तापकारकैः बहुभिः पुत्रैः किं प्रयोजनम्? ते पुत्राः केवलं सर्वेभ्यः दुःखं प्रयच्छन्ति । तेषां पुत्राणां व्यवहारः दुःखकारकः भवति । पितरौ दुःखम् अनुभवतः । परिवारजनाः दुःखं लभन्ते । तैः पुत्रैः सर्वे सन्तप्ताः भवन्ति । परन्तु एकः कुलालम्बी पुत्रः वरम् । सः सुपुत्रः कुलस्य आधारः भवति । तेन सुपुत्रेण कुलः स्वयं धन्यः भवति । तेन पुत्रेण कुलस्य गौरवरक्षा भवति । सुपुत्रं प्राप्य जननी जन्मभूमिः ग्रामः देशः च सर्वे धन्याः भवन्ति ।

**लालयेत् पञ्चवर्षाणि दशवर्षाणि ताड़येत् ।**
**प्राप्ते तु षोड़शे वर्षे पुत्रं मित्रवदाचरेत् ।१८।**

**अन्वय** : पञ्चवर्षाणि लालयेत् । दशवर्षाणि ताड़येत् । तु षोड़शे वर्षे प्राप्ते पुत्रं मित्रवत् आचरेत् ।

**भावार्थः** श्लोकेऽस्मिन् पुत्रपालनार्थं पित्रोः किं कर्त्तव्यं तदेव चाणक्येन कथितम् । जन्मनः आरभ्य पञ्चवर्षाणि श्रद्धापूर्वकं पितरौ पुत्रं लालयेताम् । तदनन्तरं पञ्चवर्षाणि इत्युक्तेः पञ्चदशवर्षं यावत् अनुशासनेन पालयेत् । आवश्यकं भवति चेत् दण्डविधानं करणीयम् । अनुशासनं विना सन्तानः शृङ्खलितः न स्यात् । परं यदा पुत्रे षोडशे वर्षे प्राप्ते तदा तेन पुत्रेण सह मित्रवत् आचरेत् । मित्रेण साकं यथा सम्मानपूर्वकं व्यवहारः क्रियते, पुत्रेण साकमपि तथैव व्यवहारः प्रदर्शनीयः ।



Scanned with CamScanner

**उपसर्गेऽन्यचक्रे च दुर्भिक्षे च भयावहे ।**

**असाधुजनसंपर्के यः पलायते जीवति ।१९।**

अन्वय : उपसर्गे अन्यचक्रे दुर्भिक्षे भयावहे असाधुजनसंपर्के च यः पलायते (सः) जीवति ।

भावार्थः श्लोकेऽस्मिन् आचार्येण चाणक्येन समयस्य आवश्यकताविषये कथ्यते । उपद्रवे उद्भवे तत् स्थानं परित्यक्तव्यम् । यतः उपद्रवस्थाने काऽपि क्षतिः भवेत् । काऽपि समस्या आगच्छत् । अतः यत्र समरः आरभ्यते तत्र तत्क्षणमेव अन्यत्र गन्तव्यम् । यत्र शत्रवः आक्रमणार्थं तत्पराः भवन्ति तत् स्थानमपि त्यक्तव्यम् । भयावहे दुर्भिक्षे आगते तत् स्थानं त्यक्त्वा अन्यत्र यथाशीघ्रं गन्तव्यम् । यतः दुर्भिक्षसमये महत् दुःखं जायते । तथैव कदाचित् खलजनेन साकं मित्रता भवति चेत् ततः कथंचित् पलायनं श्रेयस्करः स्यात् ।

अतः यः उपसर्गे दुर्भिक्षे असाधुजनसंपर्के न तिष्ठति अन्यत्र पलायनं करोति स एव जीवति ।

**धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते ।**

**जन्मजन्मनि मर्त्तेषु मरणं तस्य केवलम्।२०।**

अन्वय : धर्मार्थकाममोक्षाणां यस्य एकोऽपि न विद्यते । तस्य जन्मजन्मनि केवलं मरणं (भवति)।

भावार्थः श्लोकेऽस्मिन् आचार्यः चाणक्यः जीवनस्य निरर्थकतां कथयति । मानवजीवनस्य परमलक्ष्यमेव धर्मार्थकाममोक्ष- चतुर्वर्गफलप्राप्तिः । परं यः जनः स्वजीवने चतुर्वर्गेषु एकमपि न लभते, तस्य जीवनं निरर्थकं भवति । यः जनः संसारेऽस्मिन् सुकर्म करोति सः धर्मं लभते । सुकर्मणा धर्मप्राप्तिः स्यात् । यः संसारे अर्थोपार्जनं न करोति सः धनी न स्यात् । धनं विना जीवनं दुर्विषहं स्यात् । यः काम-भोगादीन् कर्त्तुम् असमर्थः भवति । यः प्रयत्नेन मोक्षप्राप्तिं न लभते । तस्य जीवनेन किम् ? सः यथा मर्त्यमण्डलं समायाति तथैव इतः इहलीलासम्वरणं करोति । तस्य जीवनं निरर्थकं भवति एव ।

**मूर्खा यत्र न पूज्यन्ते धान्यं यत्र सुसञ्चितम् ।**

**दाम्पत्ये कलहो नास्ति तत्र श्रीः स्वयमागता ।२१।**

अन्वय : यत्र मूर्खाः न पूज्यन्ते । यत्र धान्यं सुसञ्चितम् । दाम्पत्ये कलहः नास्ति । तत्र श्रीः स्वयमागता ।

NOTES



Scanned with CamScanner

**उपसर्गेऽन्यचक्रे च दुर्भिक्षे च भयावहे ।**

**असाधुजनसंपर्के यः पलायते जीवति ।१९।**

**अन्वय :** उपसर्गे अन्यचक्रे दुर्भिक्षे भयावहे असाधुजनसंपर्के च यः पलायते (सः) जीवति ।

**भावार्थः** श्लोकेऽस्मिन् आचार्येण चाणक्येन समयस्य आवश्यकताविषये कथ्यते । उपद्रवे उद्भवे तत् स्थानं परित्यक्तव्यम् । यतः उपद्रवस्थाने काऽपि क्षतिः भवेत् । काऽपि समस्या आगच्छत् । अतः यत्र समरः आरभ्यते तत्र तत्क्षणमेव अन्यत्र गन्तव्यम् । यत्र शत्रवः आक्रमणार्थं तत्पराः भवन्ति तत् स्थानमपि त्यक्तव्यम् । भयावहे दुर्भिक्षे आगते तत् स्थानं त्यक्त्वा अन्यत्र यथाशीघ्रं गन्तव्यम् । यतः दुर्भिक्षसमये महत् दुःखं जायते । तथैव कदाचित् खलजनेन साकं मित्रता भवति चेत् ततः कथंचित् पलायनं श्रेयस्करः स्यात् ।

अतः यः उपसर्गे दुर्भिक्षे असाधुजनसंपर्के न तिष्ठति अन्यत्र पलायनं करोति स एव जीवति ।

**धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते ।**

**जन्मजन्मनि मर्त्तेषु मरणं तस्य केवलम्।२०।**

**अन्वय :** धर्मार्थकाममोक्षाणां यस्य एकोऽपि न विद्यते । तस्य जन्मजन्मनि केवलं मरणं (भवति)।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः जीवनस्य निरर्थकतां कथयति । मानवजीवनस्य परमलक्ष्यमेव धर्मार्थकाममोक्ष- चतुर्वर्गफलप्राप्तिः । परं यः जनः स्वजीवने चतुर्वर्गेषु एकमपि न लभते, तस्य जीवनं निरर्थकं भवति । यः जनः संसारेऽस्मिन् सुकर्म करोति सः धर्मं लभते । सुकर्मणा धर्मप्राप्तिः स्यात् । यः संसारे अर्थोपार्जनं न करोति सः धनी न स्यात् । धनं विना जीवनं दुर्विषहं स्यात् । यः काम-भोगादीन् कर्त्तुम् असमर्थः भवति । यः प्रयत्नेन मोक्षप्राप्तिं न लभते । तस्य जीवनेन किम् ? सः यथा मर्त्यमण्डलं समायाति तथैव इतः इहलीलासम्वरणं करोति । तस्य जीवनं निरर्थकं भवति एव ।

**मूर्खा यत्र न पूज्यन्ते धान्यं यत्र सुसञ्चितम् ।**

**दाम्पत्ये कलहो नास्ति तत्र श्रीः स्वयमागता ।२१।**

**अन्वय :** यत्र मूर्खाः न पूज्यन्ते । यत्र धान्यं सुसञ्चितम् । दाम्पत्ये कलहः नास्ति । तत्र श्रीः स्वयमागता ।



Scanned with CamScanner

NOTES

**भावार्थ:** लक्ष्मीः स्वयं कुत्र समायाति तत् श्लोकेऽस्मिन् आचार्येण चाणक्येन प्रतिपादितम् । यत्र मूर्खाणां कृते सम्मानलाभः न भवति । मूर्खाः यत्र न आदृताः भवन्ति । यत्र मूर्खाणां पूजनं न भवति । कथनस्य अयमेवाभिप्रायः यस्मिन् गृहे एकोऽपि मूर्खः नास्ति । शस्यैः खाद्यपदार्थैः धान्यैः सुमिष्टद्रव्यैः च यत् गृहं परिपूर्णं भवति । यस्मिन् गृहे दाम्पत्ये कलहः न भवति तत्र स्वयं लक्ष्मीः निवासाय समायाति । अत्र एवं विचारणीयम् - देशस्य समृद्धये जनानां सन्तोषाय च मूर्खान् परित्यज्य विद्वांसः पूजनीयाः । दुःसमयस्य कृते खाद्यसंग्रहणार्थं प्रयत्नः विधेयः । गृहे विवादवातावरणं सर्वदा परित्यक्तव्यम् । यत्र विदुषां समादरः मूर्खाणां तिरस्कारः पुनः शस्यसमृद्धिः परिवारे सद्भावः च भवेयुः तत्र सर्वविधप्रगतिः स्यात् । देशे धनद्रव्यादीनां क्रमोन्नतिः भवेत्, अत्र नास्ति कश्चित् सन्देहः । एतादृशाचरणेन देशः समुन्नतः भवेत् ।

## चतुर्थोऽध्यायः

**आयुः कर्म च वित्तं च विद्या निधनमेव च ।**

**पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः ।१।**

**अन्वय :** गर्भस्थस्य देहिनः एव आयुः कर्म वित्तं विद्या निधनं च एव पञ्चैतानि सृज्यन्ते ।

**भावार्थ:** श्लोकेऽस्मिन् आचार्यः चाणक्यः कथयति - मातृगर्भे जीवस्य आयु-कर्म-धन- विद्या-मरणविषयाः निर्दिष्टाः भवन्ति । अर्थात् गर्भस्थसमये जीवस्य भाग्ये एतानि लिखितानि भवन्ति । शिशौ जाते परवर्त्तिनि समये एतेषां परिवर्त्तनं न स्यात् । यस्य परमायुः यथा सः तथैव कालं यावत् जीवति । एकं मुहूर्त्तम् अधिककालः न जीवति । मानवः यत् कर्म करोति तत् पूर्वनिर्दिष्टम् । सः स्वेच्छया कर्म कर्तुं न शक्नोति । पूर्वार्जितं धनं जनः लभते । तस्य भाग्ये यत् धनमस्ति तस्य धनस्य स एव अधिकारी भवेत् । पूर्वजन्मकर्मानुसारं मानवः विद्यां लभते । यस्य भाग्ये यथा विद्यालाभः लिखितः सः तस्याः विद्यायाः अधिकारी भवति । तथैव यदा मृत्युकालः समुपस्थितः तदा जनं कोऽपि रक्षितुं न समर्थः । कथ्यते रज्जुच्छेदे कः घटं धारयति ? तथैव मृत्युकाले आगते कोऽपि यमपाशात् त्रातुं समर्थः नास्ति । पुनरपि कथ्यते - भाग्यं फलति सर्वत्र न विद्या न च पौरुषम् ।

**साधुभ्यस्ते निवर्त्तन्ते पुत्रमित्राणि बान्धवाः ।**

**ये च तैः सह गन्तारस्तद्धर्मात् सुकृतं कुलम् ।२।**

**अन्वय :** पुत्रमित्राणि बान्धबाः च साधुभ्यः निवर्त्तन्ते । ये तैः सह गन्तारः तत् धर्मात् कुलं सुकृतं (भवति)।



Scanned with CamScanner

**भावार्थः** श्लोकेऽस्मिन् चाणक्यः सन्थसेवायाः महत्त्वं प्रतिपादयति । पुत्राः मित्राणि बान्धवाः च एते साधूनाम् उपदेशात् निवृत्ताः भवन्ति । परन्तु ये साधून् अनुकुर्वन्ति । तेषां पुण्यकर्मणा कुलं सुकृतं स्यात् ।

प्रायतः साधुसेवायाः महत्त्वं सर्वे न जानन्ति । ये जानन्ति ते एव साधुसेवां कुर्वन्ति । आदि गुरुशङ्कराचार्य्येण कथितम् "क्षणमिह सज्जनसंगतिरेका भवति भवार्णवतरणे नौका ।" सज्जनसंगतिः गतिमुक्तिप्रदायिनी । ये जनाः महतां परिवेशे कालातिपातं कुर्वन्ति ते धन्याः तेषां कुलमपि पवित्रं भवेत् । साधुजनसंगेन कुलोद्धारः स्यात् । तेषां सदाचारेण परिवारः समुज्जलः भवति । परिवारजनाः तदर्थं गर्वं कुर्युः । मानवः जानाति शरीरमिदं नश्वरम् । अतः सांसारिककार्यात् मुक्तः सन् सुकर्म कुर्यात् ।

**दर्शन-ध्यान-संस्पर्शैमत्सी कुर्मी च पक्षिणी ।**

**शिशुं पालयते नित्यं तथा सज्जनसंगतिः ।३।**

**अन्वय :** मत्सी कुर्मी पक्षिणी च दर्शन-ध्यान-संस्पर्शैः शिशुं पालयते । तथा सज्जनसंगतिः नित्यं (पालयेत्) ।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः कथयति - मीनाः कच्छपाः पक्षिण्यः च यथा दर्शनेन स्पर्शनेन मनोयोगम् वा सन्तानान् पालयन्ति । तथैव सत्संगतिः सत्संगजनान् पालयति । मत्सी स्वसन्तानं असकृत् पश्यन्ती पालयति । कुर्मी मनोयोगपूर्वकं सन्तानं पश्यन्ती पालयति । पक्षिणी स्वार्भकं संस्पर्शेण पालयति । ये खलु सज्जनाः सन्ति, ते मानवान् पश्यन्तः मनोयोगर्पूकं पालयन्ति ।

**यावत्स्वस्थो ह्ययं देहो यावन्मृत्युश्च दूरतः ।**

**तावदात्महितं कुर्यात् प्राणान्ते किं करिष्यति ।४।**

**अन्वय :** अयं देहः यावत् स्वस्थः, यावत् दूरतः मृत्युः तावत् आत्महितं कुर्यात् । प्राणान्ते किं करिष्यति ?

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः आत्मकल्याणस्य प्रशास्तमार्गविषये सूचयति । मानवः यावत् सुस्थः तिष्ठति मृत्युः तावत् दूरे तिष्ठति । अस्मिन्नेव समये आत्मनः कल्याणं कुर्यात् । जीवने गत्ते को वा किं कर्त्तुं समर्थः स्यात् । केवलं पश्चातापः स्यात् । प्रायः सुस्थमानवः मृत्योः न विभेति । मृत्युः सुस्थमानवाद् दूरे तिष्ठति । अस्मिन् काले आत्मानं परमात्मानं च विज्ञाय आत्मकल्याणं कुर्यात् । मृत्योः परं न किमपि कर्त्तुं शक्यते ।

NOTES



Scanned with CamScanner

NOTES

**कामधेनुगुणा विद्या ह्यकाले फलदायिनी ।**

**प्रवासे मातृसदृशी विद्या गुप्तं धनं स्मृतम् ।५।**

**अन्वय :** विद्या कामधेनुगुणा । हि अकाले फलदायिनी । प्रवासे मातृसदृशी (अत:) विद्या गुप्तं धनं स्मृतम् ।

**भावार्थ:** आचार्येण चाणक्येन कथितं यत् - काल: अग्रे चलति । काल: निष्करुण: अस्ति । महाभारते कथ्यते - अहनि अहनि भूतानि गच्छन्तीह यमालयम् । कदा कोऽपि रोगग्रस्त: सन् यमालयं गमिष्यति तदा तं क: रक्षितुं न शक्नोति । कदा यम: यमदूत: वा आगच्छेत् तत् वक्तुं न शक्यते ।

एतदर्थं मानव: पुण्यकर्म कुर्यात् । यत: काले विश्वास: नैव करणीय: । यथाकालं यत् करणीयं तत् कर्त्तव्यमेव ।

श्लोकेऽस्मिन् आचार्येण चाणक्येन विद्या कामधेनुसमा इति प्रतिपादितम् । अत्र विद्याया: महत्त्ववर्णनाप्रसङ्गे विद्यया किं प्रयोजनं पुन: विद्याया: का उपयोगिता तत् आलोच्यते । विद्या कामधेनुसमा अस्ति । विद्यायां अनेके गुणा: विद्यन्ते । दु:खसमये विद्या सर्वविधसाहाय्यं करोति । प्रवासे मातृतुल्या भवति विद्या । विद्या गुप्तधनसमा यथाकालं सहायतां करोति ।

विद्या कामधेनुवत् सर्वेषां कामनापूर्णं करोति । दु:समये प्रायत: सर्वे संपर्कं त्यजन्ति, परं असमये दु:खकाले वा विद्या सम्पर्कं न परित्यजति । यदा मानव: गृहं परित्यज्य दूरे निवसति दूरस्थानं गच्छति वा तत्र विद्या मातृवत् तस्य सुरक्षाविषये तत्परा भवति । विद्या गुप्तधनम् । गुप्तधनस्य कमपि सन्धानं न लभते । तथैव विद्याया: सन्धानप्राप्ति: दुर्लभा स्यात् । विद्याया: रूपं दृष्टिपथे नायाति । केवलं जन: विद्याम् अनुभवति । विद्याधनं चौरेण न अपहृतम् । विद्याधनं सदा सुरक्षितं विश्वसनीयं च । उक्तं च -

ज्ञातिभि: वण्ट्यते नैव चौरेणापि न नीयते ।

दानेन न क्षयं याति विद्यारत्नं महाधनम् ।

**एकोऽपि गुणवान् पुत्रो निर्गुणैश्च शतैर्वर: ।**

**एकश्चन्द्रस्तमोहन्ति न च तारा: सहस्रश: ।६।**

**अन्वय :** शतै: निर्गुणै: एक: गुणवान् पुत्र: वर: । एक: चन्द्र: तम: हन्ति, न सहस्रश: तारा:।

**भावार्थ:** श्लोकेऽस्मिन् आचार्य: चाणक्य: एकस्य गुणवत: पुत्रस्य महत्त्वं प्रतिपादयति ।

प्रायतः जनाः पुत्रान् इच्छन्ति । एकाधिकाः मूर्खाः पुत्राः जायन्ते चेत् तेन न कोऽपि लाभः । शतं मूर्खपुत्रैः केवलं दुःखं लभते । शतैः मूर्खपुत्रैः गुणहीनपुत्रैः वा पितरौ सुखं न लभेते । शतैः निर्गुणैः पुत्रैः अपेक्षया एकः गुणवान् पुत्रः श्रेयस्करः असंख्यतारकाः अन्धकारं दूरीकर्त्तुम् असमर्थाः परन्तु एकः चन्द्रः अन्धकारं दूरीकरोति । एकः चन्द्रः अन्धकारं नश्यति पुनः तस्य ज्योत्स्ना आह्लादयति । तथैव एकेन सुपुत्रेण वंशः गौरवयुक्तः भवति । परिवारे आनन्दः विराजते । एकेन गुणिपुत्रेण देशः धन्यः भवति । उक्तम् च

'एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।

वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ।।

**मूर्खश्चिरायुर्जातोऽपि तस्माज्जातमृतो वरः ।**

**मृतः स चाल्पदुःखाय यावज्जीवं जड़ो दहेत् ।७।**

**अन्वय** : मूर्खः चिरायु जातः अपि तस्मात् जातमृतः वरः । सः मृतः च अल्पदुःखाय । जड़ः यावत् जीवं दहेत् ।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः मूर्खपुत्रस्य निरर्थकताविषये कथयति । मूर्खपुत्रः चिरायुः भवति चेत् तेन दुःखं लभते । तत् दुःखं नित्यं आजीवनं जनकः लभते । चिरायुः मूर्खः पुत्रः जातसमये मृतः भवति चेत् सकृत् दुःखं भवति । तस्य मरणेन पित्रोः कृते सकृत् दुःखं समायाति । परन्तु दीर्घजीवी भवति चेत् प्रतिमुहूर्त्तं सः दुःखं ददाति । तस्य मृत्युं यावत् दुःखं मिलति ।

अत्र मानवसमाजं प्रति चाणक्यः सूचयति- प्रायतः सर्वे स्वसन्तानेषु स्निह्यन्ति । पुत्राः मूर्खाः भवन्ति चेत् स्वसन्तानानां कुकर्म प्रति पितरः दृष्टिक्षेपं न कुर्वन्ति । येन भविष्यत् काले ते पुत्राः सर्वदैव दुःखं प्रयच्छन्ति ।

कथ्यते - पुत्रः योग्यः भवति चेत् धनसञ्चयेन को लाभः ? पुत्रः अयोग्यः भवति चेत् धनसञ्चयेन को लाभः ?

**कुग्रामवासः कुलहीन - सेवा, कुभोजनं क्रोधमुखी च भार्या ।**

**पुत्रश्च मूर्खो विधवा च कन्या, विनाग्निना षट् प्रदहन्ति कायम् ।८।**

**अन्वय** : कुग्रामवासः कुलहीनसेवा, कुभोजनं, क्रोधमुखी भार्या, मूर्खः पुत्रः विधवा कन्या च (एते) षट् विनाग्निना कायं प्रदहन्ति ।

**भावार्थः** श्लोकेऽस्मिन् अग्निं विना के कायं प्रदहन्ति तत् आचार्येण चाणक्येन प्रोक्तम् ।

NOTES



Scanned with CamScanner

NOTES

यस्मिन् ग्रामे दुर्जना: निवसन्ति तत्र वास: न कर्त्तव्य:, स: ग्राम: कुग्राम: भवति । तत्र निवास: क्लेशप्रदायक: स्यात् । कुलहीनजनानां सेवा न करणीया । कुलहीनजनानां सेवया न कोऽपि लाभ: । कुलहीनजनसंपर्कात् जन: निन्दित: घृणित: अपमानित: च भवति । कुभोजनं न करणीयम् । कुभोजनेन शरीरं रोगयुक्तं स्यात् । कुभोजनेन मन: कलुषितं भवेत् । कुकर्मकरणाय प्रवृत्ति: स्यात् । क्रोधमुखी भार्य्या परिहरणीया । अर्थात् क्रोधपरायणाया: भार्याया: दूरे तिष्ठेत् । क्रोधमुखी भार्या सदा क्लेशप्रदायिनी दु:खदायिनी यन्त्रणाकारिणी च भवति । मूर्ख: पुत्र: क्लेशदायक: । मूर्खपुत्रेण को लाभ: । मूर्खपुत्रेण सर्वदा पितरौ दु:खं लभन्ते । विधवा कन्या सदा दु:खं ददाति । अग्नि: सर्वं ज्वालयति । परं कुग्रामवास: कुलहीनसेवा कुभोजनं क्रोधमुखी भार्या मूर्ख: पुत्र: विधवा कन्या च अग्निं विना सर्वान् ज्वालयति ।

**किं तया क्रियते धेन्वा या न दोग्ध्री न गर्भिणी ।**

**कोऽर्थ: पुत्रेण जातेन यो न विद्वान् न भक्तिमान् ।९।**

**अन्वय :** तया धेन्वा किं क्रियते या न दोग्ध्री न च गर्भिणी । पुत्रेण जातेन कोऽर्थ:? य: न विद्वान् न भक्तिमान् ।

**भावार्थ:** श्लोकेऽस्मिन् आचार्य: चाणक्य: कथयति - यस्य उपयोगिता नास्ति तेन किं प्रयोजनम् ?

जना: गोसेवार्थम् इच्छन्ति । गोपालनं कुर्वन्ति। गोदुग्धं पातुम् इच्छन्ति । परन्तु या धेनु: गर्भिणी न भवति दुग्धं न ददाति तां धेनुं क्रेतुं को वा इच्छति । तया धेन्वा को लाभ: ? तथैव संसारे सर्वे पुत्रम् इच्छन्ति कालान्तरे ईश्वरस्य कृपया पुत्रवन्त: भवन्ति परन्तु ते पुत्रा: विद्वांस: न भवन्ति चेत् तै: पुत्रै: किं प्रयोजनम्? पुन: ये पुत्रा: पित्रो: भक्तिं न कुर्वन्ति तै: पुत्रै: कोऽर्थ:? ते पुत्रा: केवलं दु:खाय भवन्ति । तेषां पुत्राणां जन्मना को लाभ:? पुन: ईश्वरे भक्तिं ये पुत्रा: न कुर्वन्ति तै: पुत्रै: किं वा प्रयोजनम् ?

**संसार-ताप-दग्धानां त्रयो विश्रान्तिहेतव: ।**

**अपत्यं च कलत्रं च सतां संगतिरेव च ।१०।**

**अन्वय :** संसार-ताप-दग्धानां विश्रान्तिहेतव: त्रयो भवन्ति। अपत्यं कलत्रं सतां संगति: च एव।

**भावार्थ:** आचार्य: चाणक्य: श्लोकेऽस्मिन् सूचयति यत् - मानवानां दु:खसमये के शान्तिप्रदा: स्यु: ।

Scanned with CamScanner

NOTES

संसारेऽस्मिन् जनाः नानाविधदुःखेन दुःखिताः भवन्ति । संसारमायासागरे निमज्जिताः सन्तः दुःखं लभन्ते । तथापि जनाः संसारेऽस्मिन् शान्तिं लभन्ते। कदाचित् जनः दिवा कर्म कुर्वन् क्लान्तः सन् स्वगृहं प्रति समायाति तदा स्वगृहे स्वपुत्रमुखम् अवलोक्य शान्तिं लभते । कदाचित् कार्यालये कार्यं कुर्वन् स्वामी यदा क्लान्तः सन् स्वगृहमायाति तदा पत्न्याः मधुरं सम्भाषणं तस्मै शान्तिं प्रददाति । सा पत्या सह मधुरालापं करोति । सुमिष्टं खाद्यं प्रददाति । येन पतिः सुखमनुभवति । जनः यदा असह्यदुःखेन सन्तप्तः भवति तदा साधुजनसंगतिः शान्तिं ददाति । शङ्कराचार्येण कथितम् - ''क्षणमिह सज्जनसंगतिरेका भवति भवार्णवे तरणे नौका ।'' साधुजनस्य ज्ञानोपदेशः शान्तिप्रदायकः भवेत् ।

अतः आज्ञाकारी सन्तानः पतिव्रता नारी साधुसंगतिः च एते त्रयः मानवजीवने साधनरूपेण कार्यं कुर्वन्ति ।

**सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति पण्डिताः ।**

**सकृत्कन्याः प्रदीयन्ते त्रीण्येतानि सकृत्सकृत् ।११।**

**अन्वय :** राजानः सकृत् जल्पन्ति, पण्डिताः सकृत् जल्पन्ति । कन्याः सकृत् प्रदीयन्ते । एतानि त्रीणी सकृत् सकृत् ।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः किं किं सकृत् प्रदीयते तत् वर्णयति । राजानः सकृत् वदन्ति । सकृत् आदेशं प्रयच्छन्ति । राज्ञाम् आदेशं जनाः पालयन्ति । सज्जनाः यत् कथयन्ति तत् सकृत् कथयन्ति । असकृत् न कथयन्ति । सज्जनानां पण्डितानां सकृत् वचनं अपरे जनाः स्वीकुर्वन्ति । पितरौ स्वकन्यां सकृत् सुयोग्यवराय प्रयच्छतः । असकृत् कन्या न प्रदीयते ।

श्लोकेऽस्मिन् विधवा विवाहप्रथा न स्वीक्रियते । राज्ञाम् आदेशः पालनीयः । पण्डितानाम् उपदेशः ग्रहणीयः । ये सज्जनाः तेषां कृते सकृत् वक्तव्यम् । ते एव वचनस्य गुरुत्वम् अनुभवन्तः तदनुरूपं कार्यकरणाय अग्रे समायान्ति ।

**एकाकिना तपो द्वाभ्यां पठनं गायनं त्रिभिः ।**

**चतुर्भिर्गमनं क्षेत्रं पञ्चभिर्बहुभी रणम् ।१२।**

**अन्वय :** एकाकिना तपः, द्वाभ्यां पठनं, त्रिभिः गायनं, चतुर्भिः गमनं, पञ्चभिः क्षेत्रं बहुभी रणम् ।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः कदा किं करणेन जनः जीवने साफल्यं लभते तत् कथयति । जनः एकाकी तपस्यां कुर्यात् । यतः तपस्याकाले मनसि एकाग्रता स्यात् । अतः तपस्वी सदा एकाकी तपः आचरति । तपस्याफलमपि

NOTES

लभते । पाठपठनसमये द्वौ जनौ पठेताम् । पठनकाले तौ द्वौ परस्परं पाठं पृच्छन्तौ समस्यासमाधानं कुर्याताम् । परन्तु संगीतगानकाले त्रय: जना: अपेक्षिता: भवेयु: । त्रयाणां जनानां सहयोगेन संगीतं श्रुतिमधुरं भवेत् । यदा नर: कुत्रापि गमनागमनं करोति तदा चत्वार: मिलित्वा गच्छेयु: । यत: चतुर्णां जनानां मिलितसहयोगेन गमनं सुखकरं शुभप्रदं लाभप्रदं च भवति । क्षेत्रे यदा कार्यस्य आवश्यकता अनुभूयते तदा पञ्चजना: मिलित्वा कृषिकार्यं कुर्य्यु: । कृषिकायार्थं पञ्चजनानां सहयोग: नितराम् अपेक्षितम् । परन्तु रणाङ्गने अनेके सैन्या: अपेक्षिता: सन्ति । यस्मिन् पक्षे अधिकसैन्या: सन्ति तेषां कृते विजयलाभ: सुकरं भवेत् । तर्हि युद्धक्षेत्रे बहूनां जनानाम् आवश्यकता विद्यते ।

**सा भार्या या शुचिर्दक्षा सा भार्या या पतिव्रता ।**

**सा भार्या या पतिप्रीता सा भार्या सत्यवादिनी ।१३।**

**अन्वय :** सा भार्या या शुचिर्दक्षा, सा भार्या या पतिव्रता । सा भार्या या पतिप्रीता सा भार्या या सत्यवादिनी ।

**भावार्थ:** श्लोकेऽस्मिन् आचार्येण चाणक्येन भार्याया: लक्षणं प्रतिपादितम् । सा एव भार्या या पवित्रस्वरूपा गृहकर्मप्रवीणा पतिव्रता प्रीतिनिबद्धा सत्यवादिनी च ।

सा एव आदर्शपत्नी या मनसि वचसि कर्मणि सदा पवित्रकर्मकरणाय प्रेरिता भवति । तस्या: भार्याया: शरीरम् अन्त:करणं च शुद्धं स्यात् । आचार-विचारे तस्या: स्वच्छता भवेत् । गृहकार्ये निपुणा स्यात् । पाककार्ये सुनिपुणा गृहपदार्थानां यत्न: गृहसज्जीकरणे दक्षता पुन: मनसि वचसि शरीरे च पतिं प्रति अनुरक्ता स्यात् । पतिप्रसन्नाय कर्म करणीयम् । स्वामिन: समीपे सर्वदा सत्यकथनं करणीयम् । पत्यु: मनसि यथा कदाचित् सन्देह: न स्यात् तथा कर्त्तव्यम् । एतादृशगुणयुक्तनारीणां गृहं स्वर्गसमं भवेत् । अन्यथा गृहं अशान्तपूर्णं भवेत् ।

**अपुत्रस्य गृहं शून्यं दिश: शून्यास्त्वबान्धवा: ।**

**मूर्खस्य हृदयं शून्यं सर्वशून्या दरिद्रता ।१४।**

**अन्वय :** अपुत्रस्य गृहं शून्यम् तु अबान्धवा: दिश: शून्या: । मूर्खस्य हृदयं शून्यम्, दरिद्रता सर्वशून्या (भवति)।

**भावार्थ:** दरिद्रजनस्य कथं सर्वं शून्यं तत् श्लोकेऽस्मिन् आचार्येण चाणक्येन प्रोक्तम् । य: अपुत्र: तस्य गृहं शून्यमेव । पुत्रं विना गृहस्य पूर्णता नास्ति । बन्धुविहीनजनस्य दिश: शून्या: । बन्धुं विना जन: कुत्र गमिष्यति केन मार्गेण सफलतां प्राप्स्यति का: दिश: अनुसरणीया: एतत् सर्वं जन: ज्ञातुं न शक्नोति ।

Scanned with CamScanner

NOTES

मूर्खस्य हृदयं शून्यं भवति । मूर्खस्य हिताहितज्ञानं नास्ति । तस्मै उपदेशः न रोचते । तस्य हृदयं सर्वदैव शून्यम् । परन्तु यः दरिद्रः तस्य कृते सर्वं शून्यमेव । तस्य गृहं शून्यं , तस्य कृते देशः परिवेशः संसारः च सर्वं शून्यम् । संसारे दरिद्रस्य आदरः न स्यात् । सम्मानः नैव लभ्यते । सुखं दुर्ल्लभम् । शान्तिः दिवा स्वप्नवत् । सर्वैः निन्दितः घृणितः अपमानितः दलितः अनादृतः च भवति दरिद्रः । अतः दरिद्रता दूरीकरणीया ।

**अनभ्यासे विषं शास्त्रमजीर्ण्णे भोजनं विषम् ।**

**दरिद्रस्य विषं गोष्ठी वृद्धस्य तरुणी विषम् ।१५।**

**अन्वय** : अनभ्यासे शास्त्रं विषम्, अजीर्ण्णे भोजनं विषम् । दरिद्रस्य गोष्ठी विषम् । वृद्धस्य तरुणी विषम् ।

**भावार्थः** श्लोकेऽस्मिन् किं किं कस्य कस्य विषं तत् आचार्येण चाणक्येन प्रतिपादितम् । जनः शास्त्राध्ययनं करोति । शास्त्रार्थम् अवगच्छति । परं मध्ये मध्ये शास्त्राध्ययनं करणीयम् । अभ्यासं विना शास्त्रलब्धं ज्ञानं विस्मरणं भवेत्। शरीररक्षार्थं भोजनं करणीयम् । किन्तु अजीर्णकाले भोजनं न करणीयम् । अजीर्णे भोजनेन उदरे पीडा स्यात् । दरिद्रस्य कृते सभा-समितिः विषतुल्या भवति । वृद्धजनस्य कृते तरुणी विषसमा भवति ।

अतः ज्ञानस्य सुरक्षार्थं ज्ञानाभ्यासः कर्त्तव्यः । रुचिकरं भोजनं भोक्तव्यं परं यथा शरीरस्य कृते क्षतिकारकं न स्यात् तत् अवधारणीम् । निर्धनस्य कृते सभास्थलं विषतुल्यं स्यात् यतः तत्र धनिनां समावेशः दृश्यते । तरुण्यः उपभोगाय स्पृहयन्ति । वृद्धाः तासां कामनां पूरयितुम् अयोग्याः भवन्ति। एतदर्थं बृद्धानां कृते तरुणी विषतुल्या भवति ।

**त्यजेद्धर्मं दयाहीनं विद्याहीनं गुरुं त्यजेत् ।**

**त्यजेत् क्रोधमुखीं भार्यां निःस्नेहान्बान्धवान् त्यजेत् ।१६।**

**अन्वय** : दयाहीनं धर्मं त्यजेत् । विद्याहीनं गुरुं त्यजेत् । क्रोधमुखीं भार्यां त्यजेत् । निःस्नेहान् बान्धवान् त्यजेत् ।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः किं किं त्यजेत् तत् कथयति । सर्वेषु धर्मेषु दया अस्ति । परं यस्मिन् धर्मे दया नास्ति । सः धर्मः परित्यक्तव्यः । गुरौ भक्तिः करणीया । गुरुः सदा पूजनीयः, गुरोः आदेशपालनं सर्वेषां कर्त्तव्यम् । गुरोः कृपया छात्रः विद्वान् भवति । किन्तु गुरुः विद्याहीनः भवति चेत् सः गुरुः त्यक्तव्यः । पत्नी आदरणीया सम्माननीया स्नेहास्पदा च भवति । परन्तु भार्या



Scanned with CamScanner

NOTES

क्रोधमुखी भवति चेत् सा सदा परिवर्जनीया । बन्धुभि: सह स्नेहसंपर्क: स्थापनीय: । बान्धवा: स्नेहबन्धनेन आवद्धा: न भवन्ति चेत् ते त्यंक्तव्या: ।

अत: दयाहीनं धर्मं विद्याहीनं गुरुं क्रोधमुखिनीं भार्यां स्नेहश्रद्धाहीनं बान्धवं सदा त्यजेत् ।

**अध्वा जरा मनुष्याणां वाजिनां बन्धनं जरा ।**

**अमैथुनं जरा स्त्रीणां वस्त्राणामातपो जरा ।१७।**

**अन्वय :** मनुष्याणां अध्वा जरा, बाजिनां बन्धनं जरा । स्त्रीणां अमैथुनं जरा, वस्त्राणाम् आतप: जरा ।

**भावार्थ:** आचार्य: चाणक्य: श्लाकेऽस्मिन् बार्द्धक्यस्य लक्षणं प्रतिपादयति । नर: मार्गेण गच्छन् यदा क्लान्त: भवति तदा बार्द्धक्यं ज्ञातुं पारयति । धावितुम् असमर्थ: बन्धनयुक्त: अश्व: बार्द्धक्यावस्थां लभते । मैथुनं कर्त्तुं या नारी असमर्था सा एव बृद्धा भवति । प्रखरातपे शुष्कमानं वस्त्रं जराग्रस्तं स्यात् ।

वास्तवत: वृद्धजन: दुर्वल: भवति । स: सुस्थजनवत् दीर्घं कालं मार्गेण चलितुं असमर्थ: भवति । गमनकाले विश्रामं नयति अत: स बृद्ध: भवति । अश्व: धावनप्रिय: । धावितुं तस्य महती इच्छा, परं स: बन्धनात् मुक्त: सन् धावितुं न समर्थ: । अत: बार्द्धक्यवत् एकस्थाने तिष्ठति । वयसाधिक्यात् नारी मैधुनं कर्त्तुम् अयोग्या भवति । अत: पुरुषेण सा त्यक्तव्या । सा बृद्धा भवति । ग्रीष्मकाले महान् आतप: भवति । तैन आतपेन वस्त्रं शीघ्रं शुष्यति । तेन वस्त्राणां वार्द्धक्यं ज्ञायते ।

**क: काल: कानि मित्राणि को देश: कौ व्ययागमौ ।**

**कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहु: ।१८।**

**अन्वय :** क: काल:? कानि मित्राणि ? क: देश:? कौ व्ययागमौ । अहं च क:? का च मे शक्ति:? मुहुर्मुहु: चिन्त्यम् ।

**भावार्थ:** कार्यकरणात् प्राक् सम्यक् विचारणीयम् इति श्लोकेऽस्मिन् चाणक्येन प्रतिपादितम्। क: प्रकृष्ट: काल: ? किं मित्रम् ? किं स्थानम् ? आयव्ययस्थिति: का ? मम शक्ति: कियती ?

अयं संसार: कर्ममय: । कर्म अवश्यं करणीयम् । परं कार्यारम्भात् प्राक् सम्यक् विचार: करणीय: । कार्यधारा निर्दिष्टा स्यात् । येन यथाकालं कर्म समाप्तं स्यात् । कार्यकरणाय क: प्रकृष्ट: समय: तदपि अवधारणीयम् । कार्यकरणकाले के बान्धवा: मम सहायका: भविष्यन्ति तदपि विचारणीयम् । तेन कर्मणा कियान्



Scanned with CamScanner

लाभः भविष्यति तदपि सम्यक् चिन्तनीयम् । कर्मसमापनाय कियत् धनम् आवश्यकं चापि पूर्वं निर्धारणीयम् । पुनः तेन कार्येण आयः सम्यक् भविष्यति न वा तदपि चिन्तनीयम् । अन्तिमे कार्यसमापनाय कियती शक्तिः आवश्यकी सा शक्तिः मयि अस्ति नास्ति वा । तत् सर्वं विचार्य कर्म करणीयम् । येन मानवः सफलतां प्राप्स्यति ।

**अग्निर्देवो द्विजातीनां मुनीनां हृदि दैवतम् ।**

**प्रतिमा स्वल्पबुद्धीनां सर्वत्र समदर्शिनाम् ।१९।**

**अन्वय** : द्विजातीनां देवः अग्निः मुनीनां हृदि दैवतम् । अल्पबुद्धीनां प्रतिमा । समदर्शिनाम् सर्वत्र।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः कथयति - अग्निः ब्राह्मणानां क्षत्रियाणां वैश्यानां च देवः अस्ति । यतः ब्राह्मणाः क्षत्रियाः वैश्याः च नित्यम् अग्निपूजनं कुर्वन्ति । देवाः मुनीनां हृदि निवसन्ति । यतः मुनयः देवतुल्याः भवन्ति । ये अल्पबुद्धियुक्ताः जनाः सन्ति ते मूर्त्तिमध्ये देवाः सन्ति इति विचारयन्ति । परन्तु ये समदर्शिनः जनाः सन्ति । ते सर्वत्र ईश्वरस्य सत्ताम् अनुभवन्ति । तेषां मतम् - ईश्वरः सर्वत्र विद्यते । मृण्मये काष्ठे सजीवे निर्जीवे च सर्वत्र ईश्वरः विद्यमानः इति समदर्शिनः कथयन्ति ।

## पञ्चमोऽध्यायः

**गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।**

**पतिरेव गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ।१।**

**अन्वय** : द्विजातीनां गुरुः अग्निः । वर्णानां गुरुः ब्राह्मणः । स्त्रीणां गुरुः पति एव । सर्वस्य गुरुः अभ्यागतः ।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः- अतिथिः सर्वेषां गुरुः इति सूचयति । ब्राह्मण-क्षत्रिय -वैश्यजनानां गुरुः एव अग्निः । केवलं ब्राह्मणं विहाय अन्येषां सर्वेषां वर्णानां गुरुः अस्ति । पतिः एव स्त्रीणां गुरुः । परं गृहागतः अतिथिः सर्वेषां गुरुः । यतः अतिथिः सहसा आगच्छति । तस्य न कोऽपि स्वार्थः स्यात् । सः आतिथेयस्य कल्याणं कामयति एव । एतदर्थं चाणक्यः अतिथिं श्रेष्ठव्यक्तिरूपेण स्वीकरोति ।

**यथा चतुर्भिः कनकं परीक्ष्यते निघर्षण-च्छेदन -ताप-ताडनैः ।**

**तथा चतुर्भिः पुरुषः परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा ।२।**

**अन्वय** : निघर्षण-च्छेदन -ताप-ताडनैः चतुर्भिः यथा कनकं परीक्ष्यते, तथा त्यागेन शीलेन गुणेन कर्मणा चतुर्भिः पुरुषः परीक्ष्यते ।



Scanned with CamScanner

NOTES

**भावार्थ:** पुरुष: कथं परीक्षणीय: तत् आचार्येण चाणक्येन श्लोकेऽस्मिन् प्रतिपादितम् । घर्षणेन छेदनेन तापप्रदानेन तथा च आघातेन सुवर्णं परीक्ष्यते । तथैव त्यागेन सत्स्वभावेन गुणेन आचरेण च पुरुष: परीक्ष्यते ।

सुवर्णस्य शुद्धतां ज्ञातुं प्रथमत: कषटि इति प्रस्तरे सुवर्णस्य घर्षणं क्रियते । पुन: सुवर्णस्य छेदनेन तस्य शुद्धता ज्ञायते । पुन: अग्नितापेन सुवर्णस्य प्रकृतरूपं ज्ञातुं शक्यते । अन्तिमे सुवर्णोपरि प्रहार: क्रियते । प्रहारेण सुवर्णस्य शुद्धता परीक्ष्यते । तथैव ये कुलीना: जना: तेषां त्यागात् स्वभावात् गुणात् कार्यकरणात् च महत्त्वं ज्ञायते । प्रायत: ये कुलीना: जना: ते त्यागशीला: सुशीला: विद्वांस: सत्कार्यकरणप्रिया: च भवन्ति ।

**तावद्भयेषु भेतव्यं यावत् भयमनागतम् ।**

**आगतं तु भयं वीक्ष्य प्रहर्त्तव्यमशङ्कया ।३।**

**अन्वय :** भयेषु तावत् भेतव्यम्, यावत् भयम् अनागतम् । आगतं भयं वीक्ष्य आशङ्कया प्रहर्त्तव्यम्।

**भावार्थ:** विपदि साहसम् अवलम्बनीयम् इति आचार्येण चाणक्येन श्लोकेऽस्मिन् प्रतिपादितम् । प्रायत: जना: विपद: विभ्यति । परं चाणक्य: कथयति । यावत् पर्यन्तं विपद् दूरे अस्ति तावत् भेतव्यम् । परन्तु यदा विपद् समीपवर्त्तिनी भवति तदा कदापि न भेतव्यम् । कथं विपद: जन: मुक्त: स्यात् तत् चिन्तनीयम् । विपदि आगतायां भयं न करणीयम् । धैर्य्यधारणपूर्वकं विपद: आत्मन: सुरक्षाविषये सहसा विचारणीयम् । भीता: जना: कुत्रापि कमपि कार्यं न कुर्यु: । भीत: जन: जीवनभागे अग्रसर: न स्यात् । एतदर्थं भयात् मुक्तये समस्यासमाधानमार्ग: अनुसरणीय: । वीराणां साहसिजनानाम् एष एव धर्म: ।

**एकोदरसमुद्भूता एकनक्षत्रजातका: ।**

**न भवन्ति समा: शीले यथा वदरिकण्टका: ।४।**

**अन्वय :** एकोदरसमुद्भूता एकनक्षत्रजातका: शीले समा: न भवन्ति । यथा बदरिकण्टका: ।

**भावार्थ:** श्लोकेऽस्मिन् चाणक्य: एकस्या: मातु: जातयो: सन्तानयो: स्वभाव: कथं समान: न भवति तत् विषये कथयति । कदाचित् एकस्या: मातु: यमजपुत्रौ जातौ । तयो: जन्मनक्षत्रम् अपि एकमेव । तथापि उभौ स्वभावेन न समानौ । तत्र किमपि व्यतिक्रमं स्यात् । अत्र विचारणीयं विल्ववृक्षे विल्वफलं कण्टकं च एकस्मिन् स्थाने जाते । परम् उभयो: स्वभाव: न समान: । तथैव एकस्मात्

Scanned with CamScanner

मातृगर्भात् जातौ यमजौ सन्तानौ स्वभावेन न समानौ तयोः आचरणेऽपि भिन्नता परिलक्ष्यते ।

**निःस्पृहो नाधिकारी स्यान्नाकामो मण्डनप्रियः ।**

**नाविदग्धः प्रियं ब्रूयात् स्फुटवक्ता न वञ्चकः ।५।**

**अन्वय** : अधिकारी निःस्पृहः न स्यात् । मण्डनप्रियः अकामः स्यात् । अविदग्धः प्रियं न ब्रूयात्। स्फुटवक्ता न वञ्चकः (स्यात्)।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः स्पष्टवक्तुः गुणान् वर्णयति । संसारेऽस्मिन् यः निस्पृहः वैरागी सः कस्मै कार्याय न स्पृहयति । अतः तस्मै कमपि कार्यभारं न दद्यात् । प्रायतः मण्डनप्रियः जनः कामी भवति । सः शृङ्गाररसास्वादनाय इच्छति । परं यः न कामी सः शृङ्गाररसाय न स्पृहयति । विद्वांसः सर्वदा सत्यं कथयन्ति । ते प्रियकरवचनं सदैव प्रकाशयन्ति । स्पष्टं सर्वं वदन्ति । परं वञ्चकः मूर्खः प्रियवादी न भवेत् ।

**मूर्खाणां पण्डिता द्वेष्या अधनानां महाधनाः ।**

**पराङ्गनाः कुलस्त्रीणां सुभगानां च दुर्भगाः ।६।**

**अन्वय** : मूर्खाणां पण्डिता द्वेष्या, अधनानां महाधनाः । पराङ्गनाः कुलस्त्रीणां सुभगानां च दुर्भगाः च (न पश्यन्ति)।

**भावार्थः** श्लोकेऽस्मिन् चाणक्यः के कान् प्रति द्वेषभावं प्रकटयन्ति तत् कथयति । मूर्खाः पण्डितेभ्यः द्रुह्यन्ति । ये निर्धनाः दरिद्राः भवन्ति ते धनिकजनान् प्रति द्वेषं प्रकटयन्ति । वाराङ्गनाः कुलवधूनां कृते द्वेषभावं प्रदर्शयन्ति । यतः तासां कुलवधूषु स्नेहभावः न स्यात् । अपरञ्च तासां वारांगनानां शरीरशोषणं स्यात् । पतिरहिताः दुर्भगाः नार्य्यः सुभगानां दर्शनेन असहमानाः भवन्ति । ताभ्यः ईर्ष्यन्ति । मनसा क्रन्दन्ति, भाग्यं निन्दन्ति च ।

**आलस्योपगता विद्या परहस्तगतं धनम् ।**

**अल्पबीजं हतं क्षेत्रं हतं सैन्यमनायकम् ।७।**

**अन्वय** : विद्या आलस्योपगता, धनं परहस्तगतं, क्षेत्रम् अल्पबीजं हतं अनायकं सैन्यं हतम् ।

**भावार्थः** श्लोकेऽस्मिन् केन किं हतं भवति तत् आचार्यः चाणक्यः सूचयति । आलस्यकारणात् विद्या उपगता स्यात् । आलस्यपरायणजनः निरन्तरं विद्याभ्यासं न करोति । येन अनभ्यासात् विद्या विषतुल्या भवति । परं यः स्वाध्यायं करोति

NOTES

विद्या तस्य समीपे तिष्ठति एव । धनं परहस्तगतं भवति चेत् तत् यथाकालं हस्तगतं न भवेत् । आवश्यकसमये मानवः धनं नैव लभते । अतः अन्यहस्तगतं धनं निरर्थकं भवति । अल्पवीजवपनेन क्षत्रं नष्टं स्यात् । अल्पवीजवपनेन क्षेत्रं शस्यपूर्णं न भवति तथैव सेनापतिं विना रणनीतिः निर्धारिता न भवेत् । पुनरपि सैन्याः मृत्युकवले पतेयुः ।

**अभ्यासाद् धार्य्यते विद्या कुलं शीलेन धार्य्यते।**

**गुणेन ज्ञायते त्वार्य्यः कोपो नेत्रेण गम्यते ।८।**

**अन्वय** : विद्या अभ्यासाद् धार्य्यते । कुलं शीलेन धार्य्यते। आर्यः तु गुणेन ज्ञायते । नेत्रेण कोपः गम्यते ।

**भावार्थः** अभ्यासेन विद्या चिरस्थायिनी भवेत् । अभ्यासं विना विद्या न स्थास्यति । निरन्तरम् अध्ययनेन विद्या धार्यते । जनस्य आचरणेन शीलेन तस्य कुलं ज्ञातुं शक्यते । शीलेन कुलपरिचयः ज्ञायते । गुणेन आर्यः ज्ञायते । मानवस्य कोपः नेत्रेण ज्ञायते ।

विद्वांसः सर्वदैव अध्ययनम् अध्यापनं च कुर्वन्ति । विद्यया साकं तेषां संपर्कः महान् । अतः विद्याम् आयत्तीकर्त्तुं ते सततं प्रयत्तमानाः भवेयुः । विद्यया मानवस्य शीलः परिज्ञायते । जनः मुखेन किमपि न वदति चेत् तस्य नेत्राभ्यां कोपभावः ज्ञायते ।

**वित्तेन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।**

**मृदुना रक्ष्यते भूपः सत् स्त्रिया रक्ष्यते गृहम् ।९।**

**अन्वय** : वित्तेन धर्मः रक्ष्यते । योगेन विद्या रक्ष्यते । मृदुना भूपः रक्ष्यते, स्त्रिया गृहं रक्ष्यते ।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः केन किं रक्षते तत् वर्णयति । धनेन जनः निजधर्मकर्त्तव्यं सम्यक् पालयितुं शक्नोति । सदाचार - योग - संयमादिभिः नियमैः विद्या सुरक्षिता भवति । राज्ञः मधुरस्वभावः तमेव रक्षति । मधुरस्वभावेन राजा सुरक्षितः स्यात् । उत्तमस्त्रिया गृहरक्षा सम्भवेत् । कथ्यते गृहिणी गृहमुच्यते । उत्तमा स्त्री गृहस्य सुरक्षां कर्त्तुं समर्था । तया गृहस्य परिवेशः आह्लाददायकः भवति । सा शिक्षिता भवति चेत् तया परिवारः शिक्षितः भवति, तया सन्तानाः सुशिक्षिताः भद्राः नम्राः सत्चरित्रयुक्ताः भवन्ति ।

**अन्यथा वेदपाण्डित्यं शास्त्रमाचारमन्यथा ।**

**अन्यथावदतः शान्तं लोकाः क्लिश्यन्ति चान्यथा ।१०।**

Scanned with CamScanner

**अन्वय** : वेदपाण्डित्यम् अन्यथा । शास्त्रमाचारम् अन्यथा । अवदतः शान्तम् अन्यथा लोकाः अन्यथा क्लिश्यन्ति ।

**भावार्थ**: श्लोकेऽस्मिन् मूर्खः परित्यक्तव्यः इति आचार्येण चाणक्येन प्रतिपादितम् । संसारेऽस्मिन् यः वेदं पाण्डित्यं शास्त्रं शान्तशिष्टजनं वृथा निन्दति क्लिश्यति सः स्वयं क्लेशयुक्तः स्यात् ।

वेदस्य गूढरहस्यं नावगम्य शास्त्रार्थम् अज्ञात्वा सदाचारिणः आचारम् अविगणय्य यः तादृशजनं निंदति, तं प्रति असदाचरणं करोति सः नूनमेव मूर्खः । यतः अस्य मूर्खस्य एतादृशेन आचरणेन वेदज्ञस्य शास्त्रज्ञस्य बुद्धिमतः सदाचारिणः शान्तस्वभावजनस्य वा कापि महत्त्वहानिः न भवति । यतः ये ऋषयः मुनयः सदाचारिणः बहुसाधनेन सामान्यजनानां कल्याणाय सर्वविधनियमविधानं कृतवन्तः तेषां विरोधः नोचितः । बिरोधात् तेषां कृते नूनम् अवज्ञा स्यात् एतदर्थं वेद-शास्त्र-सदाचार - महात्माविरोधी जनः सर्वदैव निन्दनीयः त्यक्तव्यः च ।

**दारिद्र्यनाशनं दानं शीलं दुर्गतिनाशनम् ।**
**अज्ञाननाशिनी प्रज्ञा भावना भयनाशिनी ।११।**

**अन्वय** : दानं दारिद्र्यनाशनं, शीलं दुर्गतिनाशनम्, प्रज्ञा अज्ञाननाशिनी, भावना भयनाशिनी ।

**भावार्थ**: श्लोकेऽस्मिन् कः कं नाशयति तत् आचार्यः चाणक्यः प्रतिपादयति । स्वसामर्थ्यानुसारं दानं दद्यात् । येन स्वस्य दानं दारिद्र्यता दूरं गच्छेत् । शीलस्वभावेन दुःखस्य अवसानं भवति । यः सदाचारी तस्य दुःखं न स्यात् । दुःखात् सः मुक्तः भवति । बुद्धिः अज्ञानं नश्यति । सुविचारणीया बुद्धिः जनस्य अज्ञानान्धकारं नश्यति । तादृशः जनः अज्ञाने न पतति । तस्य प्रखरा बुद्धिः कर्त्तव्यमार्गे उज्ज्वलवर्त्तिका भवति । भावनया भयस्य समाप्तिः जायते । जनः साहसी भवति । तेन साहसेन मनः दृढं स्यात् । तेन दृढमनोवलेन सः निर्भीकः सन् स्र्वकार्यं कर्त्तुं शक्नोति ।

**नास्ति कामसमो व्याधिर्नास्ति मोहसमो रिपुः ।**
**नास्ति कोपसमो वह्निर्नास्ति ज्ञानात्परं सुखम् ।१२।**

**अन्वय** : कामसमो व्याधिः नास्ति । मोहसमो रिपुः नास्ति । कोपसमो वह्निः नास्ति । ज्ञानात् परं सुखं नास्ति ।

**भावार्थ**: श्लोकेऽस्मिन् आत्मज्ञानाय उपदेशः प्रदीयते । संसारेऽस्मिन् सर्वे सुखमिच्छन्ति परन्तु सांसारिकमायामोहवशात् सुखं दुर्लभं स्यात् । कामसमः व्यधिः

NOTES

**अन्वय** : वेदपाण्डित्यम् अन्यथा । शास्त्रमाचारम् अन्यथा । अवदत: शान्तम् अन्यथा लोका: अन्यथा क्लिश्यन्ति ।

**भावार्थ**: श्लोकेऽस्मिन् मूर्ख: परित्यक्तव्य: इति आचार्येण चाणक्येन प्रतिपादितम् । संसारेऽस्मिन् य: वेदं पाण्डित्यं शास्त्रं शान्तशिष्टजनं वृथा निन्दति क्लिश्यति स: स्वयं क्लेशयुक्त: स्यात् ।

वेदस्य गूढरहस्यं नावगम्य शास्त्रार्थम् अज्ञात्वा सदाचारिण: आचारम् अविगणय्य य: तादृशजनं निदति, तं प्रति असदाचरणं करोति स: नूनमेव मूर्ख: । यत: अस्य मूर्खस्य एतादृशेन आचरणेन वेदज्ञस्य शास्त्रज्ञस्य बुद्धिमत: सदाचारिण: शान्तस्वभावजनस्य वा कापि महत्त्वहानि: न भवति । यत: ये ऋषय: मुनय: सदाचारिण: बहुसाधनेन सामान्यजनानां कल्याणाय सर्वविधनियमविधानं कृतवन्त: तेषां विरोध: नोचित: । बिरोधात् तेषां कृते नूनम् अवज्ञा स्यात् एतदर्थं वेद-शास्त्र-सदाचार - महात्माविरोधी जन: सर्वदैव निन्दनीय: त्यक्तव्य: च ।

**दारिद्र्यनाशनं दानं शीलं दुर्गतिनाशनम् ।**

**अज्ञाननाशिनी प्रज्ञा भावना भयनाशिनी ।११।**

**अन्वय** : दानं दारिद्र्यनाशनं, शीलं दुर्गतिनाशनम्, प्रज्ञा अज्ञाननाशिनी, भावना भयनाशिनी ।

**भावार्थ**: श्लोकेऽस्मिन् क: कं नाशयति तत् आचार्य: चाणक्य: प्रतिपादयति । स्वसामर्थ्यानुसारं दानं दद्यात् । येन स्वस्य दानं दारिद्र्यता दूरं गच्छेत् । शीलस्वभावेन दु:खस्य अवसानं भवति । य: सदाचारी तस्य दु:खं न स्यात् । दु:खात् स: मुक्त: भवति । बुद्धिः अज्ञानं नश्यति । सुविचारणीया बुद्धि: जनस्य अज्ञानान्धकारं नश्यति । तादृश: जन: अज्ञाने न पतति । तस्य प्रखरा बुद्धि: कर्त्तव्यमार्गे उज्ज्वलवर्त्तिका भवति । भावनया भयस्य समाप्ति: जायते । जन: साहसी भवति । तेन साहसेन मन: दृढं स्यात् । तेन दृढमनोवलेन स: निर्भीक: सन् स्वकार्यं कर्त्तुं शक्नोति ।

**नास्ति कामसमो व्याधिर्नास्ति मोहसमो रिपु: ।**

**नास्ति कोपसमो वह्निर्नास्ति ज्ञानात्परं सुखम् ।१२।**

**अन्वय** : कामसमो व्याधि: नास्ति । मोहसमो रिपु: नास्ति । कोपसमो वह्नि: नास्ति । ज्ञानात् परं सुखं नास्ति ।

**भावार्थ**: श्लोकेऽस्मिन् आत्मज्ञानाय उपदेश: प्रदीयते । संसारेऽस्मिन् सर्वे सुखमिच्छन्ति परन्तु सांसारिकमायामोहवशात् सुखं दुर्लभं स्यात् । कामसम: व्यधि:

NOTES



Scanned with CamScanner

NOTES

नास्ति । सांसारिकवासना मानवस्य महान् व्याधि: । मोह-मायासम: शत्रु: कोऽपि नास्ति । संसारमोहमायया जन: अज्ञान: भवति । हिताहितज्ञानं विस्मरति । अत: रोगवत् मायया स: पीडित: सन् दु:खं लभते । मानवस्य कृते कोपसम: वह्नि: नास्ति । क्रोधात् मानव: मोहान्ध: स्यात् । अग्निना यथा दग्ध: तथैव क्रोध: अग्निवत् मानवं दहति । मानव: मायाग्रस्त: सन् आत्मानं विस्मरति । अत: आत्मज्ञानमेव प्रकृतज्ञानम् ।

**जन्ममृत्यु हि यात्येको भुनक्त्येक: शुभाशुभम् ।**
**नरकेषु पतत्येक एको याति परां गतिम् ।१३।**

**अन्वय :** एक: जन्ममृत्यु हि याति । एक: शुभाशुभं भुनक्ति, एक: नरकेषु पतति । एक: परां गतिं याति ।

**भावार्थ:** विचित्रेऽस्मिन् संसारे मानव: एकाकी जन्म लभते । तस्य मानवस्य भाग्ये यत् शुभाशुभम् आयाति । मानव: एकाकी एव तत् भुनक्ति । मानव: एकाकी नर्के पतति । पुन: स: एकाकी मोक्षं प्राप्नोति । अत: मानव: जानीयात् सुखस्य दु:खस्य न कोऽपि दाता । मानव: यत् कर्म करोति तदनुरूपं फलं स्वयमेव लभते । निजकर्मफलं स्वयमेव एकाकी प्राप्नोति । एभि: कार्यै: कस्यापि सम्पर्क: न स्यात् ।

**तृणं ब्रह्मविद: स्वर्गस्तृणं शूरस्य जीवितम् ।**
**जिताक्षस्य तृणं नारी नि:स्पृहस्य तृणं जगत् ।१४।**

**अन्वय :** ब्रह्मविद: स्वर्ग: तृणम्, शूरस्य जीवितं तृणम्, जिताक्षस्य नारी तृणम् । नि:स्पृहस्य जगत् तृणम्।

**भावार्थ:** श्लोकेऽस्मिन् आचार्य: चाणक्य: के कान् तृणं मन्यन्ते तत् वर्णयति । ब्रह्मविद: समीपे स्वर्ग: तृणं भवति । य: ब्रह्म जानाति स: स्वर्गसुखं नेच्छति । स्वर्गप्राप्ति: तस्य कृते नावश्यकी । यत: ब्रह्मप्राप्तिसुखं तस्य कृते परमं भवति । वीरसमीपे जीवतं तृणवत् स्यात् । जीवनात् विभेति चेत् वीर: युद्धं कर्तुं न शक्नोति । अत: रणक्षेत्रे संग्रामकाले वीर: स्वजीवनं मूल्यहीनं चिन्तयति । य: जितेन्द्रिय: तस्य समीपे स्त्री तृणवत् भवति । स: स्वपत्नीं हेयं चिन्तयति । य: जन: नि:स्पृह: स: जगत्तृणं मन्यते । संसार: क्षणभङ्गुर: अत: संसारमोह: न करणीय: इति तस्य इच्छा भवति ।

**विद्या मित्रं प्रवासेषु भार्य्या मित्रं गृहेषु च ।**
**व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्य च ।१५।**

Scanned with CamScanner

**अन्वय** : प्रवासेषु विद्या मित्रं गृहेषु भार्य्या मित्रं च । व्याधितस्य औषधं मित्रं, मृतस्य धर्मः मित्रं च ।

**भावार्थः** आचार्यः चाणक्यः श्लोकेऽस्मिन् कस्य किं किं मित्रं तत् प्रतिपादयति । सासारेऽस्मिन् जनः मित्रं विना चलितुं न शक्नोति । यदा मानवः विदेशं याति तदा तत्र न कोऽपि परिचितः जनः स्यात् । तत्र तस्य न कोऽपि बन्धुः स्यात् । परन्तु सः जनः विद्वान् भवति चेत् तत्र तस्य विद्याप्रभावेण बहूनि मित्राणि जायन्ते । अतः प्रवासेषु विद्या मित्रं भवति । मित्रवत् विद्या सर्वविधं सहायतां करोति कारयति च । गृहस्थस्य गृहे भार्य्या मित्रं भवति । सुखदुःखसमये शुभाशुभकाले संपद्काले विपदि च यथा मित्रम् आगत्य जनस्य कृते सर्वविधं साहाय्यं करोति । तथैव भार्या प्रतिमुहूर्त्तं प्रतिक्षेत्रं गृहस्वामिनः कृते मित्रवत् सहायताहस्तं प्रसारयति । व्याधिग्रस्तजनस्य मित्रमेव औषधम् । रोगी रोगेण पीडां लभते । रोगयन्त्रणया सः व्यथितः दुःखितः च भवति । तदा औषधसेवनेन सः पीड़ामुक्तः स्यात् । अतः व्याधितजनस्य औषधं मित्रं भवति । जातस्य हि ध्रुवो मृत्युः । पुनरपि मरणं पुनरपि जननम् । मृत्युः सत्यम् । मृत्युकाले कोऽपि किमपि नेतुं न शक्नोति । मृतकेन साकमपि किमपि न याति । केवलं धर्म एव तेन साकं याति । अतः मृतजनस्य धर्मः एव मित्रम् । मित्रं यथा सहायतां करोति तथैव धर्मः सर्वविधसहायतां करोति कारयति च । अतः मित्रं प्रति सम्मानः प्रदातव्यः । अस्मिन्नेव प्रसङ्गे महाभारते महाराजेन युधिष्ठिरेण यक्षं प्रति कथितम् - विद्या प्रवसतः मित्रं भार्या मित्रं गृहे सतः

आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः ।।

**वृथा वृष्टिः समुद्रेषु वृथा तृप्तेषु भोजनम् ।**

**वृथा दानं धनाढ्येषु वृथा दीपो दिवाऽपि च ।१६।**

**अन्वय** : समुद्रेषु वृष्टिः वृथा, तृप्तेषु भोजनं वृथा । धनाढ्येषु दानं वृथा, दिवाऽपि दीपो वृथा च ।

**भावार्थः** श्लोकेऽस्मिन् कदा किं व्यर्थं स्यात् तद् आचार्यः चाणक्यः प्रतिपादयति । भूमौ वृष्टिजलपातेन शस्यवृद्धिः भवति वृक्षाः प्रसन्नाः भवन्ति प्राणिनः प्रीताः भवन्ति च परन्तु समुद्रेषु वृष्टिजलं निपतति चेत् समुद्रस्य न कोऽपि लाभः । तेन वृष्टिजलेन समुद्रस्य प्रयोजनं न स्यात्, वुभुक्षुः जनः भोजनम् इच्छति । तस्य भोजनेन नितरां प्रयोजनं विद्यते । परं यस्य वुभुक्षा नास्ति यः तृप्तः भवति, तस्मै भोजनप्रदानेन किं प्रयोजनम्? दरिद्राः धनमिच्छन्ति । कदाचित् दरिद्रेभ्यः धनं दद्युः । परन्तु धनिकेभ्यः धनप्रदानेन किंवा प्रयोजनम् ? निशायां दीपस्य नितरां प्रयोजनं स्यात्, दिवा दीपेन न प्रयोजनम् ।

अतः कार्यकाले स्थानं कालं पात्रं च विचार्य कर्म करणीयम् ।

NOTES



Scanned with CamScanner

NOTES

**नास्ति मेघसमं तोयं नास्ति चात्मसमं बलम् ।**

**नास्ति चक्षु:समं तेजो नास्ति धान्यसमं प्रियम् ।१७।**

**अन्वय** : मेघसमं तोयं नास्ति, आत्मसमं बलं नास्ति। चक्षु:समं तेजो नास्ति, धान्यसमं प्रियं नास्ति ।

**भावार्थ:** आचार्य: चाणक्य: श्लोकेऽस्मिन् प्रियवस्तुविषये कथयति । संसारेऽस्मिन् मेघसमं तोयं नास्ति । मेघात् यथा वृष्टिपातं स्यात् तथा जलं कस्मादपि न लभ्यते । आत्मबलं सर्वबलप्रधानं भवति । अपरस्य बलेन कोऽपि बलवान् न स्यात् । परं आत्मवलेन जन: अवश्यं बलशाली भवेत् । चक्षु:समं तेज: न स्यात् । चक्षुर्भ्या सर्वम् अवलोक्यते । धान्यसमं प्रियं किमपि नास्ति । भोजनमन्तरेण प्राणिन: न जीवन्ति, न किमपि कार्यं कर्त्तुं पारयन्ति । अत: अन्नं भोजनं वा सर्वेषां कृते अतीव प्रियं भवति ।

**अधना धनमिच्छन्ति वाचं चैव चतुष्पदा: ।**

**मानवा: स्वर्गमिच्छन्ति मोक्षमिच्छन्ति देवता: ।१८।**

**अन्वय** : अधना धनम् इच्छन्ति । चतुष्पदा: वाचं च (इच्छन्ति)। मानवा: स्वर्गम् इच्छन्ति । देवता: मोक्षम् इच्छन्ति ।

**भावार्थ:** श्लोकेऽस्मिन् क: किमिच्छति तत् आचार्य: चाणक्य: प्रतिपादयति । निर्धना: धनम् इच्छन्ति । संसारेऽस्मिन् धनं विना जीवनं दुष्करं भवति । प्रतिक्षेत्रं धनेन प्रयोजनं भवति, अत: दीना: धनमेव इच्छन्ति । निर्धना: धनप्राप्तये सततं चेष्टन्ते । चतुष्पदा: पशव: सर्वदैव वाचम् इच्छन्ति । पशव: किमपि वक्तुं समर्था: न सन्ति अत: ते वाचमेव इच्छन्ति । मानवा: स्वर्गप्राप्तिम् इच्छन्ति । मरणशीलसंसारेऽस्मिन् सर्वे कालकवलिता: भवन्ति । केचन स्वर्गं यमालयं वा यान्ति । अत: प्रायत: मानवा: स्वसुखाय स्वजीवनसार्थकाय च स्वर्गम् इच्छन्ति । देवा: मोक्षम् इच्छन्ति । ये देवा: स्वर्गे तिष्ठन्ति ते एव भोक्षम् इच्छन्ति ।

**सत्येन धार्य्यते पृथ्वी सत्येन तपते रवि: ।**

**सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ।१९।**

**अन्वय** : सत्येन पृथ्वी धार्य्यते । सत्येन रवि: तपते । सत्येन वायु: वाति । सत्ये सर्वं प्रतिष्ठितं (भवति) ।

**भावार्थ:** आचार्य: चाणक्य: श्लोकेऽस्मिन् सत्यस्य महत्त्वं प्रतिपादयति । सत्येन पृथिवी प्रतिष्ठिता । सत्यं नाम यत् न विनाशशीलम् । सूर्य: चन्द्र: जलं वायु: आकाश: जलं च एतें सत्ये प्रतिष्ठिता: । एभि: सत्यै: पृथिवी प्रतिष्ठिता भवति ।



Scanned with CamScanner

सूर्यः सत्येन तपते । सकलशक्तेः आधारः सूर्यः । सूर्यं विना सर्वम् असत्यम् । सर्वं विनाशं स्यात् । अतः सत्येन सूर्यः उदेति । वायुः सत्येन वाति । सत्यं विना वायुः न वाति । सत्ये सर्वं प्रतिष्ठितम् अस्ति । सत्यं विना न किमपि प्रतिष्ठितं स्यात् । अतः सर्वेषाम् आधारस्तम्भः सत्यम् ।

**चला लक्ष्मीश्चला: प्राणाश्चले जीवितमन्दिरे ।**
**चलाचले च संसारे धर्म एको हि निश्चलः ।२०।**

**अन्वय :** लक्ष्मीः चला, प्राणाः चलाः, जीवितमन्दिरे चले, चलाचले संसारे एकः धर्म हि निश्चलः ।

**भावार्थः** श्लोकेऽस्मिन् आचार्यः चाणक्यः धर्मस्य स्थिरताविषये कथयति । संसारेऽस्मिन् लक्ष्मीः सदा चंचला । यः अद्य धनी श्वः सः धनहीनः भवेत् । अतः धनम् अस्थिरमेव । जीवनमपि न स्थिरम् । कदा कस्य जीवनहानिः स्यात् कोऽपि वक्तुं न शक्नुयात् । शरीरं क्षणभङ्गुरं भवति । शरीरम् अवश्यं विनश्यति । धनं जीवनं शरीरं च यद्यपि अस्थिरं विनाशशीलं तथापि मानवः एतत् अविचार्य गर्वमनुभवति । परन्तु संसारेऽस्मिन् धर्मः एव निश्चलः । धर्मस्य विनाशःन भवति । यः धार्मिकः सः चिरजीवी भवति । अतः धनं जीवनं शरीरं च प्रति मोहः न करणीयः ।

**नराणां नापितो धूर्तः पक्षिणां चैव वायसः ।**
**चतुष्पदां शृगालस्तु स्त्रीणां धूर्त्ता च मालिनी ।२१।**

**अन्वय :** नराणां नापितः धूर्तः पक्षिणां वायसः च । चतुष्पदां तु शृगालः, स्त्रीणां मालिनी धूर्त्ता।

**भावार्थः** श्लोकेऽस्मिन् संसारे के धूर्त्ताः भवन्ति तत् आचार्यः चाणक्यः प्रतिपादयति । भगवता मानवः सृष्टः । सर्वेषु प्राणिषु मानवः श्रेष्ठः । परन्तु नरेषु नापितः धूर्त्तः भवति । बहवः पक्षिणः सन्तिः तेषु वायसः पक्षी धूर्त्तः भवति । चतुष्पदप्राणिषु शृगालः धूर्त्तः भवति । पुनरपि स्त्रीणां मालिनी जातीया नारी धूर्त्ता भवति ।

संसारेऽस्मिन् सर्वैः सह संपर्कः करणीयः । परन्तु ये धूर्ताः सन्ति तैः सह सतर्कभावः अवलम्वनीयः कदाचित् मानव तैः धूर्त्तैः विपदि पतेत् तदर्थं पूर्वं विचारणीयम् एव ।

**जनिता चोपनेता च यस्तु विद्यां प्रयच्छति ।**
**अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ।२२।**

NOTES



Scanned with CamScanner

NOTES

**अन्वय** : जनिता चोपनेता च यस्तु विद्यां प्रयच्छति, अन्नदाता भयत्राता एते पञ्च पितरः स्मृताः ।

**भावार्थः** श्लोकेऽस्मिन् आचार्येण चाणक्येन के पञ्च पितरः स्मृताः तत् वर्णितम् । संस्कारदृष्ट्या विचारणीयम् यत् पञ्च पितरः संसारेऽस्मिन् सन्ति । प्रथमतः जन्मदाता । यः जन्मदाता सः प्रथम पिता । द्वितीयतः उपनेता इत्युक्ते उपनयनकर्त्ता । येन यज्ञोपवीतधारणं क्रियते । तृतीयतः विद्यादाता । यः विद्यां प्रयच्छति । येन ज्ञानचक्षुः उन्मिलितं भवति स एव पितृपदवाच्यः । चतुर्थतः यः अन्नदाता । यः भोजनं प्रददाति । भोजनव्यवस्थां करोति । येन क्षुधानिवारणं स्यात् सोऽपि पिता । पञ्चमतः यः भयत्राता । यः विपदः भयात् संकटात् वा त्रायते स एव पिता । यद्यपि जन्मदाता जनकः तथापि भारतीयसंस्कृतौ एते पञ्चपितरः भवन्ति ।

**राजपत्नी गुरोःपत्नी मित्रपत्नी तथैव च ।**
**पत्नीमाता स्वमाता च पञ्चैता मातरः स्मृताः ।२३।**

**अन्वय** : राजपत्नी गुरोः पत्नी मित्रपत्नी तथा च पत्नीमाता स्वमाता एताः पञ्च मातरः स्मृताः ।

**भावार्थः** श्लोकेऽस्मिन् काः पञ्चमातरः स्मृताः भवन्ति तत् आचार्यः चाणक्यः वर्णयति । प्रथमतः राजपत्नी मातृकल्पा भवति । द्वितीयतः गुरोः पत्नी मातृरूपिणी भवति । तृतीयतः मित्रपत्नीं स्वभातृस्वरूपां जानीयात् । चतुर्थतः पत्नीमाता मातृकल्पा भवति । पञ्चमतः स्वमाता इत्युक्तेः जन्मदात्री माता जननी भवति । माता यथा ममतामयी करुणामयी भावनामयी स्नेहमयी प्रेममयी च भवति तथैव एताः स्वभावेन भवन्ति ।

## प्रश्नाः समाधेयाः

१. पण्डितः किमर्थम् अवसीदति ?
२. सञ्चितं धनं कथं विनश्यति ?
३. कुत्र वासं न कारयेत् ?
४. कस्मिन् स्थाने दिवसमपि न वसेत् ?
५. कान् कान् कस्मिन् समये जानीयात् ?
६. किमर्थं ध्रुवाणि द्रव्याणि नश्यन्ति ?
७. कुत्र विवाहं कुर्यात् न कुर्यात् च ?
८. विश्वासः कुत्र नैव कर्त्तव्यः ?



Scanned with CamScanner

९. पुरुषाणाम् अपेक्षया स्त्रीणां केषु व्यवहारेषु आधिक्यमस्ति ?
१०. स्त्रीणां के स्वभावजाः दोषाः?
११. कस्य कृते इह एव स्वर्गः भवति ?
१२. कीदृशं बन्धुं वर्जयेत्?
१३. कथं मनसा चिन्तितं कर्म वचसा न प्रकाशयेत् ?
१४. किं किं कष्टम् ?
१५. कथं पुत्रं शिष्यं च न ताडयेत् ?
१६. दिवसं केन प्रकारेण अबन्ध्यं कुर्यात् ?
१७. विनाग्निना के कायं प्रदहन्ति ?
१८. के शीघ्रं नश्यन्ति ?
१९. किं किं केषां बलम् ?
२०. कः कुत्र शोभते ?
२१. कं कुत्र नियोजयेत् ?
२२. किं किं केषां रूपम् ?
२३. कदा यः पलायते स जीवति ?
२४. कस्य जन्म जन्मनि एव मरणम् ?
२५. कुत्र श्रीः स्वयमागता ?
२६. गर्दभस्य कानि पञ्च सृज्यन्ते ?
२७. कुत्र सतां संगतिः ?
२८. कानि त्रीणि सकृत् एव भवन्ति ?
२९. का स्वभावेन भार्या ?
३०. किं किं कुत्र विषतुल्यं भवति ?
३१. केषां कुत्र कुत्र देवताज्ञानं भवति ?
३२. के केषां गुरवः भवन्ति ?
३३. के केषां द्वेष्याः भवन्ति ?
३४. किं किं केषां मित्रम् ?
३५. के किम् इच्छन्ति ?
३६. केषां धूर्त्तत्वं प्रसिद्धम् ?
३७. के पञ्च पितरः ?
३८. का पञ्च मातरः स्मृताः ?

❖❖❖

NOTES



Scanned with CamScanner

# UNIT - III

## अनुविभाग: तृतीय:

## श्री भर्तृहरिविरचितम्

## नीतिशतकम्

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ।। १ ।।

**अन्वय :** दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये स्वानुभत्येकमानाय शान्ताय तेजसे नमः (अस्तु)

**भावार्थ :** यस्य परब्रह्मणः स्वरूपं सर्वत्र देशे काले वस्तुन्याकाशादौ च व्याप्तम् अविनाशि तथा ज्ञानमयं वर्तते यस्य सत्तायामुपलब्धौ च स्वात्मानुभव एव केवलं प्रमाणम्, विकारशून्यं तत् परं ब्रह्माऽहं प्रणतोऽस्मीति ।

**व्याख्या –** दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये, दिशः = प्राच्यादयः कालाः = भूतादयः ते आदौ येषां तैर्दिक्कालादिभिः, आदिपदेन घटपटादिकं बस्तुजातमाकाशादिकं च गृह्यते, अनवच्छिन्ना = अपरिमिता असंङ्कुचिता, अनन्ता = अविनाशिनी, चिदेव चिन्मात्रम् = ज्ञानमयी, मूर्तिः = स्वरूपं यस्य तस्मै । अत्र = 'तेजसे' इति नपुंसकलिङ्गं विशेष्यमनुसृत्य = 'चिन्मात्रमूर्तिने' इति प्रयोगः कर्तव्यः आसीत्, किन्तु महर्षिकल्पस्य श्रीमद्भर्तृहरेरमुं प्रयोगमार्षं मत्वा कवेर्निरङ्कुशत्वं वा प्रकल्प्य विज्ञवरैरपशब्दोऽयमुपेक्षणीयः । अथवा, वैकल्पस्य मूर्तिशब्दस्य भाषितपुंस्कत्वाभावेऽपि विशिष्टस्य तस्य भाषितपुंस्कत्वात् तृतीयादिषु भाषितपुस्कं पुंवद् गालवस्य' इत्यनेन कृतं पुंवद्भावमालम्ब्य कथञ्चित् प्रयोगोऽयमुपपादनीयः । तत्र वेधः पदेन निर्गुणो व्यापको विष्णुर्ग्राह्यः । विष्णौ च सर्वाणि विशेषणानि योजयितुं शक्यानि । अत्र पाठे सर्वे समीचीनमेव न काव्यनुपपत्तिः विशेषणानामर्थानुकूल्यं च कथञ्चिवत्येयेति । स्वानुभूत्येकमानाय,. स्वस्य अनुभूतिः = अनुभवः एकम् = केवलं मानम् = प्रमाणं यत्र तत् तादृशाय,शान्ताय = सर्वविधविकारोपद्रवरहिताय प्रसन्नाय, तेजसे = प्रकाशरूपाय निर्गुणाय परस्मै ब्रह्मणे 'नमःस्वस्तिस्वाहास्वाधाऽलंवषट्योगाच्च' इत्यनेन सूत्रेण नमः शब्दयोगे चतुर्थी, नमः = नमस्कारोऽस्तु ।



Scanned with CamScanner

'इदानीं दुर्दैवात् सुभाषितवचनमस्यावसरो नास्तीति' प्रतिपादयति –

**बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।**

**अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्।। २ ।।**

**अन्वय** : बोद्धारः मत्सरग्रस्ताः प्रभवः स्मयदूषिताः अन्ये च अबोधोपहताः (सन्ति, अतः) सुभाषितम् अङ्गे जीर्णम् ।

**भावार्थः** 'अस्मिन् समये गुणग्राहिणः प्रायो न सन्ती' ति सुभाषितवचनं वक्तुर्मुखाभ्यन्तर एव वर्तमानं बहिर्विकासं न प्राप्तुमर्हतीति ।

**व्याख्या** – बोद्धारः = अर्थज्ञाः, विद्वांसः, मत्सरग्रस्ताः मत्सरेण = अन्यशुभेद्वेषेण ईर्ष्ययेति यावत्, ग्रस्ता = आक्रान्ताः, प्रभवः = कवित्वस्य यथोचितमादरं कर्त्तुं समर्था राजानः, स्मयदूषिताः, स्मयेन = गर्वेण, दूषिताः = मलिनाः मानसं विकार प्राप्ता दर्पान्धा इति यावत्, अन्ये च = पूर्वोक्तद्वयादितरे सर्वे जनाः, अबोधोपहताः, अबोधेन = अज्ञानेन, उपहताः = नष्टा आक्रन्ताः सन्ति, अतो हेतोः सुभाषितम् = प्रसङ्गोचितं सुन्दरं वचनम् । अङ्गे = वक्तुः शरीरे, जीर्णम् = परिणतम् ।

'अज्ञानं विशिष्टं ज्ञानं चेत्युभयमपि सम्यक्, किन्तु साधारणं ज्ञानमतिभयङ्कर' मित्याह–

**अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।**

**ज्ञानलवदुर्विदग्धं ब्रह्माऽपि तं नरं न रञ्जयति।। ३ ।।**

**अन्वय** : अज्ञः सुखम् आराध्यः विशेषज्ञः सुखतरम् आराध्यते, (किन्तु) ज्ञानलबदुर्विदग्धं तं नरं ब्रह्माऽपि न रञ्जयति ।

**भावार्थः** : मूर्खः पण्डितप्रवरश्चेत्युभावपि लोके प्रसादयितुं शक्यौ, परन्तु कञ्चिज्ज्ञस्य दुराग्रहैः ग्रस्तस्य पुरुषस्य प्रसादनं ब्रह्मणाऽपि न कर्तुं शक्यते किमुताऽन्यैरिति ।

**व्याख्या** - अज्ञः= मूर्खः, सुखम् = अनायासं यथा स्यात्तथा,आराध्यः = प्रसादनीयः, विशेषज्ञः = अधिक ज्ञानशाली जनः, सुखतरम् = अतिसौकर्येण प्रयत्नं विनैवेति यावत्, आराध्यते = प्रसाद्यते, किन्तु ज्ञानलवदुर्विदग्धम्, ज्ञानस्य लवेन = अतिस्वल्पेन ज्ञानेन, दुर्विदग्धः = आत्मानं निपुणं पण्डितं मन्यमानः वस्तुतो नैतादृशः तम्, नरम् = मनुष्यम्, ब्रह्मापि = ब्रह्म-देवोऽपि, न रञ्जयति = न प्रसादयति ।

'इदानीं मूर्खस्य चेतसः परितोषणं सर्वथा दुष्करः दुःसम्भवं चे' ति क्रमेण श्लोकद्वयेन प्रतिपादयति –

NOTES



Scanned with CamScanner

**प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरात्**
**समुद्रमपि सन्तरेत् प्रचलदूर्मिमालाऽऽकुलम् ।**
**भुजङ्गमपि कोपितं शिरसि पुष्पवद् धारयेत्**
**न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ।।४ ।।**

**अन्वय :** (जना:) मकरवक्त्रदंष्ट्रान्तरात् प्रसह्य मणिम् उद्धरेत्, प्रचलदूर्मिमालाऽऽकुलं समुद्रम् अपि सन्तरेत्, कोपितं भुजङ्गम् अपि पुष्पवत् शिरसि धारयेत् – प्रतिनिविष्टमूर्खजनचित्तं तु न आराधयेत्।

**भावार्थ: :** मकरमुखे स्थितस्य रत्नस्य बहिर्निष्कासनं तरङ्गाकुलस्य समुद्रस्य सन्तरणं, मस्तके सर्पस्य धारणं चेत्यतिदुष्करमपि कार्यं कदाचित् साहसविशिष्ट: पुरुष: कर्तुं शक्नुयात् किन्तु दुराग्रहग्रस्तानां मूर्खाणां चेतसोऽनुरञ्जनं कष्टेन सम्भवतीति ।

**व्याख्या -** जन: मकरवक्त्रद्रंष्ट्रान्तरात्, मकरस्य = जलजन्तुविशेषस्य वक्त्रे मुखे या द्रंष्ट्रा: तासाम् अन्तरात् = मध्यभागात्, प्रसह्य = हठात् । मणिम् = रत्नम्, उद्धरेत् = वहिर्निष्कासयितुं शक्नुयात्, प्रचलदूर्मि- मालाऽऽकुलम्, प्रचलन्त्या = इतस्तत: प्रसरन्त्या ऊर्मीणाम् = तरङ्गाणाम्, मालया = पंक्त्या, आकुलम् = व्याप्तम्, समुद्रम् = सागरम् अपि, सन्तरेत् = तीर्त्वा समुलङ्घयितुं समर्थो भवेत्, कोपितम् = क्रोधवशं नीतम् भुजङ्गमपि = सर्पमपि, पुष्पवत् = कुसुमेन तुल्यम्, शिरसि = मस्तके, धारयेत् = स्थापयित शक्नुयात्, प्रतिनिविष्टमूर्खजनचित्तम्, प्रतिनिविष्ट: = दुराग्रहविशेषै: ग्रस्त: स चासौ मूर्खजन: जडबुद्धिर्मनुष्य: तस्य चित्तम् = मन:, तु = पुन:, न आराधयेत् = न सन्तोषयितुं प्रभवेत् ।

**लभेत सिकतासु तैलमपि यत्नत: पीडयन्**
**पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दित: ।**
**कदाचिदपि पर्यटञ्छशविषाणमासादयेत्**
**न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ।।५ ।।**

**अन्वय :** (जन:) यत्नत: पीडयन् सिकतासु अपि तैलं लभेत, पिपासार्दित: च सन् मृगतृष्णिकासु सलिलं पिबेत्, पर्यटन, कदाचित् शशविषाणम् अपि आसादयेत्, प्रतिनिविष्टमूर्खजनचित्तं तु न आराधयेत् ।



Scanned with CamScanner

NOTES

**भावार्थ::** बालुकायास्तैलं, मरुस्थले जलं, शशस्य शृङ्गं चैत्यसम्भवमपि कदाचिद्दैवात्सम्भवेत्, किन्तु हठवृत्तेर्मूर्खस्य चेतसः प्रसादनं कदापि न सम्भवतीति । पूर्वस्मिन् श्लोके 'प्रसह्य मणिमुद्धरेदि'त्यादिना, मूर्खजनचित्ताराधनं कष्टेन कर्त्तुं शक्यमिति, अस्मिन् प्रकृते श्लोके 'लभेत सिकतासु तैलमि'त्यादिना तत् सर्वथा कर्तुं न शक्यमिति च गूढं सूचितम् ।

**व्याख्या -** जनः यत्नतः = परिश्रमपूर्वकम्, पीडयन् = मर्दयन्, सिकतास्वपि = बालुकायामपि, तैलम् तदन्तर्गतं सारभूतं स्नेहम् लभेत = प्राप्तुं शक्नुयात्, पिपासार्दितः= तृष्णया पीडितश्च सन्, मृगतृष्णिकासु = मरीचिकासु मरुस्थले बालुकासु जलभ्रान्ति करेष्वतिविस्तृतेषु प्रकाशविशेषेष्विति यावत्, सलिलम् = जलम्, पिबेत् = पातुं शक्नुयात् । पर्यटन् = इतस्ततो भ्रमन्, कदाचित् = कस्मिंश्चित् काले, शशविषाणमपि= शशकस्य शृङ्गमपि, आसादयेत् = हस्तगतं कर्तुं पारयेत् ।

सन्मार्गे दुर्जनानां प्रवर्तनं बहुदुष्करमित्याह–

**व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते**
**छेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यति ।**
**माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते**
**नेतुं वाञ्छति यः खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः।।६ ।।**

**अन्वय :** यः सुधास्यन्दिभिः सूक्तैः खलान् सतां पथि नेतुं वाञ्छति, असौ बालमृणालतन्तुभिः व्यालं रोद्धुं समुज्जृम्भते, शिरीषकुसुमप्रान्तेन वज्रमणिं छेत्तुं सन्नह्यति, मधुबिन्दुना क्षाराम्बुधेः माधुर्यं रचयितुम् ईहते ।

**भावार्थः -** मधुराणि वचनानि प्रयुज्य दुर्जनेषु सज्जनत्वमारोपयितुं प्रवृत्तो मृणालतन्तुप्रभृतिभिः

पदर्थैर्दुष्टगजबन्धनादिकमिव दुष्करं कार्यं कुर्वन् मन्दबुद्धिर्जनो लोकोपहासपात्रं भवतीति ।

**व्याख्या -** यः पुरुषः सुधास्यन्दिभिः = अमृतस्राविभिः, सूक्तैः = सुन्दरैर्वचनैः, खलान् = दुष्टान्, सतां = सज्जनानाम्, पथि = मार्गे, नेतुम् = प्रापयितुम् वाञ्छति, असौ तथाभूतः पुरुषः, व्यालम् = दुष्टगजम्, बालस्य= कोमलस्य मृणालस्य = बिसस्य कमलमूलस्येति यावत्, तन्तवः = सूत्राणि तैः,रोद्धुम् = बद्धुम्, समुज्जृम्भते = चेष्टते,



Scanned with CamScanner

शिरीषकुसुमप्रान्तेन = शिरीषनामकपुष्पस्याग्रभागेन, वज्रमणिम् = हीरकं नाम रत्नविशेषम्, छेत्तुम् = द्विधा कर्त्तुम्, सन्नह्यति = उद्यतो भवति, मधुबिन्दुना, मधुन: = मक्षिकस्य, बिन्दु: = लेश इति यावत् तेन, क्षाराम्बुधे: = लवणसमुद्रस्य, माधुर्यम् = मधुरताम्, रचयितुम् = सम्पादयितुम्, ईहते = अभिलषति ।

'मौनधारणेन मूर्खा: स्वीयं मूर्खत्वदोषमाच्छादयितुं शक्नुवन्ती' त्येतन्निरूपयति —

**स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः ।**
**विशेषत: सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् ।। ७ ।।**

**अन्वय :** विधात्रा अपण्डितानां स्वायत्तम् एकान्तगुणं मौनम् अज्ञताया: छादनं विनिर्मितम् । (इदम्) सववविदां समाजे विशेषत: विभूषणं भवति ।

**भावार्थ: -** मूर्खा यदि मौनमालम्ब्य तिष्ठेयुस्तर्हि तेषां मूर्खता कुतोऽपि न प्रकाशमागच्छेत्, विद्वन्मण्डले पुनर्मूर्खाणां मौनमधिकमुपकारकं भवतीति ।

**व्याख्या :** विधात्रा = ब्रह्मणा,अपण्डितानाम् = मूर्खाणाम्,स्वायत्तम् = आत्माधीनम्, एकान्तगणम्, एकान्त गुणो यत्र तत्, नियमेन गुणकारि सफलमिति यावत्, 'एकान्तहितम्' इति पाठे-नियमेन हितकरम् इत्यर्थ: । मौनम् = तूष्णाभावाश्रयणम्, अज्ञताया: = मूर्खताया:, छादनम् = आवरणरूपम्, विनिर्मितम् = कृतम् । इदं मौनम्, सर्वविदाम् = बहुज्ञाना विदुषाम्, समाजे = समूहे, विशेषत: = अधिकरूपेण, विभूषणम् = अलङ्कारो भवति ।

अल्पज्ञता मनसि गर्वमुत्पादयति, विद्वज्जनसमागमेन च तद्गर्वापहारी भवतीत्याशयेनाह–

**यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्ध: समभवं**
**तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मन: ।**
**यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं**
**तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगत:।।८ ।।**

**अन्वय :** यदा किञ्चिज्ज्ञ: अहं द्विप इव मदान्ध: समभवम्, तदा 'सर्वज्ञ: अस्मि' इति मम मन: अवलिप्तम् अभवत् । यदा(मया) बधजनसकाशात् किञ्चित् किञ्चिद् अवगतम्, तदा मूर्ख: अस्मि इति मे मद: ज्वर इव व्यपगत: ।



Scanned with CamScanner

भावार्थः - इतस्ततो ज्ञानलेशं मिथ्याभूतमासादयन् मनुष्यो गर्वपर्वतमारूढ़ो भवति, परं पण्डितानां संसर्गेण क्रमेणोन्मीलितनेत्रः सन् तद्गर्वभारं स्वात्मनः शिरसोऽवतारयतीति ।

व्याख्या - यदा = यस्मिन् समये, 'अहम्' इति स्वात्मानमुद्दिश्य कवेरुक्तिः, द्विप इव = हस्ती यथा, मदान्धः, मदेन = अभिमानेन (हस्तिपक्षे मदजलेन), अन्धः = विवेकशून्यः (हस्तिपक्षे मत्तः) समभवन् = सञ्जातः, तदा = तस्मिन् समये सर्वज्ञ सकलपदार्थज्ञानसम्पन्नः अस्मि, इति = एवम्, मम = मदीयम्, मनः = चेतः अवलिप्तम् = गर्वपूर्णम्, अभवत् = अजायत । यदा मया, बधजनसकाशात् = विद्वज्जनेन सह समागमात्, किञ्चित् किञ्चित् = अत्यल्पम्, अवगतम् = वास्तविकं ज्ञानमासादितम्, तदा मूर्खः = मूढ़ो जडबुद्धिः अस्मि, इति = एवं प्रकारेण वर्तमानः मे = मम, मदः = गर्वः, ज्वर इव = व्यधिरूपः शारीरः उत्तापः इव, व्यपगतः = दूरेऽभवत् ।

**कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं**
**निरुपमरसं प्रीत्या खादन्नरास्थि निरामिषम्**
**सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते**
**न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ।**

**अन्वयः** श्वा कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं निरामिषं नरास्थि निरुपमरसं प्रीत्या खादन् सुरपतिम् अपि पार्श्वस्थं विलोक्य न शङ्कते । हि क्षुद्रः जन्तुः परिग्रहफल्गुतां न गणयति ।

**भावार्थ :** क्षुद्रबुद्धिर्जनः स्वीकृते वस्तुनि सारशून्यत्वं नाकलयति, दुर्गुणमसारं नरास्थि खादन् कुक्कुर इव निन्दास्पदं कर्म कुर्वन् महदम्भो भयं न प्राप्नोतीति ।

**व्याख्या -** श्वा = कुक्कुरः, कृमिकुलचितम् = कीटसमूहेन व्याप्तम्, लालाक्लिन्नम् लालाा = स्यन्दिनी, रुचिकरप्रियवस्तुविलोकनेन हेतुना मुखान्निःसरत् स्निग्धं जलमिति यावत्, तया क्लिन्नम् = आर्द्रम्, विगन्धि = विकृतगन्धयुक्तम् , जुगुप्सितम् = घृणास्पदम्, निरामिषम् = निर्गतम् आमिषं यस्मात्तत् मांसशन्यम्, नरास्थि = मनुष्याणां शरीरस्थ कीकसम् । निरुपमरसन् निरूपमः = उपमाशून्यः अपूर्वः रसः= स्वादो, यस्मिन् कर्मणि तद् यथा, भवति तथा, प्रीत्या = प्रसन्नतया । खादन् = भक्षयन्, सुरपतिमपि इन्द्रमपि, पाश्वस्थम् = समीपस्थितम्, विलोक्य = दृष्ट्वा । न शङ्कते =

NOTES



Scanned with CamScanner

NOTES

न लज्जते । हि = तथा हि युक्तमेव, क्षुद्र = तुच्छः,जन्तुः = प्राणी, परिग्रहफल्गुताम्, परिग्रहस्य = स्वीकृतस्य वस्तुनः फल्गुताम् = असारताम्, न गणयति = न विचारयति ।

उदाहरणमुखेन विवेकविकलस्य पुरुषस्य दुष्परिणामां विपत्तिं दर्शयति -

शिरः शार्वं स्वर्गात् पशुपतिशिरस्तः क्षितिधरं
महाध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।
अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ।। १० ।।

अन्वय : इय गङ्गा स्वर्गात् शार्व शिरः, पशुपतिशिरस्तः क्षितिधरम्, उत्तुङ्गात् महीध्रात् अवनिम्, अपि च अवनेः जलधिम्, (एवम्) अधः अधः स्तोकं पदम् उपगता । अथवा विवेकभ्रष्टानां विनिपातः शतमुखः भवति ।

भावार्थः : उच्चतमाद् विष्णुपदादधःपतिता क्रमेण शिवशिरः हिमालयं पृथ्वीं चातिक्रम्य क्षारं समुद्रं प्रविशन्ती श्रीगङ्गा विवेकशून्याः पुरुषाः सर्वतोमुखीं विपत्तिं प्राप्नुवन्तीत्येवं सूचयन्ति विवेकस्य परमावश्यकत्वं बोधयतीति ।

व्याख्या - इयम् = प्रत्यक्षं भूतले दृश्यमाना, गङ्गा = भागीरथी, शार्वम् = शङ्करसम्बन्धि, शिरः= मस्तकम्, पशुपतिशिरस्तः पशुपतेः = शिवस्य, शिरः = मस्तकं तस्मात् पञ्चम्यर्थे तसिल्प्रत्ययः क्षितिधरम् = हिमालयं नाम पर्वतम्, उत्तुङ्गात् = अत्युच्चात् । महीध्रात् = हिमालयपर्वतात्, अवनिम् = पृथिवीम्, अपि च = किञ्च, अवनेः = पृथिव्याः, जलधिम् = समुद्रम्, एवं क्रमेण अधः अधः = नीचैः नीचैः, स्तोकम् = अल्पम्, पदम्= स्थानम् । उपागता = प्राप्ता । अथवा युक्तमेव, विवेकभ्रष्टानाम् = सद्विचाराच्च्युतानां जनानाम्, विनिपातः = अवनतिः, शतमुखः, शतम् = अनेकानि, शतशब्दोऽनेकवचनः मुखानि = द्वाराणि यस्य तथाभूतः, भवति = जायते ।

मूर्खस्य मूर्ख वमप्रतीकायं भवती युदाहरणैः प्रपञ्चयति–

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।
व्यधिर्भेषजसग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ।। ११ ।।

Scanned with CamScanner

**अन्वय** : हुतभुक् जलेन वारयितुं शक्यः, सूर्यातपः छत्रेण वारयितुं शक्यः, नागेन्द्रः समदः निशिताङ्कुशेन वारयितुं शक्यः गोगर्दभौ दण्डेन वारयितुं शक्यौ, व्याधिः भेषजसंग्रहैः वारयितुं शक्यः विषं च विविधैः मन्त्रप्रयोगैः वारयितुं शक्यम्, (एवम्) सर्वस्यैव शास्त्रविहितम् औषधम् अस्ति, किन्तु मूर्खस्य औषधं नास्ति ।

**भावार्थः** : अग्न्यादिकं सकलं जलादिना वारयितुं शक्यते, परं मूर्खबुद्धेर्निवारणं केनाप्युपायेन कर्तुं न शक्यत इति ।

**व्याख्या -** हुतभुक् हुतम् = होमद्रव्यं घृतादि, भुंक्ते = भक्षयतीत्येतादृशः अग्निः, जलेन = वारिणा वारयितुम् = शमयितुम्, शक्यः = योग्यः, सूर्यातपः = सूर्यस्य आतपः घर्म उष्णतेति यावत्, छत्रेण = आतपत्रेण, वारयितुम् = दूरीकर्तुम् शक्यः, समदः = मदजलेन सहितः, नागेन्द्रः = गजराजः, निशिताङ्कुशेन, निशितः = तीक्ष्णः स चासौ अङ्कुशः सृणिसंज्ञको हस्तिनोदनरूपो लौहमय वस्तुविशेषः तेन, वारयितुम् = रोद्धुं वशयितुं शक्यः, गोगर्दभौ = वृषभरासभौ, दण्डेन = लगुडेन तत्प्रहारेणेति यावत्, वारयितुं = दमयितुम् उद्दिष्टं मार्गं नेतुम्, शक्यादितिवचनविपरिणामः, व्याधिः = शरीरगतो रोगो ज्वरादिः भेषजसङ्ग्रहैः भेषजानाम् = औषधिनाम् सङ्ग्रहैः = सञ्चयैः यथोचितविनियोगाय स्वसमीपे स्थापनैः, वारयितुम् = निवर्तयितुम् शक्यः, विषम् = सर्पदंशादिसमुद्भूतं गरलम् । विविधैः = अनेकप्रकारैः, मन्त्रप्रयोगैः = विषोत्तारमन्त्राणामावर्तनैः वारयितुम् = उत्तारयितुम्, शक्यम् = योग्यम्, एवं सर्वस्य पदार्थस्य जातावेकवचनमिदम्, सर्वेषां वस्तूनामिति तात्पर्यम्, शास्त्रविहितम् = शास्त्रोपदिष्टम्, औषधम् = भेषजम्, दोषप्रतीकारोपाय इति यावत्, अस्ति = विद्यते, किन्तु मूर्खस्य = जडमतेः पुरुषस्य, औषधं नास्ति = न विद्यते ।

नराकृतिपशुमिदानीं वर्णयति —

साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् । १२ ।।

NOTES

**अन्वय :** साहित्यसङ्गीतकलाविहीन: (पुरुष:) पुच्छविषाणहीन: साक्षात् पशु:(अस्ति), (अयम्) तृणं न खादन् अपि (यत्) जीवमान: (भवति), तत् पशूनां परमं भागधेयम् ।

**भावार्थ :** साहित्यविषयाद्यनभिज्ञ: पुरुषो मानवोचितगुणैर्विरहितो नूनं पशुरेव । जात्या पशौ पुच्छविषाणयोग: अत्र च नराकारे पशौ न तावत् पुच्छादियोग इत्येव द्वयोरनयोर्भेद: । अयं नराकार: पशुश्च तृणमभक्षयन्नपि यज्जीवति, तन्नूनं वास्तविकानां पशूनां महत्सौभाग्यम्, (अन्यथा, अनेन पशुना तृणे भक्षिते सति) तेषां पशूनां जीवनमेव सर्वथा विनष्टं स्यादिति ।

**व्याख्या -** साहित्यसङ्गीतकलाविहीन: साहित्यम् = काव्यार्थप्रतिपादकं शास्त्रम्, सङ्गीतम् = नृत्यगीतवाद्यस्वरूपम् कला: = शिल्पाद्याश्चतु: षष्टिसंख्यका: ताभि: विहीन: = विरहित: पुरुष:, पुच्छविषाणहीन:, पुच्छेन = लाङ्गुलेन,विषाणाभ्यां शृङ्गाभ्यां च हीन: = रहित:, साक्षात् पशु: = सर्वथैव पशु: अस्ति, अयं पुरुष: तृणम् = घासम् न खादन्नपि, यत् जीवमान: = जीवनशीलो भवति, तत् पशूनाम् = वास्तविकानां गवादिपशूनाम्, परमम् = श्रेष्ठं महद्, भागधेयम् = भाग्यमस्ति ।

पुनरपि मूर्खाणां नराणां पशुत्वं विशदीकुर्वन्नाह –

**येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्म: ।**
**ते मर्त्यलोके भुवि भारभूता: मनुष्यरूपेण मृगाश्चरन्ति । १३ ।।**

**अन्वय :** येषां विद्या न, तप: न, दानं न, ज्ञानं न, शीलं न, गुण: न, धर्म: न (वर्तते), ते मर्त्यलोके भुवि भारभूता: (सन्त:) मृगा: मनुष्यरूपेण चरन्ति ।

**भावार्थ :** विद्यादिभिर्विरहिता: पुरुषा मनुष्याकारा: पशव एव, आत्मनो भारेण पृथिवीमाक्रम्य क्लेशयतां तेषां जीवनं नूनं निरर्थकमिति ।

**व्याख्या -** येषाम् = मनुष्याणाम्, विद्या = व्याकरणादिज्ञानम्, न = नास्ति, तप: = कायक्लेशकरं व्रतादिकम्, न = नास्ति, दानम् = सत्पात्रे धनाद्यर्पणम्, न = नास्ति, ज्ञानम् = सदसद्विवेक:, न = नास्ति, शीलम् = सदाचरणम्, न = नास्ति, गुण: = दयादाक्षिण्यादिरूपोऽन्तर्गतो धर्मविशेष:, न = नास्ति, धर्म = इष्टानिष्टबोधको विधिनिषेधात्मको वेदविहितकर्त्तव्यविशेष: न = नास्ति, ते = मनुष्या:, मर्त्यलोके = मनुष्यलोके, भुवि, षष्ट्यर्थे सप्तमी, पृथिव्या इत्यर्थ:, भारभूता: = भारस्वरूपा: सन्त:



Scanned with CamScanner

निरर्थकजीवना: कष्टकरा इति यावत्, मृगा: = पशव: एव, मनुष्यरूपेण = नराकारेण, चरन्ति = विचरन्ति ।

NOTES

'मूर्खजनसंसर्ग: सर्वप्रकारेण त्याज्य' इत्याह –

वरं पर्वतदुर्गेषु भ्रान्तं वनचरै: सह ।
न मूर्खजनसम्पर्क: सुरेन्द्रभवनेष्वपि। १४ ।।

अन्वय : वनचरै: सह पर्वतदुर्गेषु भ्रान्तं वरम् (किन्तु) मूर्खजनसम्पर्क: सुरेन्द्रभवनेषु अपि न (वरम् अस्ति)

भावार्थ: : क्लेशावहेषु स्थानेषु नीरसै: सह निवास: सखावहेषु स्थानेषु मूर्खसमागमापेक्षयाऽधिकं श्रेष्ठ इति ।

व्याख्या : वरमिति । वनचरै: = अरण्यवासिभिर्मानवै:, सह = सार्धम्, पर्वतदुर्गेषु = पर्वतानां दुर्गमेषु स्थानेषु, भ्रान्तम् = भ्रमणम् भावे क्त प्रत्यय: । वरम् = मनाक् (किञ्चित्) प्रियम्, किन्तु मूर्खजनसम्पर्क: = मूर्खाणां सम्बन्ध:, सुरेन्द्रभवनेष्वपि = दिव्येषु देवराजप्रसादेष्वपि, न वरम् ।

'अनादर: कवीन्द्राणां राज्ञो जड़त्वसूचक' इत्येवं निरूपयति-

शास्त्रोपस्कृतशब्दसुन्दरगिर: शिष्यप्रदेयाऽऽगमा
विख्याता: कवयो वसन्ति विषये यस्य प्रभोर्निर्धना: ।
तज्जाड्यं वसुधाधिपस्य कवयस्त्वर्थं विनापीश्वरा:
कुत्स्या: स्यु: कुपरीक्षका हि मणयो यैरर्घत: पातिता: । १५ ।।

अन्वय : शास्त्रोपस्कृतशब्दसुन्दरगिर: शिष्यप्रदेयाऽऽगमा: विख्याता: कवय: यस्य प्रभो: विषये निर्धना: (सन्त:) वसन्ति, तत् वसुधाधिपस्य जाड्यम्; कवय: तु अर्थं विना अपि ईश्वरा: (सन्ति) । हि कुपरीक्षका: कुत्स्या: स्यु: ये: मणय: अर्घत: पातिता: ।

भावार्थ: - राजस्थानमाश्रित्यापि कवयो यदि दैवान्निर्धना: स्युस्तर्हि तेषां यथोचितं संमानमकुर्वन् राजैव निन्दनीय: कवीनां गुणस्य ततो न कापि हानि: । अमूल्यानि रत्नानि यदि कुपरीक्षका अल्पमूल्यानि कुर्युस्तर्हि सोऽयं तद्गुणानभिज्ञतारूपो दोषस्तेषां कुपरीक्षकाणामेव मस्तकमारूढ: रत्नानि पुनर्निर्दषाण्येवेति ।



Scanned with CamScanner

NOTES

व्याख्या – शास्त्रोपस्कृतशब्दसुन्दरगिर: शास्त्रै: = व्याकरणादिभि: उपस्कृता:= अलङ्कृता, = शुद्धा: तथा शब्दै:, सुन्दरा: = मनोहराश्च, गिर: = वचनानि येषां ते तादृशा:, शिष्यप्रदेयागमा: शिष्येभ्य: =अन्तेवासिजनेभ्य:, प्रदेया: = दातुं योग्या:, शिक्षणीया इति यावत्, आगमा: = शास्त्राणि येषां ते तथाभूता:, विख्याता: लब्धकीर्तय: कवय: = कविजना:, यस्य प्रभो: = राज्ञ:, विषये = देशे, निर्धना: = दरिद्रा: सन्त:, वसन्ति = निवासं कुर्वन्ति, तत् वसुधाधिपस्य = राज्ञ:, जाड्यम् = मूर्खत्वं दोषोऽस्ति, कवयस्तु अर्थं विनाऽपि= धनमन्तरेणापि ईश्वरा: = समर्था: पूजनीया: सन्ति । हि = निश्चयन, कुपरीक्षका: = कुत्सिता: परोक्षका:, वस्तुनो गुणागुणयोर्यथोचितां परीक्षां कर्तुमसमर्था: पुरुषा:, कृत्स्या: = निन्दनीया:, स्यु: = भवेयु:, यै: =कुपरीक्षकै: मणय: = बहुमूल्यानि रत्नानि, अघत:= मूल्यात्, पतिता: = न्यूनतां प्रापिता: ।

'राज्ञा विदुषामादर: करणीय' इत्यर्थमिदानीमाविष्करोति –

**हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा-**
**ऽप्यर्थिभ्य: प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ।**
**कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं**
**येषां तान्प्रति मानमुज्झत नृपा:! कस्तै: सह स्पर्धते । १६ ।।**

**अन्वय** : यत् हर्तु: गोचरं न याति सर्वदा किमपि शं पुष्णाति, अर्थिभ्य: अनिशं प्रतिपाद्यमानम् अपि परां बृद्धिं प्राप्नोति, कल्पान्तेषु अपि निधनं न प्रयाति, तत् विद्याख्यम् अन्तर्धनं येषां (समीपे वर्तते), तान् प्रति हे नृपा:! मानम् उज्झत, तै: सह क: स्पर्धते ?

**भावार्थ**: - 'न चौरहार्यं न च राजहार्यमि' त्यादिविलक्षणगुणशालिना विद्याधनेन समृद्धा विद्वांसो धनमदान्धै: राजभिर्न कदाप्यवमाननीया: । तान् विद्वद्वरान् को वाऽनिभवितुमिच्छतीति ।

**व्याख्या** - यत् हर्तु: = अपहरणं कर्तु प्रवृत्तस्य, गोचरं न याति = हस्तगतं न भवति, सर्वदा = सर्वस्मिन् काले, किमपि = अनिर्वचनीयम्, शम् = कल्याणम्, पुष्णाति = वर्द्धयति, अर्थिभ्य:= ग्राहकेभ्य:, अनिशम् = नित्यम्, प्रतिपाद्यमानमपि = दीयमानमपि, पराम् = महतीम्, बृद्धिम् = उन्नतिम्, प्राप्नोति = लभते, कल्पान्तेष्वपि = प्रलयकालेष्वपि,

Scanned with CamScanner

निधनम् = मृत्युं नाशमिति यावत्, न प्रयाति = प्राप्नोति, तत् विद्याख्यम् = विद्यानामकम्, अन्तर्धनम् = गुप्तं धनम्, येषाम् = विदुषाम्, समीपे वर्तते, तान् प्रति= तेषां विदुषां विषये, हे नृपा: = राजान: ! मानम् = तदीयतुच्छतासूचकं गर्वम्, उज्झत = त्यजत, तै: = विद्वद्भि:, सह = साकम्, क: = पुरुष: स्पर्धते, सङ्घर्षम् = अभिभवेच्छां करोति ? न कोऽपीत्यर्थ: ।

'पण्डितप्रवरान् धनमदान्धा राजानस्तुच्छेन स्वात्मनो लक्ष्मीगुणेन लोभयितुं न शक्नुवन्ती' त्याह —

**अधिगतपरमार्थान् पण्डितान् माऽवमंस्था-**
**स्तृणमिव लघु लक्ष्मीर्नैव तान् संरुणद्धि।**
**अभिनवमदलेखाश्यामगण्डस्थलानां**
**न भवति बिसतन्तुर्वारणं वारणानाम् । १७ ।।**

**अन्वय** : ( हे राजन् ?) अधिगतपरमार्थान् पण्डितान् मा अवमंस्था: लघु तृणम् इव लक्ष्मी: तान् नैव संरुणद्धि । बिसतन्तु: अभिनवमदलेखाश्यामगण्डस्थलानां वारणानां वारणं न भवति ।

**भावार्थ**: - सूक्ष्मेण मृणालसूत्रेण मदमत्तानां हस्तिनां बन्धनं यथा न सम्भवति, तथा लक्ष्मीं तुच्छतृणतुल्यां मन्यमाना लोभशून्यास्ते तात्त्विका: पण्डिता न कदापि तया लक्ष्म्या नृपेण वशीकर्तुं शक्या इति ।

**व्याख्या** - हे राजन् ! अधिगतपरमार्थान् , अधिगत: = प्राप्त: ज्ञात इति यावत्, परमार्थ: = तत्वार्थो यै: तान्, पण्डितान् , = सुधिय: मा अवमंस्था: = न तिरस्कुरु, लघु = तुच्छम्, तृणमिव = घास इव, लक्ष्मी: = श्री: (सम्पत्ति:), तान् = पण्डितान्, नैव संरुणद्धि, = न कदापि संरोद्धुं (वशीकर्तुं) शक्नोति । विसतन्तु: = कमलनालसूत्रम्, अभिनवमदलेखाश्यामगण्डस्थलानाम्, अभिनवा = नवीना या मदलेखा = मदजलपङ्क्ति: तया श्यामानि, = कृष्णवर्णानि गण्डस्थलानि= कपोलमित्तय: येषां तथाभूतानाम्, वारणानाम् = गजानाम् वारणम् = रोधकं वन्धनोपयुक्तं वस्तु इति यावत्, न भवति = न जायते ।

तेषां गुणानपहर्तुं तस्य कापि शक्तिर्नास्तीत्युदाहरणमुखेनाह –

NOTES



Scanned with CamScanner

अम्भोजिनीवनविहारविलासमेव
हसस्य हन्ति नितरां कुपितो विधाता ।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः। १८ ।।

**अन्वय** : कुपितः विधाता हंसस्य अम्भोजिनीवनविहारविलासम् एव नितरां हन्ति, तु असौ अस्य दुग्धजलभेदविधौ प्रसिद्धाम् वैदग्ध्यकीर्तिम् अपहर्तुं न समर्थः।

**भावार्थः** - हंसोपरि ब्रह्मा क्रुद्धश्चेत्तर्हि हंसस्य कमलेन सह समागमं न कुर्यात्, किन्तु नीरक्षीरयोर्मिश्रितयोः पृथक्करणं नाम तदीयं गुणमपहर्तुं ब्रह्मणोऽपि नास्ति यथा सामर्थ्यम्, तथा पण्डितानामनादरो राज्ञः सुकरः किन्तु तद्गुणापहारोऽत्यन्तं दुष्करं इति ।

**व्याख्या** - कुपितः = क्रुद्धः, विधाता = प्रजापतिर्बह्मा, हंसस्य = हंसनामकस्य पक्षिणः, अम्भोजिनीवनविहारविलासम्, अम्भोजिन्याः = कमलिन्याः वनम् = समूहः तस्मिन् विहारः = क्रीडा तस्य विलासः = आनन्द इति यावत्, तम्, एव = केवलम्, नितराम् = अत्यन्तम् , हन्ति = नाशयति, तु = किन्तु, असौ ब्रह्मा, अस्य = हंसस्य, दुग्धजलभदविधौ, दुग्धं क्षीरं च जलं सलिलं चेति दुग्धजले तयोः भेदः = पृथग्भावः तस्य विधिः = विधानम् तस्मिन् , प्रसिद्धाम् = विख्याताम् ,वैदग्ध्यकीर्तिम्, वैदग्ध्यम् = विदग्धस्य भावः चातुर्यम्, तदेव कीर्तिः यशः गुण इति यावत्, ताम्, अपहर्तुम् = नाशयितुम्, न समर्थः = न क्षमः ।

'विद्यैव भूषणं पुंसामि'त्याह –

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि, सततं वाग्भूषणं भूषणम् । १९ ।।

**अन्वय** : केयूराणि पुरुषं न भूषयन्ति, चन्द्रोज्ज्वलाः हाराः न, स्थानं न, विलेपनं न, कुसुमं न, अलंकृताः मूर्धजाः न । एका वाणी पुरुषं समलङ्करोति, या संस्कृता धार्यते । खलु भूषणानि क्षीयन्ते, ( किन्तु) वाग्भूषणं सततं भूषणं (भवति)



Scanned with CamScanner

भावार्थः - केयूरादिकं यद्यपि शरीरशोभां सम्पादयति तथापि तेन सर्वेण पुंसामस्थिरं सौन्दर्यं भवति , शद्धा वाणी पुनः सर्वदा वर्तमानं सौन्दर्यं जनयतीति तामेव सम्पादयितुं मनुष्यैः प्रयत्नो विधेय इति ।

व्याख्या – केयूराणि= बाहुभूषणविशेषा अङ्गदानि, पुरुषम् = मनुष्यम्, न भूषयन्ति = नालङ्कुर्वन्ति,चन्द्रोज्ज्वलाः = चन्द्रवद् धवलाः प्रकाशमानाः, हाराः = मुक्तादिमणिनिर्मिता लम्बमानाः स्रजः कण्ठभूषणविशेषाः, न भूषयन्ति, स्नानम् = अवगाहनम्, न भूषयतीति विलेपनम् = शरीरे विलिप्यमानं चन्दनादिद्रव्यम् न भूषयति कुसुमम् पुष्पम्, न भूषयति, अलंकृताः= प्रसाधिताः स्वेच्छानुसारं कङ्कतिकया सरलतां वक्रतां च प्रापिता इति यावत्, मूर्धजाः= मूर्धनि मस्तके जाताः केशाः, न भूषयन्ति । एका = केवला, वाणी = वाग् वचनमिति यावत्, पुरुषम् = मनुष्यम् समलंकरोति = सम्यग् भूषयति, या = वाणी, संस्कृता = व्याकरणादिसंस्कारेण शुद्धा धार्यते = मुखे स्थाप्यते। खलु = निश्चयेन, भूषणानि शरीरे धारणीयाः केयूराद्या अलङ्काराः, क्षीयन्ते = कालक्रमेण नश्यन्ति, किन्तु वाग्भूषणम्, वागेव = वचनमेव, भूषणम् = अलङ्कारः, सततम् = अनिशम् नित्यमिति यावत्, भूषणम् = अलङ्कारो भवति ।

विद्यायाः महिमानं निरूपयति —

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः । २० ।।

अन्वय : विद्या नाम नरस्य अधिकं रूपम् तथा प्रच्छन्नगुप्तं धनम् (अस्ति),विद्या भोगकरी यशः सुखकरी, विद्या गुरूणां गुरुः, विद्या विदेशगमने बन्धुजनः, विद्या परा देवता, विद्या राजसु पूज्यते, धनं तु न (अतः) विद्याविहीनः पशुः (अस्ति) ।

भावार्थः - सर्वतः सहायतां वितरन्ती पूजास्थानं भोगैश्वर्यादिप्रदायिनी जगति परमोपयोगिनी विद्या किल बहूनां गुणानां निवासभूमिः । विद्ययैव मनुष्यो मनुष्यत्वं लभते, तया विना स नूनं विचारशून्योऽकिञ्चित्करः पशुरेवेति ।

व्याख्या - विद्या नाम = 'विद्ये'ति प्रसिद्धं ज्ञानमयं वस्तु नाम शब्दः प्रसिद्धौ, नरस्य = मनुष्यस्य,अधिकम् = अत्यन्तं श्रेष्ठमिति यावत्, रूपम् = स्वरूपम् तथा प्रच्छन्नगुप्तम्,



Scanned with CamScanner

प्रच्छने = गुप्तद्वारे मुखे गुप्तम् = सुरक्षितम् अत्यन्तं गुप्तमिति यावत्, धनम् = द्रव्यम्, अस्ति, विद्या, भोगकरी, भोगान् = स्त्रक्चन्दनवनितादिभोग्यपदार्थान् करोति = सम्पादयतीति तादृशी, यशः सुखकरी, यशः = कीर्त्तिः, सुखम् = आनन्दं च करोति = वितनोतीति तथाभूता, विद्या, गुरूणाम् = महतां श्रेष्ठानाम्, गुरुः = महती श्रेष्ठा, विद्या, विदेशगमने = परदेशयात्रायाम्, बन्धुजनः = हितकारकस्वात्मीयस्निग्धजनसदृशीति यावत्, विद्या, परा = उत्कृष्टा, देवता = देव स्वरूपा, राजसु = राजमध्ये, पूज्यते = आद्रियते, धनं तु = वित्तं तु , न = पूर्वोक्तगुणविशिष्टं पूज्यं नास्तीत्यर्थः, अतः विद्याविहीनः = विद्यया विरहितः पुरुषः, पशुः = पशुरेवास्ति ।

इदानीं धनापेक्षया विद्यायाः प्राधान्यं तैस्तैरुदाहरणैदर्शयति —

**क्षान्तिश्चेत् कवचेन किं किमरिभिः क्रोधोऽस्ति चेद् देहिनां**
**ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम् ।**
**किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि**
**व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् । २१ ।।**

**अन्वय** : देहिनां क्षान्तिः चेत् (तर्हि) कवचेन किं फलम्, क्रोधः अस्ति चेत् अरिभिः किम्, ज्ञातिः चेत् अनलेन किम्, यदि सुहृत् दिव्यौषधैः किम् । यदि दुर्जनाः सर्पैः किम् । यदि अनवद्या विद्या धनैः किमु, व्रीडा चेत् भूषणैः किमु , यदि सुकविता अस्ति राज्येन किम् ।

**भावार्थः** - क्षान्ति (क्षमा) प्रभृतिकं हि कवचादिभ्यो विशेषेण शरीरसंरक्षणादिकं कार्यं कर्तुं शक्नोतीति । अयं श्लोकः 'क्षमा शरीरं भूषयति, क्रोधः पुरुषं नाशयति, ज्ञातिः सन्तापयति, मित्रं हितं करोति, दुर्जनाः प्राणघातका भवन्ति विद्या सर्वं साधयति, व्रीडा शोभां वर्धयति, सत्कविता च जनान् वशीकरोति'त्येवं नीतेरुपदेशं सम्यगुद्धोषयतीत्यलम् ।

**व्याख्या** - देहिनाम्, देह : = शरीरं येषामस्ति ते देहिनः तेषां मनुष्याणामिति यावत्, क्षान्तिः = क्षमा, चेत् = यदि (अस्ति, तहि) कवचेन = वर्मणा लोहमयेन शरीराच्छादनविशेषेण, किं फलम् = किं प्रयोजनम्, शत्रोः प्रहारान् अगणयतः क्षमाशीलस्य शरीरे रक्षकस्य कवचस्य प्रयोजनं किमपि नास्तोत्यथः, क्रोधः = रोषः

Scanned with CamScanner

NOTES

अस्ति चेत् = यदि वर्तते, (तर्हि) अरिभिः = शत्रुभिः किम्, कियत इति शेषः । अनर्थकारके क्राधे विद्यमाने शत्रवः किं नाम तस्मादधिकमनर्थं कर्तुं शक्नुयुः । ज्ञातिः = दायादः सुतबान्धवादिवर्ग इति यावत्, चेत् = यदि (तर्हिं) अनलेन = अग्निना, किं प्रयोजनम्, अग्निवद् दायादाः सन्तापयन्तीति दायादेषु सत्सु वह्नेः प्रयोजनं नास्त्येवेत्यर्थः, यदि = चेत् , सुहृत् = मित्रम्, (तर्हि) दिव्यौषधैः = गुणातिशयशलिभिः भेषजैः, किं फलम्, हितकारिणि मित्रे सति हितप्राप्त्यर्थं पुनर्दिव्यौषधसेवनं निष्फलमेव । यदि = चेत्, दुर्जनाः = खलाः (सन्ति तहि) सर्पैः= भुजङ्गमैः, किं क्रियते,प्राणघातो नाम सर्पाणां काय दुर्जनैरेव क्रियते, अतो दुर्जनेषु सस्तु सर्पाणामावश्यकतैव, का ? यदि = चेत्, अनवद्या = निर्दोषा, विद्या = ज्ञानम्, तहि, धनैः = वित्तैः, किमु = किं प्रयोजनम् सर्वार्थसाधिकायां विद्यायां सत्यां धनस्य प्रयोजनं विशिष्टं पुनः किं नाम स्यात् ? ब्रड़ा = लज्जा महत्सु विनयप्रदर्शकः सङ्कोच इति यावत्, चेत् = यदि, भवेत्, (तहिं) भूषणैः = अलङ्कारैः किमु = किं प्रयोजनम् ,बोडा (विनयापरपर्यायः सङ्कोचः) भूषणानि च शरीरशोभां वर्धयन्तीति ब्रीडायां विद्यमानायां भूषणानां प्रयोजनमव किम् ? यदि चेत्, सुकविता = सुन्दरं कवित्वम्, अस्ति = विद्यते, तर्हि राज्येन = लोकाधिपत्येन, किम् ? व्यर्थमेव तत्; सुखप्राप्तिस्तथा सवषां वशीकरणं सत्कवितया राज्येन च सम्भवतीति सत्कवितागुणे वर्तमाने राज्यं व्यर्थमेवेत्यर्थः । अत्र क्षान्त्यादिभिः कवचादीनां व्यर्थत्वं प्रतिपाद्य कविना धनस्य गौणत्वं विद्यायाश्च मुख्यत्वं दृढं गूढं स्थापितम् ।

अवश्यं सङ्ग्राह्यं लोकस्थितेः स्थापके पुरुषाणां गुणविशेषं दर्शयति –

**दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने**
**प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम् ।**
**शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता**
**ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः । २२ ।।**

अन्वय :स्वजने दाक्षिण्यम्, परिजने दया, दुर्जने सदा शाठ्यम्, साधुजने प्रीतिः नृपजने नयः, विद्वजने च आर्जवम्, शत्रुजने शौर्यम्, गुरुजने क्षमा, कान्ताजने धृष्टता (उचिता) एवं ये च पुरुषाः कलासु कुशलाः (सन्ति), तेषु एवं लोकस्थितिः (वर्तते) । (पाठान्तरम् - नारीजने धूर्तता)



Scanned with CamScanner

NOTES

**भावार्थ:** -स्वजनदाक्षिण्यादीन् लोकव्यहारोचितान् गुणान् संश्रयन्तो लोकस्थितेः स्थापकाः सज्जना एव लोकान् विनयं शिक्षयितुं प्रभवन्तीति ।

**व्याख्या-** स्वजने = पुत्रकलत्राद्यात्मीयवर्गे, दाक्षिण्यम् = औदार्यम् आनुकूल्यमिति यावत् , परिजने = सेवकादिवर्गे, दया = कृपा , दुर्जने = दुष्टे जने, सदा = सर्वस्मिन् काले , शाठ्यम् = वञ्चकत्वम्, साधुजने = सज्जने, प्रीतिः = प्रेम, नृपजने = राजसु, नयः = अनुवर्तनरूपा नीतिः, विद्वज्जने च = पण्डितेषु च, आर्जवम् = सरलता निष्कपटतेति यावत्, शत्रुजने = वैरिषु, शौर्यम् = विक्रमः, गुरुजने = पूज्येषु, क्षमा = सहनशीलता, गुरुणां परुषवचनानि सोढुं शक्तिरिति यावत्, कान्ताजने स्त्रीषु, धृष्टता = प्रगल्भता स्वप्रभुत्वस्थापनमिति यावत्, उचिता । एवम् = अनेन रूपेण, ये च पुरुषाः = ये पुनर्जनाः, कलासु = पूर्वोक्तव्यवहारचातुर्यादिषु गुणेषु, कुशलाः= निपुणाः सन्ति, तष्वेव = तेषां पुरुषाणामाश्रयेणैवेति यावत्, लोकस्थितिः लोकस्य = संसारस्य, स्थितिः = सत्ता वर्तते ।

सत्सङ्गतर्महिमानं वर्णयति -

**जाड्यं धियो हरति सिञ्चति वाचि सत्यं**
**मानोन्नतिं दिशति पापमपाकरोति ।**
**चेतः प्रसादयति दिक्षु तनोति कीर्त्तिं**
**सत्सङ्गतिः कथय किं न करोति पुंसाम् । २३ ।।**

**अन्वय** : धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापम्, अपाकरोति, चेतः प्रसादयति, दिक्षु कीर्त्तिं तनोति (हे मनुष्य ?) कथय, सत्सङ्गतिः पुंसां किं न करोति ।

**भावार्थः** -बुद्धिमान्द्यहरणं सत्यवचनप्रयोगं मानबृद्धिं पापनाशं मनः प्रसादं यशश्च सम्पादयता सत्सङ्गमेन पुरुषाणां किं किं कार्यं न साध्यते ? नूनं सर्वार्थसाधकः सत्सङ्गम इति ।

**व्याख्या** - धियः = बुद्धेः, जाड्यं = मन्दताम् , हरति = नाशयति; वाचि = वचने, सत्यम् = सत्यताम्, सिञ्चति = पल्लवयति स्थापयतीति यावत्, मानोन्नतिम्, मानस्य = आदरस्य, उन्नतिः = बृद्धिः ताम्, दिशति = सम्पादयति, पापम् = किल्विषम्, प्रसादयति = प्रसन्नं निर्मलं करोति, दिक्षु = काष्ठासु, कीर्तिम् = यशः, तनोति =



Scanned with CamScanner

विस्तारयति, (हे मनुष्य!) कथय = ब्रूहि, सत्सङ्गतिः = सत्पुरुषाणां सहवासः, पुंसाम्= पुरुषाणाम्, किम् = कार्यम्, न करोति = न विदधाति ? अपि तु सर्वं करोति ।

साम्प्रतं कवीन्द्राणां सर्वोत्कृष्टत्वं दर्शयति ।

**जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः**

**नास्ति येषां यशःकाये जरामरणजं भयम् ।। २४ ।।**

अन्वय : सुकृतिनः रससिद्धाः ते कवीश्वराः जयन्ति येषां यशः काये जरामरणजं भयं नास्ति ।

भावार्थः - अहो! श्रीमतां धन्यानां पुण्यात्मनां रसिकशिरमणीनां महाकवीनां प्रशंसनीयो महिमा, येषां दिगन्तव्यापिनी कीर्तिनित्यं नवेव जागरूका वर्तत इति ।

व्याख्या - सुकृतिनः= पुण्यवन्तो धन्याश्च, रससिद्धाः, रसेषु = शृङ्गारादिषु पारदादिषु वा सिद्धाः= निपुणाः, पारङ्गताः, ते प्रसिद्धाः वाल्मीकिव्यासकालिदासप्रभृतयः कवीश्वराः= क्रान्तदर्शिनः, महाकवयः जयन्ति = सर्वात्कर्षेण वर्तन्ते, येषाम् = महाकवीनाम्, यशः काये = कीर्तिरूपे शरीरे जरामरणजम्, जरा = वार्धक्यम, मरणम् = मत्युश्चति ताभ्यां जातम् = उत्पन्नम्, भयम् = भीतिः, नास्ति = न विद्यते ।

'सर्वान्तर्यामिनो भगवतो विष्णोः करुणा सर्वं सम्पादयती'त्याह –

**सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः**

**स्निग्धं मित्रमवञ्चकः परिजनो निःक्लेशलेशं मनः ।**

**आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखं**

**तुष्टे विष्टपकष्टहारिणि हरौ सम्प्राप्यते देहिना । ।। २५ ।।**

अन्वयः - विष्टपकष्टहारिणि हरौ तुष्टे सति देहिना सच्चरितः सूनुः, सती प्रियतमा, प्रसादोन्मुखः स्वामी, स्निग्धं मित्रम्, अवञ्चकः परजिनः निःक्लेशलेशं मनः, रुचिरः आकारः, स्थिरः, विभवः, विद्यावदातं मुखं च (इति सर्वं) सम्प्राप्यते । ( पाठान्तरं - विष्टपकष्टहारिणि हरौ स्थाने विष्णुपहारिणीष्टदहरौ )

भावार्थः - सत्पुत्रकलत्रादिप्राप्तिर्भगवतः प्रसादेनैव भवतीति ।



Scanned with CamScanner

NOTES

**व्याख्या** - विष्टपकष्टहारिणि, विष्टपस्य = जगतः, कष्टानि = दुःखानि, हर्तुम् = नाशयितुं शीलमस्येत्येतादृशे, हरौ = विष्णौ परमात्मनि, तुष्टे सति = प्रसन्ने सति, देहिना = मनुष्येण, सच्चरितः = सदाचरणशीलः सूनुः = पुत्रः सती = साध्वी पतिव्रता, प्रियतमा = भार्या, प्रसादोन्मुखः, प्रसादे = प्रसन्नतायाम्,उन्मुखः= तत्परः, स्वामी = प्रभुः, स्निग्धम् = स्नेहयुक्तम्, मित्रम् = सखा, अवञ्चकः = विश्वासपात्रम्, परिजनः = सेवकवर्गः, निक्लेशलेशम्, निर्गतः क्लेशलेशः= स्वल्पमपि दुःखं यस्मात्तत्, मनः= चित्तम्, रुचिरः= सुन्दरः, आकारः= स्वरूपम्, स्थितः= अव्ययः सर्वदा वर्तमान इति यावत्, विभवः = ऐश्वर्यम्, विद्यावदातम्, विद्यया = ज्ञानेन, अवदातम्= निर्मलम् सुखम् = वदनं चेत्येतत्सर्वं, सम्प्राप्यते = सम्यग् लभ्यते ।

**कतिपयाः प्रश्नाः समाधेयाः**

१. सर्वविदां भूषणं किम् ?

२. किं किं कृत्वापि मूर्खजनचित्तम् आराधयेत् ?

३. कदा कवेः मदः व्यपगतः ?

४.किमर्थं जन्तुः परिग्रहफल्गुतां न गणयति ?

५. विवेकभ्रष्टानां विनिपातः कथं भवति ?

६. कीदृशः जनः कथं पुच्छपिषाणहीनः पशुतुल्यः भवति ?

७. कथं मनुष्यरूपेण मृगाश्चरन्ति ?

८. कुत्र जनाः कुत्स्याः स्युः ?

९. विद्वभिः सह कथं न स्पर्द्धते ?

१०. वारणानां वारणं कथं न भवति ?

११. वाग्भूषणं कथं सर्वेषां यथार्थतः भूषणं भवति ?

१२. विद्यायाः गौरवं कीदृशम् ? /कथं विद्याविहीनः पशुः ?

१३. केषु एवं लोकस्थितिः भवति ?

१४. सत्संगतिः किं किं करोति ?

१५. हरौ तुष्टे देहिना किं संप्राप्यते ?

❖❖❖

Scanned with CamScanner

# UNIT- IV

## अनुविभागः चतुर्थः

मनष्याणां कल्याणस्य पन्थानं निरूपयति —

**प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं**
**काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।**
**तृष्णास्त्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा**
**सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ।। २६ ।।**

**अन्वय :** प्राणाघातात् निवृत्तिः, परधनहरणे संयमः, सत्यवाक्यम्, काले शक्त्या प्रदानम्, परेषां युवतिजनकथामूकभावः, तृष्णास्त्रोतोविभङ्गः, गुरुषु विनयः, सर्वभूतानुकम्पा च एषः सर्वशास्त्रेषु अनुपहतविधिः सामान्यः श्रेयसां पन्थाः (अस्ति) ।

**भावार्थः -** सर्वजनसुखकारिता चौर्यराहित्यं सत्यवादित्वं दानशीलता परस्त्रीजनकथायामप्रवृतिर्लोभशून्यता नम्रता सर्वानुग्रहबुद्धिश्चेत्येतानि सर्वाणि पुरुषं कल्याणपथं नयन्तीति ।

**व्याख्या -** प्राणाघातात्, प्राणानाम् = असूनाम्, आघातः = हत्या पीड़नं च तस्मात्, निवृत्तिः= विमुखता, परधनहरणे, परेषां = अन्येषां, धनस्य = वित्तस्य, हरणम् = लुण्ठनं तस्मिन्, संयमः = मनसो विग्रहः अप्रवृत्तिरिति यावत्, सत्यवाक्यम् = यथार्थभाषणम्, काले = योग्ये समये, शक्त्या = स्वसामर्थ्यानुसारम्, प्रदानम् = धनादिवितरणम्, परेषाम् = अन्येषां पुरुषाणाम् (इदं युवतिशब्देन सम्बध्यते), युवतिजनकथामूकभावः, युवतिजनकथासु = स्त्रीविषयकवार्तासु , मूकभावः = मौनम्, तृष्णास्त्रोतोविभङ्गः, तृष्णायाः = लोभस्य, स्त्रोतः = प्रवाहः, तस्य विभङ्गः= अवरोधनम्, गुरुषु = पूज्येषु, विनयः = नम्रता, सर्वभूतानुकम्पा च, सर्वेषु = अखिलेषु भूतेषु प्राणिषु, अनुकम्पा = दया च, एषः = अयम्, सर्वशास्त्रेषु = सर्वेष्वागमेषु अनुपहतविधिः,अनुपहतः = अक्षुण्णः अनुस्यूत इति यावत्, विधिः = विधानं यस्य सः सामान्यः= सकलजनसाधारणः, श्रेयसाम् = कल्याणानाम्, पन्थाः = मार्गः अस्ति ।

'अधममध्यमोत्तमानां सर्वेषां पुरुषाणां कार्यसम्पादनविधौ कीदृशी स्थितिर्भवती' ति प्रतिपादयति -

NOTES



Scanned with CamScanner

NOTES

**प्रारभ्यते न खलु विघ्नभयेन नीचैः**

**प्रारभ्य विघ्ननिहता विरमन्ति मध्याः ।**

**विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः**

**प्रारब्धमुत्तमजना न परित्यजन्ति ।। २७ ।।**

**अन्वय** : नीचैः विघ्नभयेन न प्रारभ्यते खलु, मध्याः प्रारभ्य विघ्ननिहताः विरमन्ति उत्तमजनाः विघ्नैः पुनः पुनः प्रतिहन्यमानाः अपि प्रारब्धं न परित्यजन्ति ।

**भावार्थः** - उत्तममध्यमाधमभेदेन यथा पुरुषास्त्रिविधा भवन्ति, तथा तेषां कार्याणां स्वरूपाण्यपि त्रिविधानि । उत्तमः पुरुषो मनस्वी विघ्नवज्रप्रहारमविगणय्य, कार्य-पूर्णतां नीत्वैव विश्रान्तिं लभते, मध्यमः प्रारभ्यापि कार्यं, तस्य दुष्करतामनुभवन् भग्नोद्यमः सन् कार्यात्पराङ् मुखो भवति, अधमः पुनर्विघ्नसम्भावनया कार्यस्यारम्भमेव न करोति ।

**व्याख्या** - नीचैः = अधमैः पुरुषैः, विघ्नभयेन, विघ्नेभ्यः = कार्यनाशकेभ्यः प्रत्यूहेभ्यः,भयेन = भीत्या कारणेन, न प्रारभ्यते = कार्यारम्भ एव न क्रियते । मध्याः = नोत्तमा न चाधमाः, किन्तु मध्यमस्थितिकाः साधारणाः, जनाः प्रारभ्य = कार्यारम्भं प्रारम्भं कृत्वा, विघ्नविहताः विघ्नैः = प्रत्यूहैः विहताः = पीड़िताः, सन्तः भग्नोद्यमाः इति यावत्, विरमन्ति = कार्यं त्यजन्ति । उत्तमजनाः = श्रेष्ठगुणाः पुरुषाः, विघ्नैः = प्रत्यूहैः, पुनः पुनः = बारं बारम्, प्रतिहन्यमाना अपि = आक्रान्ता अपि, प्रारब्धम् = उपक्रान्तं कर्म, न परित्यजन्ति = नोपेक्षन्ते, सर्वदा कुर्वन्त्येवेत्यर्थः ।

'अत्यन्तं दुष्करां स्वभावसिद्धां सदाचारपरिपाटीं पालयन्तः सज्जना लोकानामुपदेशकतां प्रमाणतां च गच्छन्ती' त्येवं विवक्षुराह ।

**असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः**

**प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।**

**विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां**

**सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ?।। २८ ।।**

**अन्वय** : असन्तः न अभ्यर्थ्याः, कृशधनः सहृदपि न याच्यः, प्रिया न्याय्या वृत्तिः (आश्रयणीया), मलिनम् असुभङ्गे अपि असुकरम्, विपदि उच्चैः स्थेयम्, महतां च पदम् अनुविधेयम्, इदं विषमम् असिधाराव्रतं सतां केन उद्दिष्टम् ?

Scanned with CamScanner

**भावार्थः** - स्वभावसिद्धोऽयं सज्जनानां गुणः, तत् ते खलजनाभ्यर्थनादिरूपात् सदाचारात् कदापि विरता न भवन्तीति ।

**व्याख्या** - असन्तः = दुर्जनाः, न अभ्यर्थ्याः = न प्रार्थनीयाः, कृशधनः कृशम् = स्वल्पं क्षीणं वा धनम् = वित्तं यस्य तादृशः,सुहृदपि = मित्रमपि, न याच्यः = नाभ्यर्थनीयः, प्रिया = सन्तोषकारिणी, न्याय्या = न्याययुक्ता,वृत्तिः = जीविका, आश्रयणीया मलिनम् = निन्द्यं कर्म,असुभङ्गेऽपि = प्राणान्तकालेपि, असुकरम् = दुष्करम्, विपदि = विपत्तौ, उच्चैः = अदीनम् उन्नतं च यथा स्यात्तथा, स्थेयम् = वर्तितव्यम्, च = अपि च, महताम् = महापुरुषाणाम्, पदम् = पदवी, अनुविधेयम् = अनुवर्तनीयम्, इदम् = पूर्वोक्तस्वरूपम्, विषयम् = दुष्करं क्लेशकरम्, असिधारव्रतम् = खड्गधारेव तीक्ष्णतरो नियमः, सताम् = सत्पुरुषाणाम्, केन = पुरुषेण, उद्दिष्टम् = उपदिष्टम् ? न केनापीत्यर्थः ।

'मानी जनः कृच्छ्रगतोऽपि हीनां दीनां स्वमहत्त्वापहारिणीं च दशां न कदापि स्वीकरोतीति' सिंहोदाहरेणेन दर्शयति ।

**क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्राणोऽपि कष्टांदशा -**
**मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।**
**मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः**
**किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ?।। २९ ।।**

**अन्वय** : क्षुत्क्षामः अपि जराकृशः अपि शिथिल प्राणः अपि कष्टां दशाम् आपन्नः अपि विपन्नदीधितिः अपि मत्ते भेन्द्र विभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः मानमहताम् अग्रेसरः केसरी प्राणेषु नश्यत्सु अपि तृणम् अत्ति किम् ? ( पाठान्तरम् - पिशित स्थाने कवल)

**भावार्थः** - अवस्थाविपर्ययान्नानाप्रकाराणि कष्टान्यनुभवन् सर्वतः सामर्थ्यहीनोऽपि मानी पुरुषो निजं पुरातनं सत्त्वगुणं स्मरन् न यातु तथा क्षुद्रां वृत्तिं समाश्रयति, यथा जराजर्जरो मरणासन्नोपि सिंहः स्वयं हतैर्गजैरेव जीवनं वाहयन् शुष्कतृणानि भक्षयितुं न कदाप्युत्साहसम्पन्नो भवतीति ।



Scanned with CamScanner

NOTES

**व्याख्या -** क्षुत्क्षाम:, क्षुधा = बुभुक्षया क्षाम: = क्षीण: दर्बल इति यावत्, तादृशोऽपि जराकृश: जरया = बृद्धत्वेन, कृश: = जीर्ण: जर्जशरीरम् इति यावत्, तथाविधोऽपि शिथिलप्राण:, शिथिल: = श्लथ: न्यून: प्राण: = शक्तिर्यस्य तथाभूतोऽपि, कष्टाम् = कष्टकारिणीम्, दशाम् = अवस्थाम्, आपन्नोपि = प्राप्तोऽपि विपन्नदीधिति:,विपन्ना = नष्टा दीधिति:= कान्तिर्यस्य सोऽपि, मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासकबद्धस्पृह: मत्ता: = मदजलपूर्णा: ये इभेन्द्रा: गजश्रेष्ठा: तेषां विभिन्ना: = विदीर्ण: ये कुम्भा:= गण्डस्थलानि तेषां पिशितम् = मांसम् तस्य ग्रास: = भक्षणं तस्मिन् एकम् = केवलम् बद्धा = नियता रुद्धा स्पृहा = इच्छा यस्य स: मानमहताम्, मानेन = स्वाभिमानेन महान्त: = उत्कृष्टा: तेषाम्, अग्रेसर: = अग्रणी:, केसरी = सिंह:, प्राणेषु = असुषु नश्यत्स्वपि = क्षीयमाणेष्वपि, जीर्णम् = पुराणं शुष्कमिति यावत्, तृणम् = घासम् ,अत्ति = खादति किम्? न कदापि खादतीत्यर्थ: ।

पूर्वोक्तमर्थमेव पुन: प्रकारान्तरेण समर्थयति ।

**स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकं**

**श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधाशान्तये ।**

**सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं**

**सर्व: कृच्छ्रगतोऽपि वाच्छति जन: सत्त्वानुरूपं फलम्।। ३० ।।**

**अन्वय :**श्वा स्वल्पस्नायुवसावशेषमलिनं निर्मांसम् अपि अस्थिकं लब्ध्वा परितोषम् एति तु तत् तस्य क्षुधाशान्तये न (भवति) ? सिंह: अङ्कम् आगतं जम्वुकम् अपि त्यक्त्वा द्विपं निहन्ति । (हि) कृच्छ्रगत: अपि सर्व: जन: सत्वानुरूपं फलं वाञ्छन्ति । (पाठान्तरम् - निर्मांसमप्यस्थिकं स्थाने निर्मांसमप्यस्थि गो:)

**भावार्थ:** - कुक्कुरो तथा शुष्कं स्वल्पमप्यस्थिमात्रं प्राप्य सन्तुष्यति, यथा च सिंह: प्राप्तमपि शृगालं परित्यज्य गजायैव स्पृहयति तथैव सर्वे लोका: स्वसामर्थ्यानुसारं स्वां स्वां प्रकृतिमेवाश्रयन्तीति । एतेन प्रकृतिर्दुस्त्यजेति कविना स्फुटं प्रतिपादितम् ।

**व्याख्या -** श्वा = शुनक:, स्वल्पस्नायुवसावशेषमलिनम् स्नायु: = वस्नसा तत्तच्छरीरावयवसन्धिबन्धनरूपा, वसा = हन्मेदोमांसजन्य: स्नेहविशेषश्च तयोर्द्वयो: स्वल्प: लेशरूपेण स्थित: य: अवशेष: = अवशिष्टभाग: तेन मलिनम् = मलदूषितम्, निर्मांसमपि = मांसेन रहितमपि, अस्थिकम् = कुत्सितं स्वल्पं या कीकसम्,

Scanned with CamScanner

कुत्सितार्थे अल्पार्थ वा कप्रत्ययः लब्ध्वा = प्राप्य, परितोषम् = प्रसन्नताम्, इति = प्राप्नोति, तु = किन्तु, तत् = अस्थि, तस्य = शुनः, क्षुधाशान्तये = बुभुक्षानिवारणाय तृप्तय इति यावत्, न भवति, सिंहः = मृगराजः, अङ्कम् = उत्सङ्गम्, आगतमपि = प्राप्तमपि, जम्बकम् = शृगालम्, त्यक्त्वा = विहाय, द्विपम् = हस्तिनम्, हन्ति = मारयति । तथाहि, कृच्छ्रगतोऽपि कष्टेषु पतितोऽपि, सर्वो जनः = सकलो मनुष्यः, सत्वानुरूपम्, सत्त्वस्य = उत्साहसम्पादकस्य, चेतोगतस्य धर्मः विशेषस्य शक्तेरिति यावत्, अनुरूपम् = अनुकुलम्, फलम् = लाभम्, वाञ्छति = इच्छति ।

'आश्रयदातुः पुरस्तादुत्तमाधमयोः कीदृशो व्यवहारो भवती' त्युदाहरणमुखेन प्रतिपादयति ।

**लाङ्गूलचालनमधश्चरणावपातं**

**भूमौ निपत्य वदनोदरदर्शनं च ।**

**श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु**

**धीरं विलोकयति चाटुशतैश्च भुङ्क्ते। । ३१ । ।**

**अन्वय :** श्वा पिण्डदस्य (पुरतः) लाङ्गुलचालनम् अधः चरणाऽवपातं भूमौ निपत्य वदनोदरदर्शनं च कुरुते, गजपुङ्गवः तु पिण्डदस्य (पुरतः) धीरं विलोकयति चाटुशतैः च भुङ्क्ते ।

**भावार्थ :** अधमप्रकृतिर्जनः श्वैव भोजयितुः पुरः स्वीयां चञ्चलतां क्षुद्रताञ्च दर्शयति, उत्तमप्रकृतिः पुनर्गजराज इव गम्भीरतां मानिताञ्च प्रकटयतीति ।

**व्याख्या -** श्वा = कुक्कुरः, पिण्डदस्य = भोजयितुः, 'पुरतः' लाङ्गुलचालनम्,लाङ्गुलस्य = पुच्छस्य चालनम् तत्, अधः = नीचैः, चरणावपातम् = पादयोःपतनम्, भूमौ = पृथिव्याम्, निपत्य = पतित्वा, वदनोदरदर्शनम्, वदनम् = मुखं च उदरम् = जठरं चेति तयोः दर्शनम् = प्रकटिकरणम् तत्, कुरुते = विधत्ते, गजपुङ्गवः = करिश्रेष्ठः, तु = पुनः, पिण्डदस्य 'पुरतः' धीरम् = गम्भीर यथा स्यात्तथा, विलोकयति = पश्यति, चाटुशतैश्च = अनेकैरभ्यर्थनोपचारैश्च, भुङ्क्ते = भोजनं करोति ।



Scanned with CamScanner

NOTES

'वंशोन्नतिकरणस्यैव पुंसो जन्म सफलमि' त्येवं निरूपयति ।

**परिवर्त्तिनि संसारे मृतः को वा न जायते**

**स जातो येन जातेन याति वंशः समुन्नतिम् ।। ३२ ।।**

**अन्वय** : परिवर्तिनि संसारे को वा न मृतः, कः वा न जायते । ( किन्तु) सः जातः, येन जातेन वंशः समुन्नतिं याति ।

**भावार्थ** : संसारोऽयं जन्ममरणयोः क्षेत्रम् । अत्र जन्ममरणे प्रतिक्षणं भवत एव । तस्यैव पुनः सफलं जन्म, येन वंशोन्नतिः क्रियत इति ।

**व्याख्या** - परिवर्त्तिनि = परिवर्तनशीले नित्यमेव नूतनतां भजमान इति यावत्, संसारे = जगति, को वा पुरुषः न मृतः, न मृत्युं प्राप्तः को वा पुरुषः न जायते = नोत्पद्यते । किन्तु सः पुरुषः जातः = उत्पन्नः, येन जातेन = उत्पन्नेन सता, वंशः = कुलम्, समुन्नतिम् = बृद्धिम् उत्कर्षम्, याति = प्राप्नोति ।

'मनस्वी सर्वोत्कर्षेण जगति वर्तते, विजनवासेन शरीरत्यागमपि वा बहुमन्वेत' इत्याह ।

**कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः**

**मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ।। ३३ ।।**

**अन्वय** : मनस्विनः कुसुमस्तवकस्य इव द्वयी वृत्तिः (भवति) । (कुसुमस्तवकः इव) (सः) सर्वलोकस्य मृध्नि वा (तिष्ठति) वने एव वा शीर्यते ।

**भावार्थ** : पुष्पगुच्छो यथा लोकानां मस्तकमारूढो भवति, अथवा वन एव निवसन् म्लानतां गच्छति तथा मनस्वी जनः सर्वेभ्यः प्राप्तुं प्रयतते, एकाकी वा भूत्वा शरीरं त्यक्तुमभिलषतीति ।

**व्याख्या** - मनस्विनः = विचारवतो मानिनः पुरुषस्य, कुसुमस्तवकस्येव, कुसुमानाम् = पुष्पाणां स्तवकः = गुच्छः समूह इति यावत्, तस्येव, द्वयी = द्विविधा, वृत्तिः = वर्तनं स्थितिः,भवति, पुष्पगुच्छ इव स मनस्वी पुरुषः, सर्वलोकस्य = सकलजनस्य,मूर्ध्नि वा = मस्तके वा, तिष्ठति, वने एव वा शीर्यते = शीर्णो भवति ।

'अधिकबले पराक्रमं दर्शयितुमिच्छुर्मनस्वी कष्टं प्राप्तोऽपि क्षुद्रानुपेक्ष्य महत्स्वेव स्वरमाक्रमणं करोती' ति सोदाहरणं दर्शयति ।

Scanned with CamScanner

NOTES

**सन्त्यन्येऽपि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषा-**
**स्तान् प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते ।**
**द्वावेव ग्रसते दिवाकरनिशाप्राणेश्वरौ भास्वरौ**
**भ्रातः! पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः।। ३४ ।।**

अन्वय : हे भ्रातः! पश्य, बृहस्पतिप्रभृतयः अन्येऽपि पञ्चषाः सम्भाविताः (ग्रहाः) सन्ति किन्तु विशेषविक्रमरुचिः शीर्षावशेषाकृतिः दानवपतिः 'एषः' राहुः तान् प्रति न वैरायते । भास्वरौ द्वौ दिवाकरनिशाप्राणेश्वरौ पर्वणि ग्रसते । ( पाठान्तरम् - दिवाकरस्थाने दिनेश्वर,भास्वरौ स्थाने भासुरौ)

भावार्थ : 'मानी पुरुषो दीनां दशां प्राप्तोऽपि वलिष्ठष्वेव पराक्रमं दर्शयति न च क्षुद्रेष्विति राहुस्तेजस्विनां श्रेष्ठं सूर्यं चन्द्रमसञ्चैव पर्वकाले गृह्णाति, बृहस्पतिप्रभृतींश्च न किञ्चिद्गिणयतीति ।

व्याख्या - हे भ्रातः= हे मनुष्य! पश्य = विलोक्य, बृहस्पतिप्रभृतयः= देवगुर्वाद्याः मङ्गलबधगुरुशुक्रशनिरूपाः ,पञ्चषाः = पञ्च षट् वा, सम्भाविताः = श्रेष्ठाः, ग्रहाः सन्ति = वर्तन्ते, किन्तु विशेषविक्रमरुचिः विशेषे = बलाधिके यः विक्रमः = शौर्य तत्र रुचिः अभिलाषः यस्य सः शीर्षावशेषाः कृतिः, शीर्षम् = शिर एव अवशेषः = अवशिष्टभागा यस्याः तादृशी आकृतिः = आकारः स्वरूपं यस्य तथाभूतः, दानवपतिः = दनुजानां स्वामी, 'एषः = प्रसिद्धः' राहुः तन्नामक उपग्रहः तान् प्रति =बहस्पत्यादीन् पञ्चषान् ग्रहान् विषयीकृत्य, तः सहेति यावत्, न वैरायते = न वैरं कराति, भास्वरौ = प्रकाशमानौ, द्वौ = उभौ, दिवाकर निशाप्राणेश्वरौ दिवाकरः = सूर्यः निशायाः= रात्रेः प्राणेश्वरः = वल्लभः चन्द्रश्चति तौ, एव = केवलम्, पवणि = अमायां पूर्णिमायां च,ग्रसते = आक्रमते, आच्छादयतीत्यर्थः ।

**वहति भुवनश्रेणिं शेषः फणाफलकस्थितां**
**कमठपतिना मध्ये पृष्ठं सदा स च धार्यते ।**
**तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-**
**दहह! महतां निःसीमानश्चरित्रविभूतयः।। ३५ ।।**

अन्वय : शेषः फणाफलकस्थितां भुवनश्रेणिं वहति, स च कमठपतिना सदा मध्येपृष्ठं धार्यते, तमपि पयोधिः अनादरात् क्रोडाधीनं कुरुते । अहह! महतां चरित्रविभूतयः निःसीमानः (भवति) ।



Scanned with CamScanner

**भावार्थ** : जगति शक्तेर्न्युनाधिकभावौ सर्वतो दृश्यते, यथा फणासु सकल जगद्धारं धारयन्तं शेषं पृष्ठे वहन् कूर्मराजः समुद्रेण सलीलं निजाङ्कमारोप्यते । एतेन स्फुटं प्रतीयते - 'महत्त्वस्येयत्ता न केनापि वर्णयितुं शक्ये' ति ।

**व्याख्या** - शेषः = सहस्रफणः सर्पराजः, कणाफलकस्थिताम्, फणाः = सर्पशिरोमागात्मकाः फटा एव फलकम् = अतिमहती पट्टिका तस्मिन् स्थिता = वर्तमाना ताम्, भुवनश्रेणिम् = भुवनानां पातालादिलोकानां श्रेणीः = पंक्तिः ताम्, वहति = धारयति, स च = स पुनः शेषनागः कमठपतिना = विष्णोरवतारभूतेन कच्छपराजेन, सदा = नित्यम्, मध्येपृष्ठम् = पृष्ठस्य मध्ये उदर पश्चाद्भाग इति यावत्, धार्यते = उह्यते, तमपि = कुर्मराजमपि, प्रयोधिः = समुद्रः, अनादरात् = लीलया अनायासमिति यावत्, क्रोडाधीनम् = अङ्कगतम्, भुजद्वयान्तराले इति यावत्, कुरुते = करोति । अहह = आश्चर्यम्, महताम् = महात्मनाम्, चरित्रविभूतयः = कार्यविशेषसम्पदः, निसीमानः = निर्गता सीमा = मर्यादा याभ्यस्ताः अपरिमिता इति यावत्, भवन्ति ।

'विपत्तिकाले दुःखिनं पित्रादिस्वजनं विहाय स्वप्राणरक्षणायान्यत्र गन्तुं नार्हति पुत्र' इति मैनाकपर्वतोदाहरणेनाह–

**वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश-**
**प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः ।**
**तुषाराद्रेः सूनोरहह! पितरि क्लेशविवशे**
**न चासौ सम्पातः पयसि पयसां पत्युरुचितः ।। ३६ ।।**

**अन्वय** : तुषाराद्रेः सूनोः उद्गच्छद्बहुलदहनोद्गारगुरुभिः समदमघवन्मुक्त-कुलिशप्रहारैः पक्षच्छेदः वरम्, (किन्तु) अहह! पितरि क्लेशविवशे (सति) पयसां पत्युः पयसि असौ सम्पातः न च उचितः ।

**भावार्थ** : पर्वतानां पक्षांश्छेत्तुं प्रवृत्तमिन्द्रं विलोक्य यन्मैनाकः पितरं विपद्गतं विहाय स्वात्मानं ततो गोपायितुं समुद्रे लीयते स्म, तत्तस्य नोचितम्, प्रत्युत तदानीमिन्द्रस्य पुरतोऽवस्थाय स्वपक्षयोश्छेदनमेव कर्तव्यमासीत्तेन यतः पुत्रः पितुः साहाय्यं कर्तुमर्हतीति ।

**व्याख्या** - तुषाराद्रेः = हिमालयपर्वतस्य, सूनोः = पुत्रस्य मैनाकस्येत्यर्थः, उद्गच्छद्बहुलदहनोद्गारगुरुभिः, बहुलः = प्रचुरः स चासौ दहनः =



Scanned with CamScanner

अग्नि: तस्य उद्गार: = उद्गिरणम् ज्वालेति यावत्, उद्गच्छन् = ऊर्ध्वं प्रसरन् य: बहुलदहनोद्गार: तेन गुरव: = अगुणीभूता असह्या इति यावत्, तै: समदमघवन्मुक्तकुलिशप्रहारै:, मदेन = गर्वेण सह वर्तमान: समद: स चासौ मघवा = इन्द्र:, तेन मुक्तम् = क्षिप्तं यत् कुलिशम् = वज्रम्, तस्य प्रहारा: = आघाता: तै:, पक्षच्छेद: पक्षाणाम् = गरुताम् छेद: = विदारणम्, वरम् = मनाक् प्रिय: किन्तु अहह = कष्टम्, पितरि = हिमालये, क्लेशविवशे = कष्टे नाभिभूते सति, पयसां पत्यु:= जलानां स्वामिन: समुद्रस्य, पयसि = जले, असौ = प्रसिद्ध:, सम्पात: = पतनम्, न च उचित: = न योग्य: ।

'अचेतनोऽपि परापमानं न सहते किमुत सचेतन' इति सोदाहरणमाह -

**यदचेतनोऽपि पादै: स्पृष्ट: प्रज्वलति सवितुरिनकान्त: ।**

**तत्तेजस्वी पुरुष: परकृतनिकृतिं कथं सहते ?।। ३७ ।।**

**अन्वय** : अचेतन: अपि इनकान्त: सवितु: पादै: स्पृष्ट: यत् प्रज्वलति, तत् तेजस्वी पुरुष: परकृतनिकृतिं कथं सहते ?

**भावार्थ** : सूर्यपादस्पर्शात्सूर्यकान्तमणि: प्रज्वलन् 'पददलितो भूत्वा न कोऽपि तेजस्वी पराभवं सहमानस्तिष्ठती' त्येवं द्योतयतीति ।

**व्याख्या** - अचेतनोऽपि = चैतन्यशून्योऽपि, इनकान्त: = सूर्यकान्तमणि:, सवितु: = रवे:, पादै: = किरणै: चरणैश्च, स्पृष्ट: = सम्पर्कं प्राप्त: ताडितश्च सन्, यद् = यस्मात् कारणात्, प्रज्वलति = प्रज्वलित: कोपपूर्णश्च भवति, तत् = तस्मात् कारणात्, तेजस्वी, तेज: = अपमानामर्षणरूप: सत्त्वसूचक: कश्चिदान्तरो गुण: सोऽस्यास्तीति तादृश:, पुरुष: = पुरुषार्थसम्पन्नो मनुष्य:, परकृतनिकृतिम्, परै: = अन्यै: कृता = उपस्थापिता या निकृति: = शठता अपमानो वा तम्, कथम् = केन प्रकारेण सहते = उपेक्षते; नोपेक्षत इत्यर्थ: ।

'बालोऽपि तेजस्वी पराक्रमणायैव स्पृहयत' इत्याह -

**सिंह: शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।**

**प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतु:।। ३८ ।।**

**अन्वय** : शिशु: अपि सिंह: मदमलिनकपोलभित्तिषु गजेषु निपतति,सत्त्ववताम् इयं प्रकृति: (अस्ति) खलु, वय: तेजस: हेतु: न (भवति) ।



Scanned with CamScanner

NOTES

**भावार्थ** : सिंह स्वल्पवया अपि गजमाक्रम्य स्वीयं शौर्यं दर्शयति, यतः सत्त्ववान् मानी प्राणी शत्रुं तिरस्कृत्यैव निवृतिं लभते । तेजो हि न वयः सापेक्षम् तत्तु मानिनः स्वभावगतो धर्म एवेति ।

**व्याख्या** : शिशुरपि = अत्यल्पवयस्कोऽपि, सिंह =केसरी, मदमलिनकपोलभित्तिषु, मदेन = मदसलिलेन मलिनाः = श्यामाः कपोलभित्तयः गण्डस्थलानि येषां तेषु, गजेषु = हस्तिषु, निपतति = आक्रम्योपरि तिष्ठति, सत्त्ववताम् = बलशालिनाम् , इयम् = पूर्वोक्ता विक्रमदर्शनरूपा, प्रकृतिः = स्वभावः, अस्ति, खलु = निश्चयेन, वयः = अवस्था, तेजसः = प्रतापस्य, हेतुः = कारणम्, न = न भवति ।

'इदानीं धनस्य महिमानमवश्योपादेयत्वं च वर्णयति'

**जातिर्यातु रसातलं गुणगणैस्तत्राप्यधो गम्यतां**
**शीलं शैलतटात् पतत्वभिजनः सन्दह्यतां वह्निना ।**
**शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं**
**येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे।। ३९।।**

**अन्वय** : जातिः रसातलं यातु, गुणगणैः तत्र अपि अधः गम्यताम्, शीलं शैलतटात् पततु, अभिजनः वह्निना सन्दह्यताम्, वैरिणि शौर्ये आशु वज्रं निपततु, अर्थः नः केवलम् अस्तु, येन एकेन विना इमे समस्ताः गुणाः तृणलवप्रायाः (भवन्ति) ।

**भावार्थ** : संसारेऽस्मिन् धनस्यैव प्राधान्यं वर्तते जात्यादिकं नश्यतु नाम तेन विना न कापि हानिर्भवति । गुणाः सन्तोऽपि धनाभावे न शोभन्ते, अतः सर्वैर्धनमेव सम्पादनीयमिति ।

**व्याख्या** - जातिः = ब्राह्मणत्वादिः साधारणो धर्मः, रसातलम् = भुवस्तलं पातालम्, यातु, = गच्छतु, गुणगणैः, गुणानाम् = धैर्यौदार्यादीनाम् गणैः = समुदायैः, तत्रापि = रसातलेऽपि तदपेक्षयेति यावत्, अधः = नीचैः प्रदेशे, गम्यताम् = प्रयाणं क्रियताम्, शीलम् = सद्वृत्तम्, शैलतटात् = पर्वतप्रान्तभागात्, पततु = भ्रंश्यतु, अभिजनः = कुलम्, वह्निना = अग्निना, सन्दह्यताम् = भस्मीक्रियताम्, वैरिणि = शत्रुभूते, शौर्ये = पराक्रमे, आशु = शीघ्रम्, वज्रम् = कुलिशम्, पततु = पतितं भवतु, अर्थः = धनम्, सः = अस्माकम्, केवलम् = सर्वावच्छेदेन, एकं तदेवेत्यर्थः, अस्तु = वर्तताम्,

Scanned with CamScanner

एकेन = अद्वितीयेन, येन = धनेन, विना = अन्तरेण, इमे = पूर्वोक्ता जात्यादयः, समस्ता गुणाः = सर्वे गुणाः, तृणलवप्रायाः = तृणस्य लेशेन सदृशाः तुच्छा इति यावत्, भवन्ति ।

'धनहीनः पुरुषो विचित्रामेव कञ्चिदवस्थां कलयती' ति दर्शयति -

**तानीन्द्रियाण्यविकलानि तदेव नाम**
**सा बुद्धिरप्रतिहता वचनं तदेव ।**
**अर्थोष्मणा विरहितः पुरुषः क्षणेन**
**सोऽप्यन्य एव भवतीति विचित्रमेतत् ।। ४० ।।**

अन्वय : अविकलानि तानि इन्द्रियाणिः; तत् एव नाम, अप्रतिहता सा बुद्धिः, तदेव वचनम् (किन्तु) अर्थोष्मणा विरहितः सः अपि पुरुषः क्षणेन अन्यः एव भवति - इति एतत् विचित्रम् (अस्ति) ।

भावार्थ : इन्द्रियादिषु यथापूर्व वर्तमानेष्वपि धनस्याभावेन मनुष्यः स्वरूपेणैव नश्यतीत्यतो धनं संसारिणां परमावश्यकमिति ।

व्याख्या - अविकलानि = विकाररहितानि पूर्ववदेव शक्तिमन्तीति यावत्, तानि = प्रसिद्धानि; इन्द्रियाणि = चक्षुराद्यानि करणानि, तदेव = पूर्वसिद्धमेव, नाम = अभिधानम्, अप्रतिहता = अकुण्ठिता सर्वतः प्रसरन्ती, सा = पूर्वसदृशी, बुद्धिः = प्रज्ञा, तदेव = पूर्ववदेव, वचनम् = उक्तिः, किन्तु अर्थोष्मणा, अर्थस्य = धनस्य ऊष्मा = उष्णता मद इति यावत्, तेन, विरहितः = विनाकृतः, सोऽपि = स एव, पूर्ववदेव हस्तपादाद्यवयवैः सम्पन्नः इत्यर्थः, पुरुषः = मनुष्यः, क्षणेन = निमेषमात्रेण, अन्य एव = पूर्वावस्थातो भिन्न एव, भवति = सञ्जायते, इत्येतत् = पूर्वोक्तमिदम्, विचित्रम् = आश्चर्यकरम् अस्ति ।

'गुणहीनोऽपि धनवान् गुणवानेवे'ति प्रतिपादयति-

**यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः ।**
**स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति ।। ४१ ।।**

अन्वय : यस्य (समीपे) वित्तम् अस्ति, स नरः कुलीनः, स पण्डितः, स श्रुतवान् (सः) गुणज्ञः स एव वक्ता, स च दर्शनीयः (भवति) सर्वे गुणाः काञ्चनम् आश्रयन्ति ।

NOTES

NOTES

**भावार्थ** : कुलीनत्वादयो हि गुणा धनं विना न प्रकाशन्ते । धनेनैव नूनं मनुष्यः कुलीनत्वादिगुणवत्त्वसङ्केतं प्राप्नोतीति ।

**व्याख्या -** यस्य = पुरुषस्य समीपे, वित्तम् = धनम्, अस्ति = विद्यते, सः नरः = मनुष्यः, कुलीनः = सत्कुलोत्पन्नः, सः पण्डितः = प्राज्ञः , सः श्रुतवान, श्रुतम् = शास्त्रम् अस्यास्तीति तादृशः अधीतविद्यो विद्वान्, स गुणज्ञः = गुणानां ज्ञाता स एव वक्ता =वाक्शक्तिसम्पन्नः स च = पुनः स पुरुषः दर्शनीयः = द्रष्टुं योग्यः सुन्दरः भवति । सर्वे गुणाः = कुलीनत्वादयः समस्ता गुणाः, काञ्चनम् = सुवर्णं धनम्, आश्रयन्ति = सेवन्ते, तत्रैव निवसन्तीत्यर्थः ।

'धनस्य विनाशकारणमिदानीमुदाहरणमुखेन दर्शयति-

**दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात् सुतो लालना-**
**द्विप्रोऽनध्ययनात् कुलं कुतनयाच्छीलं खलोपासनात्।**
**ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया-**
**न्मैत्री चाप्रणयात् समृद्धिरनयात्त्यागप्रमादाद्धनम् । । ४२ ।।**

**अन्वय** : नृपतिः दौर्मन्त्र्यात्, यतिः सङ्गात्, सुतः लालनात्, विप्रः अनध्ययनात्, कुलं कुतनयात्, शीलं खलोपासनात्, ह्री मद्यात्, कृषिः अपि अनवेक्षणात्, स्नेहः प्रवासाश्रयात्, मैत्री अप्रणयात्, समृद्धिः अनयात्, धनं च त्यागप्रमादात् विनश्यति । ( पाठान्तरम् - त्यागप्रमादात् स्थाने त्यागात् प्रमादात्)

**भावार्थः** - राज्ञा सन्मन्त्रप्रयोगः, कर्त्तव्यः, यतिना लोकसंसर्गः परिहरणीयः, पुत्रस्यानुचितं लालनं न कार्यम्, विप्रेण स्वाध्यायोऽध्येतव्यः,वंशोन्नतिं कर्तुकामेन सुपुत्रेण भवितव्यम्, सदाचारिभिर्दुर्जनसंसर्गस्त्याज्यः, विनयार्थिभिर्मद्यं न पेयम्, कृषिः पुनः पुनरवेक्षणीया, स्नेहार्थिभिश्चिरं परदेशं न स्थातव्यम्, मित्रताभिरक्षणाय स्नेहः संवर्धनीयः, समद्ध्यर्थं नीतिरनुसरणीया तथा धनं रक्षितुकामैः सत्पात्रेभ्यो वितरणेऽवधानं च सततं कर्तव्यमिति ।

**व्याख्या** - नृपतिः = राजा, दौर्मन्त्र्यात्, दुष्टः = यथोचित्तमप्रयुक्तः मन्त्रः = कार्यसिद्धिविषयको गुप्तविचारः, यस्य सः, तस्य भावो दौर्मन्त्र्यं तस्मात् = दुर्मन्त्रसेवनात् कारणात्, यतिः = शमदमादिसम्पन्नो जितेन्द्रियः पुरुषः, सङ्गात् = लोकसम्पर्कात्,

Scanned with CamScanner

NOTES

सुतः = पुत्रः, लालनात् = स्नेहविशेषपूर्वकं पालनात्, विप्रः= ब्राह्मणः अनध्ययनात् = वेदशास्त्राध्ययनरूपस्वाध्यायाभावात्, कुलम् = वंशः, कुतनयात् = अनुचितकार्यकारिणः पुत्रात्, शीलम् = सदाचारः, खलोपासनात् = दुष्टजनसहवासात्, ह्रीः= लज्जा, मद्यात् = मद्यपानादिति यावत्, कृषिरपि = हलकर्षणादिना सम्पाद्यमानो वृत्तिविशेषोऽपि, अनवेक्षणात् = पुनः पुनः पर्यालोचनाभावात्, स्नेहः = प्रेम, प्रवासाश्रयात् = परदेशवासात्, मैत्री = मित्रता, अप्रणयात् = स्नेहाभावात्, समृद्धिः = धनधान्यसुखादिवृद्धिः, अनयात् = नीतिविरुद्धाचरणात्, धनं च = वित्तं च त्यागप्रमादात्, त्यागे = दाने, प्रमादः = अवधानराहित्यं तस्मात्, विनश्यति = विनाशं दुरवस्थां गच्छतीति यावत् ।

'धनस्यावस्थात्रयं प्रदर्शयति -

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।**

**यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ।।। ४३ ।।**

अन्वय : धनस्य दानं भोगः नाशः (इति) तिस्रः गतयः भवन्ति । यः (धनं) न ददाति न भुङ्क्ते तस्य तृतीया गतिः भवति ।

भावार्थ : धनं दातव्यं भोक्तव्यं च, अन्यथा चौर्यादिना तन्नश्यतीति ।

व्याख्या - धनस्य = वित्तस्य, दानम् = वितरणम्, भोगः = स्वीयसुखार्थे विनियोगः नाशः = स्वसकाशान्निर्गमनम् = इति तिस्रः = त्रिसंख्यकाः,गतयः = अवस्थाः मार्गा इति यावत्, भवन्ति = जायन्ते, यः = पुरुषः, धनं न ददाति = न वितरति परार्थे न विनियुङ्क्ते, न भुङ्क्ते = नानुभवति स्वार्थे न विनियुङ्क्ते, तस्य = धनिनो धनस्य, तृतीया = नाशरूपा, गतिः = अवस्था परिणाम इति यावत्, भवति = जायते ।

'दानेन विभवक्षयोऽपि शोभावह एवे'त्येतदुदाहरणोपन्यासपुरःसरं निरूपयति -

**मणिः शाणोल्लीढः समरविजयी हेतिदलितो**

**मदक्षीबो नागः शरदि सरितः श्यानपुलिनाः ।**

**कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता**

**तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः ।। ४४ ।।**



Scanned with CamScanner

NOTES

**अन्वय** :शाणोल्लीढः मणिः, हेतिदलितः समरविजयी, मदक्षीबः नागः शरदि श्यानपुलिनाः सरितः, कलाशेषः चन्द्रः, सुरतमृदिता बालवनिता, अर्थिषु गलितविभवाः नराः च (एते सर्वे) तनिम्ना शोभन्ते ।

( पाठान्तरम् - मदक्षीवोस्थाने मदक्षीणो । नराः स्थाने जनाः नृपाः वा)

**भावार्थ** : प्रायो जगति सर्वाणि वस्तूनि महत्त्वेन शोभमानानि दृश्यन्ते, किन्तु शाणोल्लीढमणिप्रभृतयो विशेषश्चार्थिसत्कृतवित्ता नरास्तनुत्वेनैव शोभां प्राप्नुवन्ति । तनुत्वमेवैतेषां भूषणमिति ।

**व्याख्या** - शाणे = रत्नाद्युत्तेजनाय घर्षणस्य साधनीभूते यन्त्रविशेषे उल्लीढः उल्लिखितो घृष्ट इति यावत्, मणिः = रत्नम्, हेतिदलितः = शस्त्राहतः, समरविजयी = युद्धे विजयं प्राप्तः शूरो योद्धा, मदक्षीबः मदेन = मदजलेन क्षीवः = मत्तः, नागः = गजः, शरदि = शरदृतौ, श्यानपुलिनाः, श्यानानि = शुष्काणि पुलिनानि = तोयादुत्थितास्तटप्रदेशाः यासां ताः, सरितः = नद्यः, कलाशेषः = कलामात्रेणावशिष्ट एककलात्मकः, चन्द्रः = चन्द्रमाः, सुरतमृदिता, सुरते = रतिक्रीडायाम् मृदिता = शिथिलीकृतशरीरा, बालवनिता = मुग्धा स्त्री, अर्थिषु = याचकेषु, गलितविभवाः, गलितः = व्ययीभूतः, विभवः = धनम् येषां ते, नराश्च = उदाराः प्रपुरुषाश्च-एते सर्वे, तनिम्ना = कृशत्वेन, तनोर्भावः तनिमा, शोभन्ते = विभान्ति ।

'अवस्थानुसारं वस्तूनां मूल्यं न्यूनमधिकं वा भवती'त्याह -

**परिक्षीणः कश्चित् स्पृहयति यवानां प्रसृतये**
**स पश्चात्सम्पूर्णः कलयति धरित्रीं तृणसमाम् ।**
**अतश्चानैकान्त्याद् गुरुलघुतयाऽर्थेषु धनिना-**
**मवस्था वस्तूनि प्रथयति च सङ्कोचयति च ।। ४५ ।।**

**अन्वय** : कश्चित् परिक्षीणः यवानां प्रसूतये स्पृहयति, पश्चात् सः सम्पूर्णः धरित्रीं तृणसमां कलयति । अतः च अर्थेषु अनैकान्त्यात् गुरुलधुतया धनिनाम् अवस्था वस्तूनि प्रथयति च सङ्कोचयति च ।

**भावार्थ** : वस्तूनां गुरुत्वं लघुत्वं वा नियतं नास्ति, मनुष्याणामवस्थाविशेषेणैव तेषां मूल्यं वर्धते क्षीयते वेति ।

Scanned with CamScanner

व्याख्या – कश्चित् = कोऽपि पुरुषः, परिक्षीणः = निर्धनः सन् यवानाम् = धान्यविशेषाणाम्, प्रसूतये = निःशेषे कुब्जीकृताय पाणये अर्धाञ्जलये इति यावत्, 'स्पृहेरीप्सितः' इत्येनन चतुर्थी, स्पृहयति = अभिलषति, पश्चात् = कालक्रमेण, सः = परिक्षीणः पुरुषः, सम्पूर्णः = समृद्धः सन्, धरित्रीम् = वसुन्धराम्, तृणसमाम् = तृणतुल्यां तुच्छाम्, कलयति = मन्यते । अतश्च = अस्मादेव हेतोः, च शब्द एवार्थे, अर्थेषु = पदार्थेषु, यवधरित्रीप्रभृतिष्विति यावत्, अनैकान्त्यात् = एकान्तस्य भाव ऐकान्त्यम् न ऐकान्त्यम् अनेकान्त्यं तस्मात् अनिश्चितत्वेन अनियतरूपत्वेमेति यावत्, गुरुलघुतया = गुरुत्वेन लघुत्वेन च हेतुना, धनिनाम् = धनवताम्, अवस्था = उत्तमा अधमा वा दशा, वस्तूनि = पदार्थान्, प्रथयति च = विस्तारयति गुरूकरोति च, सङ्कोचयति च = लघूकरोति च ।

इदानीं 'प्रजापालनमेव राज्ञः सर्वार्थसाधन' मित्याशयेनाह -

**राजन्! दुधुक्षसि यदि क्षितिधेनुमेतां**
**तेनाद्य वत्समिव लोकममुं पुषाण ।**
**तस्मिंश्च सम्यगनिशं परिपोष्यमाणे**
**नानाफलैः फलति कल्पलतेव भूमिः ।४६ । ।**

अन्वय :हे राजन् ! यदि (त्वम्) एतां क्षितिधेनुं दुधुक्षसि, तेन अद्य वत्समिव अमु लोकं पुषाण । तस्मिन् च अनिशं सम्यक् परिपोष्यमाणे (सति) भूमिः कल्पलता इव नानाफलैः फलति ।

**भावार्थ** : पृथ्वी रत्नगर्भा कथ्यते, तानि रत्नानि तस्या उद्धर्तुं राज्ञा प्रजापालनमपेक्षणीयम्, तद्द्वारैव तदुद्धारसम्भवात् । यथा वत्सेषु जीवत्सु गौर्दुग्धं दातुं प्रभवति तथैव प्रजाजनेषु सुखं जीवत्स्वेव तेभ्युः कृष्यादिद्वारा राज्ञा सस्यादिफलं सम्प्रान्तुं शक्यमिति ।

**व्याख्या** - हे राजन्! = हे नृप! यदि चेत् , त्वम् , एतान् = सर्वाश्चर्यभूताम्, क्षितिधेनुम्, क्षितिर्धेनुरिव = गोसदृशी पृथ्वी ताम्, दुधुक्षसि = दोग्धुमिच्छसि, तेन = तर्हीत्यर्थः, अद्य = अस्मिन् समये, वत्समिव = तर्णकमिव, अमुम् = उपलभ्यमानम्, लोकम् = प्रजावर्गम् पुषाण = पोषणपूर्वकं पालय । अस्मिंश्च = लोके च, अनिशम् = नित्यम्, सम्यक् = उत्तमप्रकारेण, परिपोष्यमाणे सति = परिपाल्यमाने सति, भूमिः = पृथ्वी, कल्पलतेव = कल्पवल्लीव, नानाफलैः = अनेकप्रकारैः सस्यादिरूपैः

NOTES



Scanned with CamScanner

,फलति = सम्पूर्णा समृद्धा भवति । ( पाठान्तरम् - एताम् स्थाने एनाम्)

'राजनीतेरनेकरूपत्वमुदाहरणेन स्पुटीकरोति—'

**सत्याऽनृता च परुषा प्रियवादिनी च**
**हिंस्रा दयालुरपि चार्थपरा वदान्या ।**
**नित्यव्यया प्रचुरनित्यधनागमा च**
**वाराङ्गनेव नृपनीतिरनेकरूपा । ।४७ । ।**

**अन्वय** :सत्या अनृता च परुषा प्रियवादिनी च हिंस्रा दयालुः अपि च अर्थपरा वदान्या नित्यव्यया प्रचुरनित्यधनागमा च एवं नृपनीतिः वाराङ्गना इव अेनकरूपा (अस्ति) ।

**भावार्थः** सत्यासत्यादिभिः परस्परविरुद्धैर्द्वन्द्वगुणैरञ्जिता राज्ञो नीतिर्वेश्येव नानारूपैः शोभते । यथा वेश्या क्वचित्कदाचित्सत्यं क्वचिदसत्यं क्वचिच्च सत्याऽसत्यंमिश्रं तथा कठोरं मधुरं तदुभयसाधारणं च वचः प्रयुङ्क्ते निर्दयतां दयालुतां लोभमौदार्यं च यथासमयं दर्शयति, प्रसङ्गानुसारं धनस्य व्ययभावं च सम्पादयति, तथैव राजनीतिरप्यावश्यकतानुसारं सत्यमसत्यं च भावं प्रकटयन्ती निषेधविषयात्मकेषु कचिर्थेषु कठोरता मधुरता च धारयन्ती, दण्डप्रजासंरक्षणाभ्यां क्रूरतां मधुरतां च दर्शयन्ती, धनस्य व्ययं सङ्ग्रहं च यथावत्कर्तुमुपदिशतीति ।

**व्याख्या** : सत्या = यथार्थरूपेण वर्तमाना, अनृता च अयथार्थरूपेण वर्तमाना च, परुषा = कठोरभाषिणी, प्रियवादिनी च = मधुरभाषिणी च, हिस्रा = धातुका, दयालुः = कृपावती, अपि च = अन्यच्च अर्थपरा = धनपरायणा, वदान्या च = दानशाण्डा च, नित्यव्यया नित्यम् = सतत, व्ययः = कार्येषु धनस्य विनियोगः यस्याः तादृशी, प्रचुरनित्यधनागमा च, प्रचुर = बहुः, नित्यम् = सर्वदा, धनागम = अर्थप्राप्तिः यस्याः यस्यां वा सा च = एवम्, नृप- नीतिः = राजनीतिः,वाराङ्गनेव = वेश्येव, अनेकरूपा अनेकानि = परस्परविरुद्धानि बहूनि रूपाणि यस्याः तथाभूता अस्ति ।

'आज्ञादिभिर्वक्ष्यमाणैःषड्भिर्गुणैः सम्पन्न एव राजा समाश्रयणीय' इत्याह —-

**आज्ञा कीर्तिः पालनं ब्राह्मणानां दानं भोगो मित्रसंरक्षणं च ।**
**येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्तेषां पार्थिवोपाश्रयेण । ४८ । ।**



Scanned with CamScanner

अन्वय :हे पार्थिव! आज्ञा कीर्तिः ब्राह्मणानां पालनं दानं भोगः मित्रसंरक्षणं च- एते षड् गुणाः येषां (मध्ये) न प्रवृत्ताः (सन्ति), तेषाम् उपाश्रयेण कः अर्थः ?

भावार्थ : शासनशक्त्या यशसा मित्रब्राह्मणसंरक्षणप्रेरणा दानेन भोगेन च विरहितानां राज्ञामकिञ्चित्कराणां सेवनं व्यर्थमेवेति ।

व्याख्या - हे पार्थिव = पृथिव्या ईश्वरः तत्सम्बुद्धौ हे राजन्, आज्ञा = शासनम् कीर्तिः = यशः,ब्राह्मणानाम् = विप्राणाम्, पालनम् = रक्षणम्, दानम् = सत्पात्रेभ्यो धनादिवितरणम्, भोगः = ऐश्वर्योपभोगः, मित्रसंरक्षणं च, मित्राणाम् = सुहृदाम् , सरक्षणम् = सम्यक् पालनञ्च, एते = अमी पूर्वोक्ताः, षट् = षट्संख्यकाः गुणाः, येषाम् = राज्ञाम् , मध्ये, न प्रवृत्ताः = नोपस्थिताः सन्ति, तेषाम् = तादृशानां राज्ञाम्, उपाश्रयेण = सेवनेन, कः अर्थः = को लाभः अस्ति ? न कोऽपीत्यर्थः ।

सञ्चितकर्मानुसारमेव धनं लभ्यते लोके, न्यूनं ततो नाप्यधिकमिति प्रतिपादयन्नाह —

**यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं**
**तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् ।**
**तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः**
**कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्।। ४९ ।।**

अन्वय :धात्रा निजभालपट्टलिखितं स्तोकं महद् वा यत् धनम् अस्ति, तत् (मनुष्यः) मरुस्थले अपि नितरां प्राप्नोति, ततः अधिकं मेरौ (अपि) न (प्राप्नोति) । तत् (हे मनुष्य) धीरः भव, वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः । पश्य, घटः कूपे पयोनिधौ अपि तुल्यं जलं गृह्णाति ।

भावार्थ : दैवलिखितानुसारमेव धनं सर्वत्र सर्वदा सर्वासु दशासु लभ्यते लोकैः, यथाहि घटेन सागरे कूपेऽपि तुल्यमेव जलं गृह्यते । अतो धनिकानां पुरोव्यर्थं दैन्यं न प्रदर्शनीयमिति ।

व्याख्या - धात्रा = ब्रह्मणा, निजभालपट्टलिखितम्, निजम् = स्वीयं यद् भालपट्टम् = ललाटपट्टं तस्मिन् लिखितम् = अङ्कितम् , स्तोकम् = अल्पम्, महत् = अधिकं वा यद् धनम् = वित्तम् अस्ति, तत् = तावन्मात्रं धनम् मनुष्यः मरुस्थलेऽपि = निर्जले धन्वदेशेऽपि नितराम् = अतिशयेन, अवश्यमित्यर्थः, प्राप्नोति = लभते, ततः =

NOTES



Scanned with CamScanner

ब्रह्मलिखितात्, अधिकम् = अतिशयितम्, मेरावपि = सुवर्णपर्वतेऽपि न प्राप्नोति। तत् = तस्मात्कारणात्, हे मनुष्य! धीरः = गम्भीरः स्थिरचित्तः, भव = जायस्व, वित्तवत्सु = धनिषु, कृपणाम् = दीनाम्, वृत्तिम् = वर्तनं व्यापारम्, वृथा = व्यर्थम्, मा कृथाः = न कुरु, पश्य = विलोक्य, घटः = कलशः, कूपे = प्रहौ, पयोनिधावपि = समुद्रेऽपि, तुल्यम् = समानम्, जलम् = सलिलम्, गृह्णाति = आदत्ते ।

'अर्थिनां दीनवचसां श्रवणं विनैव दाता तेभ्यो दातुमर्हती' ति मेघान्योक्त्याह —

**त्वमेव चातकाधारोऽसीति केषां न गोचरः**

**किमम्भोदवरास्माकं कार्पण्योक्तिं प्रतीक्षसे ।। ५० ।।**

**अन्वयः** - हे अम्भोदवर! 'त्वम् एव चातकाधारः असि' इति केषां गोचरः न (अस्ति, तत्) अस्माकं कार्पण्योक्तिं किं प्रतीक्षसे ?

**भावार्थ** :'अस्माकं त्वमेवाश्रयोऽसी'त्यवं दीनं वचनमाश्रितानां न कदापि श्रोतुमभिलषणीयमाश्रयदातृभिः सत्वरं च तेषामभीष्टं पूरणीयमिति ।

**व्याख्या** - हे अम्भोदवर! अम्भ = पानीयम् ददति= वर्षन्ति ते अम्भोदाः तेषु वरः श्रेष्ठः तत्सम्बुद्धौ, हे श्रेष्ठ मेघ! त्वम्, एव = केवलम्, चातकाधारः चातकानाम् = पक्षिणां सारङ्गाणाम्, आधारः = आश्रयभूतो रक्षकः, असि = वर्तसे, इति = एवम् , केषाम् = पुरुषाणाम्, न गोचरः = न ज्ञातम्, गोचरशब्दस्य नित्यपुंस्त्वम्, तत् = तस्मात् कारणात् , अस्माकम् = नः, कार्पण्योक्तिम् = दीनतामयं वचनम्, किम् = किमर्थम्, प्रतीक्षसे = अनुपालयसि, श्रोतुमिच्छसीत्यर्थः ।

**कतिपयाः प्रश्नाः समाधेयाः**

१. कः श्रयसां पन्थाः ?

२. कथं प्रारब्धम् उत्तमजनाः न परित्यजन्ति ?

३. केशरी कथं जीर्णं तृणमपि न खादति ?

४. सर्वः जनः कीदृशं फलं वाञ्छति ?

५. कुक्कुरगजयोः चारित्रिकं पार्थक्यं दर्शयत ?



Scanned with CamScanner

६. महतां चरित्रविभूतयः कीदृशाः ?

७. हिमालयपुत्रस्य पयसि संपातः कथमनुचितः ?

८. सत्त्ववतां प्रकृतिः कीदृशी ?

९. मनस्विनां के द्वे गती ?

१०. धनलुब्धस्य कीदृशी कामना ?

११. केन प्रकारेण के के नश्यन्ति ?

१२. किमर्थं सर्वेगुणाः काञ्चनमाश्रयन्ति ?

१३. के केन भावेन शोभन्ते ?

१४. किमर्थं कल्पलतेव भूमिः फलति ?

१५. नृपनीतिः कीदृशी ?

१६. वित्तस्य काः तिस्रः गतयः भवन्ति ?

१७. कथं कृपणां वृत्तिं न कुर्यात् ?

❖❖❖

NOTES



Scanned with CamScanner